Earlier 268
CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

श्रीकृष्णाय नमः ।

श्रीमद्ब्रह्मसूत्राणुभाष्यम् ।

शुद्धाद्वैतब्रह्मवादनिर्गुणभक्तिमार्गप्रवर्तकाचार्यचक्रचूडामणि-
श्रीमद्वल्लभाचार्यचरणप्रणीतम् ।

दशदिगन्तविजयिश्रीमद्गोस्वामिश्रीपुरुषोत्तमचरणप्रणीत-
भाष्यप्रकाशसंपूर्णवेत्तृश्रीमद्गोस्वामिश्रीगोपेश्वरजि-
चरणप्रणीतभाष्यप्रकाशरश्मिपरिबृंहितम् ।

Vol. III, Part ii

तृतीयाध्यायस्य द्वितीयः पादः ।

'भगवद्धर्मपरायण सद्व्रत श्रेष्ठि गोवर्धनदास सुन्दरदास' इत्यस्य
पुष्टिमार्गीयसंस्कृतसाहित्यसमुद्धारार्थं निर्दिष्टद्रव्यसंग्रहतो
'भृगुपुरस्थ मूलचन्द्र तुलसीदास तेलीवाला, बी. ए.,
एलएल्. बी., वकील, हाइ कोर्ट' इत्यनेन संशोध्य
'निर्णयसागर' मुद्रणालये मुद्रयित्वा
प्रकटीकृतम् ।

श्रीवल्लभाब्दाः ४४८. संवत् १९८२.

मूल्यमेकमुद्रिका ।

Q
1b

CC-0. Agamnigam Digital Presevation Foundation

STATE MUSEUM, LUCKNOW
LIBRARY

Acc. No. ______

Book No ______

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

MOOLJEE JAITHA & CO. TAMARIND LANE, FORT, BOMBAY. EWART HOUSE

श्रीकृष्णाय नमः ।
श्रीगोपीजनवल्लभाय नमः ।
श्रीमदाचार्यचरणकमलेभ्यो नमः ।

श्रीमद्ब्रह्मसूत्राणुभाष्यम् ।

भाष्यप्रकाश-रश्मि-परिबृंहितम् ।

तृतीयोऽध्यायः ।

द्वितीयः पादः ।

सन्ध्ये सृष्टिराह हि ॥ १ ॥ (३-२-१-)

पूर्वपादे अधिकारियोग्यदेहो निरूपितः । द्वितीये जीवस्य मुक्तियोग्यता

भाष्यप्रकाशः ।

सन्ध्ये सृष्टिराह हि ॥ १ ॥ अथ द्वितीयपादं व्याचिख्यासवः पादयोः सङ्गतिमाहुः पूर्वेत्यादि । अधिकारिणो ज्ञानोपदेशयोग्यदेहप्राप्तावपि यदि स्वरूपतो मुक्तियोग्यता न स्यात्, तदा तादृशदेहाप्तिवैयर्थ्यम्, अतस्तदर्थं द्वितीयपादे सा निरूप्यते । यदि हि सा न स्यात्, उपदेशो न स्थिरीभवेत्, अतस्तदर्थं तन्निरूपणमित्यर्थः ।

माध्वास्तु माहात्म्यज्ञानपूर्वकस्नेहस्य भक्तित्वादनुक्ते माहात्म्ये तदज्ञानेऽस्य भक्तेरप्यसम्भवात् तत्सिद्ध्ये माहात्म्यप्रदर्शनायायं पाद इत्याहुः ।

तत्र माहात्म्योक्तिस्तु पूर्वमपि निराबाधा ।

भिक्षुस्तु, पूर्वस्मिन् पादे ब्रह्मणः सकाशादवान्तरसृष्टिरुक्ता । अत्र त्वेकस्मिन् देहेपि स्वप्नादिसृष्टिस्तत उच्यते । तावता जन्मादिसूत्रस्थं लक्षणं विचारितं भवति । ततः स्वरूपलक्षणं विचार्यते, ततः प्रपञ्चब्रह्मणोर्भेदाभेदावित्याह ।

तत्रापि विचारस्य कैमर्थ्याकाङ्क्षा न पूर्यते । तस्मादुक्तमेव प्रयोजनम् । ततश्चैककार्यत्वं पादयोः सङ्गतिः । अस्या योग्यताया आन्तरत्वं च पादानन्तर्ये हेतुरिति द्रष्टव्यम् ।

रश्मिः ।

सन्ध्ये सृष्टिराह हि ॥ १ ॥ तदर्थमिति । उपदेशस्थिरीकरणार्थम् । **तन्निरूपणं** स्वरूपतो मुक्तियोग्यतानिरूपणम् । **तदज्ञान** इति । विषयत्वेन माहात्म्याज्ञाने । कारणाभावेन ज्ञानाभावात् । **अस्य** पञ्चाग्निविद्यासाधितदेहकस्य । **तत्सिद्ध्ये** माहात्म्यज्ञानसिद्ध्ये । **पूर्वमिति** । पूर्वं गतपादे । तेनास्यार्थस्यातिव्याप्तिः । स्वरूपतो मुक्तियोग्यता तु दीक्षितस्य स्वप्नेऽन्नभोजनादौ प्रायश्चित्तस्मरणात्स्वप्नेऽन्नभोजनादिदोषनिवृत्त्या तादृशदोषज्ञानार्थमधिकरणारम्भः । अग्रे दोषासंसर्गे विषयनिर्धारार्थं ब्रह्मस्वरूपविचार इति नातिव्याप्तिः । माहात्म्यज्ञानं तु श्रवणाङ्गमीमांसाफलं षोडशपादानुस्यूतम् । **स्वप्नादीति** । **आदि** सुषुप्तिः । **तत** इति । तदनन्तरं द्वितीयपादे । **तत** इति । तदनन्तरं तृतीयपादे । **तत** इति । तदनन्तरं चतुर्थपादे । **कैमर्थ्येति** । असंदिग्धस्य स्वरूपलक्षणस्य सूत्राविषयस्य महता प्रबन्धेन विचारः किमर्थ इति कैमर्थ्याकाङ्क्षा । **उक्तमिति** । स्वप्नदोषज्ञानम् । **एवेति** । प्रयोजनद्वयनिरासादेवकारः । **एककार्यत्वमिति** । अविरोधस्य द्वितीयाध्या-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

निरूप्यते। तत्र प्रथमं स्वप्नं निरूपयति। स्वप्नस्य सत्यत्वे तत्कृतगुणदोषसम्बन्धो जीवस्य भवेत्। ततश्च निरूपिता शुद्धिर्व्यर्था स्यात्। अतः स्वप्नस्य मिथ्यात्वं प्रदर्शयितुमधिकरणारम्भः।

तत्र पूर्वपक्षमाह। सन्ध्ये स्वप्ने सृष्टिराह। 'तस्य वा एतस्य पुरुषस्य द्वे एव स्थाने भवत इदं च परलोकस्थानं च सन्ध्यं तृतीयं स्वप्नस्थान'मित्युपक्रम्य, 'न तत्र रथा न रथयोगा न पन्थानो भवन्त्यथ रथान् रथयोगान् पथः सृजत' इत्यादिना सृष्टिराह। सन्ध्ये स्थाने सृष्टिरस्ति। यतः श्रुतिः स्वयमेवाह। युक्तश्चायमर्थः।

भाष्यप्रकाशः।

पूर्वाधिकरणविषयमाहुः तत्रेत्यादि। तत्रेति। योग्यतायां निरूप्यायाम्। ननु तथा सति प्रथमं स्वप्ननिरूपणस्य किं प्रयोजनम्, अत आहुः स्वप्नस्येत्यादि। जीवस्येति। प्राप्तयोग्यदेहस्यापि जीवस्य।

शङ्करभास्कराचार्ययोर्मते तु स्वयंज्योतिष्ट्वसिद्ध्यर्थं स्वप्ननिरूपणम्।

तत्तु मुक्तियोग्यतायामेव पर्यवस्यति।

रामानुजाचार्यास्तु, पूर्वपादे जीवस्य कर्मगतिं प्रदर्श्य दुःखित्वं स्थापितम्, इदानीमस्य स्वप्नावस्था परीक्ष्यत इत्याहुः।

एवं तचौरोपि।

तन्मते वैराग्यार्थतामात्रमायातीति बोध्यम्।

प्रकृते त्वधिकरणप्रयोजनोक्त्यैव स्वप्नसृष्टिः सत्या मिथ्या वेति संशयोप्युक्त इति तमनुक्त्वा पूर्वपक्षमेवाहुः तत्रेत्यादि। सन्ध्यमिति। एतल्लोकपरलोकयोः सन्धौ भवम्।

रश्मिः।

यार्थस्य शाब्दज्ञानजननस्वभावस्य पादयोः सङ्गतिरित्यर्थः। पूर्वोक्तशाब्दज्ञानस्य ज्ञानोपयोगिदेहसाधनं कार्यम्। तदनन्तरं किमन्यकार्यजनकत्वमिति जिज्ञासर्यं स्वरूपतो मुक्तियोग्यतारूपकार्यनिरूपणात्। एकस्य कारणस्य कार्यत्वमित्येककार्यत्वम्। पादयोस्तु प्रसङ्गः। स्वयमिति। 'अत्रात्मा स्वयंज्योतिर्भवती'ति श्रुतेः। 'अत्र' स्वप्ने। तत्तु मुक्तीति। शाब्दविषयं स्वयंज्योतिष्ट्वं मुक्तियोग्यतायाम्। एवेति। मुक्तेः स्वयंज्योतिष्ट्वम्। ज्योतिश्चरणाधिकरणे च ब्रह्मणः स्वयंज्योतिष्ट्वमित्येवकारः। पर्यवेति। मुक्तियोग्यता स्वाप्निकदोषाभावः। तत्र स्वयंज्योतिष्ट्वं स्वयंप्रकाशत्वं स्वाप्निकदोषरहितत्वेऽभिन्नात्मत्वं विषयान्तराप्रकाश्यत्वं स्वयंज्योतिष्ट्वं 'अत्रात्मे'ति श्रुतेरित्येवं पर्यवस्यतीत्यर्थः। तचौर इति। भगवाञ्छैवाचार्यः। वैराग्येति। जगतः कर्मगत्यधीनत्वे दुःखित्वं विषयवैतृष्ण्यरूपवैराग्यार्थतामात्रम्। स्वप्नावस्थापरीक्षणेन च वैराग्यमिति तथा। मात्रचा ज्ञानोपयोगिदेहव्यवच्छेदः। एवेति। जगद्दृष्टिः सत्यत्वे बीजम्, निरूपितशुद्धिवैयर्थ्यं मिथ्यात्वे बीजमित्येवकारः। पूर्वपक्षमेवेति। संशयव्यवच्छेदक एवकारः।

भाष्ये। सृष्टिराहेति। अत्र सृष्टिमाहेत्यापत्त्या तन्निवृत्तये सूत्रमेव विवृण्वन्ति स्म सन्ध्यइत्यादि। सूत्रे 'सन्ध्य' इत्यस्य 'स्थान' इति विशेष्यं 'सृष्टि'रित्यस्याग्रे'ऽस्ती'त्यस्यानुसन्धानं विभक्तिप्रयोजकम्, तदाह सृष्टिरस्तीति। आहेत्यस्यार्थमाह पूर्वपक्षी यत इति। आहेत्यत्र श्रुतिः कर्त्री। एवकारः श्रुत्यन्ययोगव्यवच्छेदकः। सौत्रहीत्यस्यार्थमाहुः युक्त इति।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यथा श्रुतिर्वदति, तथैव स्वप्ने दृश्यते । देवादिवाक्यानां प्रबोधेपि बाधाभावात् । नचेयमेव सृष्टिस्तत्र दृश्यते । 'न तत्र रथा' इत्यादिना निषेधात् । श्रुतिवादिनां

भाष्यप्रकाशः ।

स्वप्न इयमेव सृष्टिः स्मर्यत इति नैयायिकादयो मन्यन्ते ।

तदयुक्तम् । स्वप्ने दर्शनाद्यभिमानस्य क्वचित् पश्यामीत्याद्यनुव्यवसायस्य जागरणोत्तरं चेदं मया दृष्टमिदं शुक्तमित्यादिज्ञानस्य च बाधापत्तेः । नचेयमेव दृश्यत इत्यपि युक्तम् । स्थूलानां गजतुरगादीनां शरीरान्तर्मातुमशक्यत्वात् । नच मिद्धामनःसंयोगे स्मृत्युपनीतमारोपितं भासत इत्यपि युक्तम् । आरोपनियामकस्य तत्तद्वस्तुसादृश्यस्यात्मनि मिद्धायां चासिद्धत्वात् । अप्रामाणिकस्य तस्य कल्पने गौरवाच्च । क्षणे क्षणेऽन्यान्यदर्शनेऽन्यस्यान्यथात्वेपि नियामकाभावाच्च । नच क्षणानामेव नियामकत्वम् । साधनान्तरानपेक्षाणां तेषां तथात्वस्यासिद्धत्वात् । कल्पने चाप्रामाणिकगौरवप्रसङ्गात् । नच बहिर्निर्गत्य पश्यतीत्यपि युक्तम् । तथा सति नेत्रोन्मीलनप्रसङ्गात् । भुक्तौ चर्वणाद्यापत्तेः । बहिर्विषयकज्ञाने मनसः पारतन्त्र्यात् । जागरे तृप्त्यापत्तेः । पार्श्वस्थानामपि तद्दर्शनापत्तेश्च । मिद्धासंयोगविघटनापत्तेस्तदा जागरापत्तेश्च । तस्मात् तत्रैतत्सृष्टिदर्शनाङ्गीकारो

रश्मिः ।

प्रकृते । यथा श्रुतिरिति भाष्यं विवृण्वन्ति स्म **स्वप्न इयमेवे**ति । इति नैयायिकादयो मन्यन्त इति शेषेणान्वयः । इयमिति । यथा श्रुतिर्वदति, तथैव । इदंलोकपरलोकरूपस्य प्रायपाठं त्यक्त्वा सत्यत्वेन प्रतीता । एवकारो वाक्यभेदप्रसङ्गात् । **नैयायिकादय** इति । आदिना नास्तिकादयः । **देवादी**तिभाष्यं विवृण्वन्ति स्म **स्वप्ने दर्शनादी**ति । **बाधे**ति । प्रबोधेपि सत्यत्वेन बाधेपि तदापत्तेर्बाधाभावादित्यर्थः । **नचेयमेवे**तिभाष्यं विवरीतुमाहुः **नचेयमेवेति** । **इयं** जाग्रत्सृष्टिः । एवकारो नैयायिकादियुक्त्या । 'तस्मिन्सन्ध्ये स्थाने तिष्ठन्नुभे स्थाने पश्यतीदं च परलोकस्थानं चे'ति श्रुतेः । तेन भाष्यीयतत्रेत्यस्य वासनया स्वप्ने । 'तस्मिन्सन्ध्ये स्थान' इत्युक्तश्रुतौ उभयोर्दर्शनं शरीरान्तः स्थित्वा जीवस्योत बहिर्निर्गत्येति विकल्प्याद्ये दोषमाह **स्थूलानामि**त्यादि । स्थूलानां शरीरान्तर्मानं शङ्कते **नच मिद्धामन** इति । अत्र लेखकप्रमादः । मिद्धानाडी न्यायशास्त्रप्रसिद्धा । तत्र मनःसंयोग इति । अथवा । प्रसिद्ध्यभावात् **सिद्धा** देवयोनिः, पञ्चाग्निविद्यासाधितदेहः तस्यां मनःसंयोगे स्वप्नात्मकज्ञानस्य मानस्य स्थूलं तत्स्मृत्युपनीतं सूक्ष्मं वृत्तिवत् अन्तःकरणावच्छिन्नविषयावच्छिन्नचैतन्यैक्यप्रत्यक्षं विषयनिष्ठं स्मृत्युपनीतं यथा शाब्दं ह्युपनीतं तथा स्वप्नाभेदेन हृदयाकाश आरोपितं शुक्तौ रजतमिव भासत इत्यर्थः । **तत्तदि**ति । यथा चाकचक्येन सादृश्यस्यात्मनीत्यन्यमतं मनसीति स्वमतम् । प्रभौ सर्वविषयकम्, 'यः सर्वज्ञ' इति श्रुतेः । जीवीयं त्वणुव्यवहार्यम् । **मिद्धायामि**तिलेखकप्रमादोऽप्रसिद्धेः । सिद्धायाम् । **तस्ये**ति । तत्तद्वस्तुसादृश्यस्य । **तथात्वस्ये**ति । नियामकत्वस्य । नच जन्यमात्रे कालोपाधिरिति नियामकत्वमस्त्विति । कस्यापि मते मिथ्याकालस्य नियामकत्वाभावेन तव मते सत्त्वात् । **कल्पन** इति । क्षणानां जन्यमात्रं प्रति कारणानां निमित्तत्वस्य कार्यानुरोधात्कल्पने । जीवः शरीरान्तर्गतो न, किन्तु बहिर्निर्गत्य 'तस्मिन्सन्ध्य' इत्युक्तश्रुतौ द्वितीयविकल्पे दोषशङ्का । दर्शनत्वेन बहिर्निर्गतत्वेन कार्यकारणभावमाहुः **तथा सती**ति । आदिना गिलनम् । एतत्स्वप्ने न जायते । **पारे**ति । स्थूलविषयपारतन्त्र्यात् । स्वप्नसृष्टिसत्यत्वेन बहिर्विषयकज्ञाने त्वाह **जागर** इति । **पार्श्वस्थाना**मिति च । **तद्दर्शने**ति । औपाधिकत्वात्तथा । **मिद्धे**ति । सिद्धेति पाठः । तथाच स्वप्नकृतदोषसम्बन्धे ज्ञानोपयोगित्वाभावो देहे । **जागरे**ति । स्वप्नकारणदेहान्तःसंयोगनाशात्तथा । **तत्रैतदि**ति । स्वप्न एतत्समीपवर्तिजगद्रूपसृष्टिदर्शनाङ्गीकारः ।

---

१ चाकचक्ये मनसा दृश्येत्यादिपाठः । २ नियामकत्वस्य ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

श्रुतिरेव प्रमाणम्। किं पुनरनुभवसंवादिनी। तस्मात् स्वप्ने सृष्टिरस्ति ॥ १ ॥

निर्मातारं चैके पुत्रादयश्च ॥ २ ॥

काठके चतुर्थवल्ल्यां श्रूयते। 'य एष सुप्तेषु जागर्ति कामं कामं पुरुषो निर्मिमाणः। तदेव शुक्रं तद्ब्रह्म तदेवामृतमुच्यत' इति निर्मातारमेके वदन्ति। यद्यपि 'सुषुप्त्युत्क्रान्त्योर्भेदेने'त्यत्र 'न तत्र रथा' इत्यपि ब्रह्मप्रकरणम्, तथापि नियतधर्मपक्षे जीव एव कर्तेति प्रतिभाति। तदर्थं निःसन्दिग्धं वचनमुदाहरन्ति। भगवन्निर्मितत्वात् स्वप्नस्थस्यापि सत्यत्वम्। न हि कर्तुः स्वापोऽस्ति, येन भ्रमः

भाष्यप्रकाशः।

युक्तिविरुद्धः श्रुतिविरुद्धश्चेत्याहुः नचेत्यादि। अन्यत् स्पष्टम् ॥ १ ॥

निर्मातारं चैके पुत्रादयश्च ॥ २ ॥ ननु पूर्वसूत्रविषयवाक्येनैव सृष्टौ सिद्धायां पुनरेतत्सूत्रप्रणयनस्य किं प्रयोजनमित्यत आहुः यद्यपीत्यादि। ब्रह्मप्रकरणमिति। इति सिद्धमिति शेषः। नियतधर्मपक्ष इत्यादि। 'कतम आत्मे'ति प्रश्ने, 'योऽयं विज्ञानमयः पुरुषः प्राणेष्वि'त्युपक्रम्याग्रे 'स्वयं विहत्य स्वयं निर्माये'ति कथनात्, तस्यैवाग्रे 'न तत्र रथा' इत्यादिना विवरणात्तस्यैवायं धर्म इति पक्षे अदृष्टद्वारा जीव एव कर्तेति प्रतिभाति। तदर्थं तन्निवृत्तये। तथाच निःसन्दिग्धं भगवत्कृतत्वप्रतिपादनायास्य सूत्रस्य प्रणयनमित्यर्थः। एवं निर्बन्धेन प्रतिपादनस्य फलमाह भगवदित्यादि। तथाच पूर्वस्मिन् वाक्ये 'स्वयं निर्माये'त्यनन्तरं 'प्रस्वपिती'ति स्वापश्रावणादत्र तद्राहित्यश्रावणाद्भगवानेव कर्तेति लिङ्गबलात् प्रकरणात् 'तदेव शुक्र'मित्यादिवाक्य-

रश्मिः।

श्रुतीति। 'अत्रात्मे'ति श्रुतिविरुद्धः। स्वप्नविषयकज्ञानाधिकरणमात्मा स्वयंज्योतिरित्यर्थात्। स्वप्नमिथ्यात्वे निर्विषयकज्ञानाभावान्न ज्ञानाधिकरणत्वमात्मनः स्यात्। अन्यदिति। सृष्टिरिति। पूर्वपक्ष्युक्ता। एवमन्यत्स्पष्टम् ॥ १ ॥

निर्मातारं चैके पुत्रादयश्च ॥ २ ॥ प्राणेष्विति। प्राणा इन्द्रियाणि। सूक्ष्मदेहे। तस्यैवेति। विहननस्वयंनिर्माणस्याग्रे। एवकारोऽन्ययोगव्यवच्छेदकः। तस्यैवेति। विहत्य निर्मातुः। विवरणविव्रियमाणसम्बन्धादेवकारः। अयमिति। 'न तत्र रथा' इत्युक्तः स्वप्नः। जीव एवेति। स्वयंशब्देनापि जीवपरामर्शात् पूर्वपक्षोक्तपुरुषयोगव्यवच्छेदक एवकारः। तदर्थमितिभाष्यं विवृण्वन्ति स्म तदर्थमिति। व्याख्येयम्। भाष्ये। उदाहरन्तीति। तद्विदः। प्रकृते। पूर्वस्मिन्निति। पौर्वसूत्रीयपूर्वस्मिन् ज्योतिर्ब्राह्मणे। प्रस्वपितीति। 'स्वेन भासा स्वेन ज्योतिषा प्रस्वपिती'ति। अत्रेति। बृहदारण्यकज्योतिर्ब्राह्मणे। तत्रेति। द्वैतीयसूत्रीयोत्तरस्मिन् काठके स्वापराहित्यात् 'तदेवामृतमुच्यते'इत्यनन्तरं 'तदेव शुक्र'मित्यादिश्रुतेः। ननु राहित्यश्रावणं कुत्रेति चेत्। न। राहित्यस्य श्रावणादिति न विग्रहसमासः, किन्तु स्वापराहित्येन 'तदेव शुक्र'मित्यादिश्रावणात्। तद्राहित्यपदं तद्राहित्यश्रावणे लाक्षणिकमिति समासः। तदेव 'अवक्रं तद्ब्रह्मे'त्याद्यपि पाठः। एवेति। जीवयोगव्यवच्छेदकः। कर्तेति। निर्माणकर्ता निर्माता। इति हेतोः स्वापराहित्यलिङ्गबलात्। प्रकरणात्। 'सुषुप्त्युत्क्रान्त्योर्भेदेने'त्यत्र 'न तत्र रथा' इत्यत्र ब्रह्मप्रकरणात्। तदेव शुक्रमिति। बृहदारण्यके जीवः, काठके 'पुरुषो ब्रह्मे'ति किं ग्राह्यं तत्र। यद्वा। पुरुषः जीवो ग्राह्यः, ब्रह्म वा। तत्र वाक्यशेषः। 'तदेव शुक्र'मित्यादिः। अत्र तद्ब्रह्मेतिपदाद्ब्रह्म ग्राह्यमित्येष वाक्यशेषः तस्मात्। नहि

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्यात् । 'जागर्ती'ति वचनात् । इच्छापूर्वकं च सर्वं सृजति । 'शतायुषः पुत्रपौत्रा'-न्निति कामविषयाः पुत्रादय उक्ताः । ते च निर्मिताः परलोकसाधका इति लोकत्रयकल्पना । चकारद्वयेन कारणकार्यगताः सर्वे धर्मा उक्ताः । तस्माच्छ्रुत्युपपत्तिभ्यां स्वप्नप्रपञ्चस्य सिद्धत्वात् तत्कृतगुणदोषसम्बन्धे पूर्वोक्तदेहनिर्माणं व्यर्थमित्येवं प्राप्तम् ॥ २ ॥

भाष्यप्रकाशः ।

शेषाच्चावसीयते । अतो भ्रमाभावादपि स्वप्नसृष्टेः सत्यत्वम् । किञ्च । 'ये ये कामा दुर्लभा मर्त्यलोके तांस्तान् कामान् छन्दतः प्रार्थयस्वे'ति पूर्वं कामशब्दस्य कामविषयेषु प्रयुक्तत्वात् 'कामं कामं पुरुषो निर्मिमाण' इत्यत्रापि कामपदेन तद्विषय एव लभ्यते । वीप्सया क्रियाविशेषणत्वेन चेच्छापूर्वकतेत्यतोपि भगवत्कर्तृकत्वम् । न हि जीव इच्छापूर्वकं स्वक्लेशाद्युत्पादकं स्वयं सृजेत् । अत एतेन ज्योतिर्ब्राह्मणस्थे 'उतेव स्त्रीभिः सह मोदमानो जक्षदुतेवापि भयानि पश्य'न्नित्यादिवाक्य उक्तायामपि सृष्टौ ब्रह्मकर्तृकता निश्चाय्यते । किञ्च, 'शतायुषः पुत्रपौत्रान् वृणीष्वे'ति पूर्वं कामविषयाः पुत्रादय ऐहिका उक्ताः । ते च भगवन्निर्मिताः । 'सर्वयोनिषु कौन्तेये'ति गीतास्मृतेः । अतः परलोकनिर्मातृत्वस्यापि साधका इति ब्रह्मैवात्र कर्तृ । न हि जीवेन स्वपित्रादयः कर्तुं शक्यन्ते । स्वपूर्वजत्वात् । लोकत्रयकल्पना च जीवपक्षे, ब्रह्मपक्षे तु न कापीत्यतोपि ब्रह्मकर्तृकत्वम् । चकारार्थमाह चकारेत्यादि । कारणगता धर्माः सामर्थ्यमुपादानगोचरापरोक्षज्ञानादयः । कार्यगताः सत्यत्वादयः । सिद्धमाह तस्मादित्यादि । सिद्धत्वादिति । उक्तप्रकारैः सत्येन सिद्धत्वात् । सूत्रयोजना तु, पूर्वसूत्रीयस्याहेतिपदस्य वचनविपरिणामेन कार्या । एके शाखिनो निर्मातारं चाहुः । पुत्रादयश्च तदाहुरिति । तेषां वक्तृत्वं तु बोधकत्वात् । 'तपांसि सर्वाणि च यद्वदन्ती'तिवद्बोध्यम् ॥ २ ॥

रश्मिः ।

कर्तुरित्यादिभाष्यविवरणं **अतो भ्रमेति** । भगवतो भ्रमाभावः स्वापाभावात् । स्वापस्य भ्रमहेतुत्वं तामसत्वात् । 'सुखमहमस्वाप्सम्, न किञ्चिदवेदिष'मिति ज्ञानावरणोक्तेः । 'यत्रायं प्रस्वपिती'त्यादिबृहदारण्यकज्योतिर्ब्राह्मणाद्वा । स्वापाभावे भाष्ये हेतुः **'जागर्ती'ति वचनादिति** । **तद्विषय एवेति** । काम्यन्त इति कामाः अनन्तकल्याणगुणाः इति कर्मप्रत्यये कृतेपि तथार्थादेवकारः । **वीप्सयेति** । 'कामं काम'मिति द्विरुक्त्या । 'काम इच्छे'तीच्छापूर्वकता 'निर्मिमाण' इत्यत्र निर्माणे इत्यतोपि इच्छापूर्वकसृष्टिकर्तृत्वलिङ्गादपि । **इच्छापूर्वक**मितिभाष्यं विवृण्वन्ति स्म **न हीत्यादि** । **अत इति** । जीवस्यास्रष्टृत्वात् । **शतायुष** इतिभाष्यं विवृण्वन्ति स्म **किञ्चेति** । **किञ्चे**त्युक्तिर्भाष्यप्रकाशे कामपदघटितश्रुतेः पूर्वं विचारात् । **उक्ता इति** । काठके उक्ताः । **ते चे**तिभाष्यं विवृण्वन्ति स्म **ते चेति** । **परलोकेति** । भाष्ये परलोकसाधकाः, व्यञ्जनया तु परलोकनिर्मातृत्वस्यापि ब्रह्मणि साधकाः । अतो **लोकत्रये**तिभाष्यं स्पष्टमपि व्याचक्षते **लोकत्रयेति** । **जीवपक्ष इति** । परलोकं साध्नोति भूलोकस्थ इति तथा । **न कापीति** । परलोकसाधनाभावात्तथा । **चकारार्थमिति** । समुच्चयार्थकचकारार्थम् । **तदाहुरिति** । तदित्यव्ययम् । **ते** । ननु श्रुतिनिर्मातारमाह, न ते आहुः, अत आहुः **तेषामित्यादि** । **तपांसि** पुराणानि । भगवान् व्यासो वदति पुराणव्यासद्वारेति तथा । **भाष्ये** । **इत्येवं प्राप्तमिति** । भवतीति क्रियापदम् । इत्येवं प्राप्तं पूर्वपक्षमित्युत्तरत्रान्वयो वा ॥ २ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मायामात्रं तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात् ॥ ३ ॥

तुशब्दः पक्षं व्यावर्तयति । स्वप्नसृष्टिर्मायामात्रम् । तत्र हेतुः । कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात् । कृत्स्नत्वेन यस्य यादृशं स्वरूपं देशकालवस्तुसापेक्षं तथाभिव्यक्तिः कार्त्स्न्येनाभिव्यक्तिस्तदभावात् ।

भाष्यप्रकाशः ।

मायामात्रं तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात् ॥ ३ ॥ सिद्धान्तं व्याकुर्वन्ति तुशब्द इत्यादि । पक्षमिति । सत्यत्वपक्षम् । मायामात्रमिति ।

वैदिके निघण्टौ प्रज्ञानामसु 'माया, वयुनम्, अभिख्ये'ति पाठादर्थशून्यः प्रत्ययो माया, तदात्मकमिति भास्कराचार्याः ।

मायाशब्दो ह्याश्चर्यवाची । 'जनकस्य कुले जाता देवमायेव निर्मिते'त्यादिषु तथा दर्शनात् । 'न तत्र रथा' इत्यत्रापि सकलपुरुषानुभाव्यतया न भवन्ति । 'अथ रथान् सृजत' इत्यपि स्वप्नदृगनुभाव्यतया तत्कालमात्रावसानात् सृजत इत्याश्चर्यरूपत्वमुपपद्यते । न हीदृशी सृष्टिर्जीवेन कर्तुं शक्या । संसारदशायां जीवस्य कार्त्स्न्येन अनभिव्यक्तस्वरूपत्वात् तादृशसामर्थ्यायोगात् । अतः सा आश्चर्यात्मिकेति रामानुजाचार्याः ।

सिद्धान्ते तु सामर्थ्यविशेषो माया । अष्टमस्कन्धे 'नटवन्मूढ मायाभिर्मायेशान्नो जिगीषसी'ति । प्रथमस्कन्धे च 'अपश्यत् पुरुषं पूर्णं मायां च तदुपाश्रयाम् । यया सम्मोहितो जीव आत्मानं त्रिगुणात्मकम् । परोपि मनुतेऽनर्थं तत्कृतं चाभिपद्यत'इति कथनात् । अत ईश्वरस्य या व्यामोहिका शक्तिः, सा माया प्रकृते ज्ञेया । तन्मात्रं तदेकोपादानकम् । तेन बाह्योपादानादिव्यावृत्तिः । कृत्स्नत्वेनेति । देशः कालो विषयसन्निधिरिन्द्रियव्यापारो बाधाभावश्चेति कार्त्स्न्यम्, तेन । तथा चैन्द्रजालिकेन नटेन यथा सामाजिकव्यामोहेन कौतुकार्थं मायामात्रसृष्टिः क्रियते, तथेश्वरेण जीवव्यामोहनाद्यर्थं स्वप्नसृष्टिः क्रियत इति न तस्याः सत्यत्वमित्यर्थः ।

अत्र बहूनि मतानि ।

तत्र भास्कराचार्याः । पूर्ववासनावासितं शुभाशुभकर्मप्रेरितं नाडीषु परिवर्तमानं मनः स्मृतिज्ञानहेतुर्भवति । स एव स्मर्यमाणोऽर्थः प्रत्ययालम्बनः । 'यान्येव जाग्रत् पश्यति, तानि सुप्त' इति श्रुतेः । इयं च जीवसृष्टिः । सुखदुःखप्रतिभासनात् । नेश्वरस्य । 'य एष स्वप्ने महीयमानश्चरति एष आत्मे'ति श्रुतेरित्याहुः ।

तेन तन्मते जीवकर्तृका स्मर्यमाणार्थविषयप्रत्ययमात्रमेव स्वप्नसृष्टिरिति सिध्यति ।

रश्मिः ।

मायामात्रं तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात् ॥ ३ ॥ अर्थेति । अर्थो विषयः । विषयशून्यं ज्ञानम् । **तदात्मकमिति** । मात्रचोर्थः । **सामाजिकेति** । सामाजिकानां व्यामोहो येन नटेन । **मोहनादीति** । आदिनेष्टानिष्टसूचनम् । **पूर्वेति** । त्यक्तपूर्वापरानुसन्धानं यदादानं पदार्थस्य सा वासना । **स्मृतीति** । स्वाप्निकस्मृतिज्ञानयोर्हेतुः । **स एवेति** । पूर्ववासनावासितः । अन्यथाऽलौकिकं स्मर्यमाणं स्यादित्येवकारः । **प्रत्ययेति** । ज्ञानस्मृतिविषयः । **जाग्रदिति** । सप्तम्यालुक् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भाष्यप्रकाशः ।

भिक्षुस्तु । सन्ध्यसूत्रे, 'न तत्र रथा' इति श्रुतेः 'स्वप्ने च जीवः सुखदुःखभोक्ता स्वमायया कल्पितविश्वलोके' इति कैवल्योपनिषच्छ्रुतेश्चोदाहरणेन सृष्टिमङ्गीकृत्य, ततो निर्मातृसूत्रे स्वप्नसृष्टिमीश्वरकर्तृकामुक्त्वा, तर्हि 'स्वयं विहत्य स्वयं निर्माये'त्यन्यनिरपेक्षताबोधकस्य स्वयंपदस्य कथं सङ्गतिरित्याशङ्कायाम्, उपाधिद्वारकोपादानाभिप्रायेण स्वयंपदप्रयोग इति 'न तत्र रथा' इत्यत्रोक्तं जीवकर्तृत्वमपि 'पच्यते तण्डुलः स्वयमेवे'तिवदुपाधिद्वारकपरिणामस्वातन्त्र्यविवक्षयोपपन्नमित्युक्त्वा, ततो 'न तत्र रथा' इत्यत्रादृष्टद्वारा परम्परया गौणं कर्तृत्वं जीवस्योक्तम्, अतो न विरोध इति कस्यचिन्मतं चोक्त्वा, ततो ननु स्वप्ने ज्ञानमात्रमेवास्तु, किं तत्र सृष्टिकल्पनयेत्याशङ्कायामाह, स्वप्ने जाग्रद्वदेव पुत्रादयः प्रतीयन्ते, ते चात्मचैतन्यमात्रा भवितुं नार्हन्ति, नित्यतापत्तेः, स्वरूपचैतन्यस्य निराकारत्वाच्च, कर्मकर्तृविरोधेनैकस्य भास्यभासकतानुपपत्तेश्च, जाग्रत्पदार्थानामपि तथात्वापत्त्या विज्ञानवादिबौद्धमताभ्युपगमापत्तेश्च । यदि च बुद्धेर्घटाकारः परिणाम एव ज्ञानशब्देनोच्यते, तदा स एवास्माभिः स्वप्नसृष्टिरुच्यते । नैवमिष्यत इति विशेषः । स्वाप्नाः पदार्थाः बाह्या भवितुं न युक्ताः । बाधकं विना अन्तःस्थत्वांशे स्फुटप्रत्यक्षतांशे च बाधोत्तरमप्यनुभूयमाने भ्रमत्वकल्पनानौचित्यादित्याह । मायामात्रसूत्रे, स्वाप्ना विषया ऐन्द्रजालिकवत् परमेश्वरमायाकार्यतया मायामात्राः, न त्वभावस्वरूपास्तुच्छाः । 'नाभाव उपलब्धे'रिति सूत्रेणात्यन्तासत उपलब्धिनिषेधात् । ऐन्द्रजालिकेश्वरयोर्विशेषस्त्वियान्, यदैन्द्रजालिकस्य मन्त्रादि, ईश्वरस्तु माययैव व्यामोहयतीति तयैव मनसः परिणाममात्रमर्थं कटककुण्डलादिवन्निर्मिमीते । स्वाप्नविषये बुद्धिवृत्त्यतिरिक्ताकारा बुद्धिवृत्तिरेव मोहो भ्रम इत्यतस्मिंस्तद्बुद्धिर्भ्रम इत्यादिरूपं लक्षणमपि तुल्यमित्याद्याह ।

तेन तन्मते बुद्धिग्राह्यो मनःपरिणामविशेषः स्वप्नसृष्टिरिति सिध्यति ।

माध्वास्तु । सन्ध्यं स्थानं मायामात्रम्, मनोगतान् पूर्वानुभूतवस्तुसंस्कारानुपादानीकृत्य निमित्तभूतया स्वेच्छयैवेश्वरेण निर्मितम् । 'मनोगतांस्तु संस्कारान् स्वेच्छया परमेश्वरः । प्रदर्शयति जीवाय स स्वप्न इति गीयते' । 'यदन्यथात्वजाग्रत्त्वं सा भ्रान्तिस्तत्र तत्कृता । अनभिव्यक्तरूपत्वान्नान्यसाधनजं भवे'दिति ब्रह्माण्डवाक्यात् । अत्र स्वशिरश्छेदनादीनामसत्त्वनिरासायाना-

रश्मिः ।

स्वयमिति । जीवः । **अन्येति** । ईश्वरनिरपेक्षतेत्यादिः । **उपाधीति** । अदृष्टमुपाधिः । उक्तेश्वरकर्तृकत्वविरोधं परिहरन्ति स्म **न तत्रेति** । **पच्यत इति** । ईश्वरः जडजीवान् सृजति । यदा तु सौकर्यातिशयं द्योतयितुं कर्तृव्यापारो न विवक्ष्यते, कर्मणः कर्तृत्वं विवक्ष्यते, तदा सृज्यते जीवः स्वयमेवेति तन्मते उपाधिरणुत्वं तद्द्वारकपरिणामः सृष्टिरूपस्तस्मिन् स्वातन्त्र्यं कर्तृत्वं तस्य विवक्षयोपपन्नम् । **आहेति** । 'पुत्रादयश्चे'ति सूत्र आह **कर्मकर्त्रिति** । ज्ञानं कर्तृ तत्कथं कर्म आत्मचैतन्यमात्रं पुत्रादिरूपमिति विरोधः । कर्मकर्तृत्वसहानवस्थानलक्षणस्तेन । **एकस्येति** । ईश्वरस्य । **तथात्वेति** । आत्मचैतन्यत्वापत्त्या । **परिणाम एवेति** । एवकारः पदार्थयोगव्यवच्छेदकः । **स्फुटेति** । अयमंशः स्वाप्नः । जाग्रतश्च **बुद्धिवृत्तिरेवेति** । तामसी बुद्धिः, अतो गीतोक्तो मोहस्तस्या वृत्तिः । **इत्यादीति** । तदभाववति तत्प्रकारकं ज्ञानमादिशब्दार्थः । यद्वा । विशेषदर्शननाश्यत्वमादिशब्दार्थः । **इत्याद्याहेति** । ग्रन्थगौरवभियैतावतैव निर्वाहः । **मनःपरिणामेति** । मनोपि द्वारमित्येवमुक्तम् । जीवस्योपाधिद्वारकपरिणामविशेष इत्यर्थः । **माध्वाः** स्वप्नं सत्यमाहुः । तद्विषयकं ज्ञानं तु मिथ्येत्याहुः । अतो विषयपदव्याख्या क्रियते **अत्र स्वशिर** इत्यादि । **अनादीति** । अनादीति 'मनोगता'नित्यत्र विशेषणं दत्वानादिमनो-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अयमाशयः। श्रुतिः सृष्टिमेवाह, न तस्य सत्यत्वमपि। यथा 'ऐतदात्म्यमिदं सर्वं तत् सत्य'मिति 'आत्मानं स्वयमकुरुत' 'तत् सत्यमित्याचक्षते' 'कथमसतः सज्जायेते'त्यादिश्रुतिसहस्रेभ्योऽस्य सत्यत्वं प्रतीयते, नैवं स्वप्नप्रपञ्चस्य श्रुतिराह। सत्यप्रयोजनाभावाच्च। स्वमात्रविहारस्तु महामायावित्वान्माययापि सिध्यति।

भाष्यप्रकाशः।

दिमनोगतग्रहणम्। 'यदन्यथात्व'मित्यादिना च स्वप्नविषयाणां जाग्रत्पदार्थत्वमेव बाध्यत इति तत्प्रतीतिरेव भ्रान्ता, न स्वप्नप्रतीतिरित्याहुः।

तेन तट्टीकाकारमते संस्काराणामुपादानत्वम्, भाष्यकारमते तु संस्काराणामेव विषयत्वम्। मायापदं च मनसः संस्कारस्य वा वाचकमिति सिध्यति।

तत्र सूत्राशयं स्फुटीकुर्वन्तः स्वप्नसृष्टेः सत्यत्वं प्रथमं निरस्यन्ति अयमाशय इत्यादि। अस्येति। बाह्यप्रपञ्चस्य। अत्र च सत्यत्वं जाग्रत्क्रियमाणा या तत्तत्प्रतिनियता यावदर्थक्रिया तत्कारित्वं विवक्षितम्। न तु साक्षात् परम्परया वा ब्रह्मोपादानकत्वमात्रम्। परम्परया ब्रह्मोपादानकत्वस्य मायामात्रेपि सत्त्वात्। नाप्यर्थक्रियाकारित्वमात्रम्। तस्य प्रतिबिम्बादिष्वपि दर्शनात्। 'छायाप्रत्याह्वयाभासा असन्तोऽप्यर्थकारिण' इति भगवद्वाक्याच्च। नैवमिति। न सत्यत्वं ब्रह्मात्मकत्वं वा। तथाच तादृशश्रुत्यभावेपि भगवत्कर्तृकत्वादाश्चर्यरूपत्वाच्च यः सत्यत्वाग्रहः, सोऽसङ्गत इत्यर्थः। ननु सत्यत्वस्याश्रावितत्वेपि 'स वै नैव रेम' इत्यत्र सृष्टेर्विहारार्थत्वस्य श्रावितत्वात्तद्बलेन सत्यत्वं कल्प्यत इत्याशङ्कायामाहुः सत्येत्यादि। विभजन्ते स्वमात्रेत्यादि।

रश्मिः।

गतानां ग्रहणम्। **तत्प्रतीतिरि**ति। जाग्रत्पदार्थत्वप्रतीतिः। एवकारेण स्वप्नप्रतीतियोगव्यवच्छेदः। तथाच यत्स्वप्नविषयाणां जाग्रत्त्वं जाग्रत्पदार्थत्वं अन्यथात्वं सा भ्रान्तिः। **तत्र** स्वप्ने। **तत्कृता** जाग्रत्पदार्थसादृश्यकृता। अनभिव्यक्तत्वादिति सौत्रांशार्थः। **अनभिव्यक्ते**ति। अनभिव्यक्तरूपत्वात्स्वप्नस्य नान्येन जाग्रत्पदार्थसादृश्यान्येन साधनेन जन्यत इति भवेदित्यर्थः। **तट्टीके**ति। ब्रह्माण्डवाक्यातिरिक्ता टीका। ब्रह्माण्डवाक्यानि तु भाष्यमिति पूर्वं विवेचनीयम्। ब्रह्माण्डे 'संस्कारा'निति द्वितीया विषयार्थका। एवकारो ब्रह्माण्डवाक्यप्रामाण्यात्। **मायापद**मिति। 'मनोगतांस्तु संस्कारा'-नित्यत्र **वाचकम्**। मायामात्रपदं मनोमात्रं संस्कारमात्रं वेत्यर्थकम्। **भाष्ये**। देशकालवस्तुनानभिव्यक्तस्वरूपत्वपदार्थः। अन्यलभ्यत्वात्। केनापि रूपेणानभिव्यक्तम्। स्वरूपं तु स्वप्नदेशकालपरीक्षाबोधकशब्दलभ्यं पुराणे प्रसिद्धम्। तथा च हेतुतावच्छेदकगौरवापत्त्यानभिव्यक्तेरिति हेतुः। तदाहुः **तथाभिव्यक्ति**रिति। **तथे**ति। कार्त्स्न्येन। तथाच कार्त्स्न्येनानभिव्यक्त्यभाववत्वं हेतुतावच्छेदकम्। अत्राग्रे सहस्रशब्दाद्बहुवचनम्। संख्येयवाचकत्वात्। संख्यावाचकत्वे त्वेकत्वम्। 'विंशत्याद्याः सदैकत्व' इति कोशात्। **प्रकृते। सत्यत्वं** च त्रैकालिकाबाधविषयत्वम्। तच्च बाधित्वान्यल्लक्षणमाहुः **अत्र चे**ति। **जाग्र**दिति। जाग्रति क्रियमाणा। 'सहसुपे'ति समासः। **तत्त**दिति। घटादिप्रतिनियता जलाहरणादिरूपा, भोजनप्रयोजकत्वादिरूपा च। **यावदर्थक्रिया** यावदर्थाः यावद्घटादिवर्तमानकालं अर्था घटादयः तेषां क्रियार्थक्रिया। **सत्त्वा**दिति। माया ब्रह्मोपादानिकेति। **प्रतिबिम्बे**ति। आदिना छायाप्रत्याह्वयादिः। **मायये**ति। 'विष्णुर्नाम महायोगी महामायो महातपा' इति योगतत्त्वोपनिषच्छ्रुतेः। **स वा** इति। पुरुषविधब्राह्मणे। **सृष्टे**रिति। 'स द्वितीयमैच्छदि'त्यादिना।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नापि भिन्नः प्रपञ्चः। जीवस्यैकत्वात्। 'अविद्यया मन्यते' इति वचनान्न तत्सुख-

भाष्यप्रकाशः।

तथाच नटवन्माययापि विहारसम्भवान्न तद्बलेन सत्यत्वं कल्पयितुं शक्यमित्यर्थः। **ननु यत्र** स्वप्नसृष्टिस्थले 'तस्य वा एतस्य पुरुषस्ये'ति जीव एवोपक्रान्तः, 'प्रस्वपिती'ति स्वापलिङ्गाच्च बोधितः, अतस्तत्कृता सा मिथ्यास्तु, तत्र विहारोपि जीवस्यैव, नेश्वरस्य, काठके तु प्रकरणलिङ्गवाक्य-शेषैः परमात्मैव प्रतीयत इति तत्कृतः प्रपञ्चो भिन्नोऽस्तु, तस्य सत्यत्व आश्चर्यरूपत्वे च को दोष इत्यत आहुः **नापीत्यादि**। यो हि प्रपञ्चो भिन्न आपाद्यते, स न सर्वसाधारणः, कात्स्न्र्येनाभि-व्यक्तस्वरूपो वा, येन भिन्नत्वं कल्पयितुं शक्येत, किन्तु यदेकेन दृश्यते, तन्नेतरेणेति प्रतिनि-यतो द्रष्टुर्जीवस्यैकत्वात्, अतो न भिन्नः। किञ्च। स यदि भिन्नः सत्यः स्यात्, तदा तद्भोगोपि भिन्नः सत्योऽनुभूयेत, श्रुत्या बोच्येत। श्रुत्या तु जीवस्य भोगस्तत्राज्ञानिक एव बोध्यते। हिताख्या नाडीरुपक्रम्य 'अथ यत्रैनं घ्नन्तीव जिनन्तीव हस्तीव विच्छाययति गर्तमिव पतति यदेव जाग्रद्भयं पश्यति तदत्राविद्यया भयं मन्यत' इति वचनात्। एवमेव 'अथ यत्र राजेव देव इवे'त्यादिनोक्तं सुखमप्याज्ञानिकम्। 'अविद्यया मन्यत' इत्यस्य देहलीदीपवदुभयत्र सम्बन्धात्। काठके तु न भोगवचनम्।

अतः परं भेदसाधकत्वेन कर्तृभेदोऽवशिष्यते। सोऽप्ययुक्तः। स्वप्नसृष्टिवाक्येपि जीवकर्तृ-त्वाबोधनेन तदभावात्। तत्र हि 'आत्मज्योतिरेवायं पुरुष' इति कथनोत्तरं 'कतम आत्मे'ति प्रश्ने,

रश्मिः।

जीव एवेति। एवकारः 'कतम आत्मेति, योयं विज्ञानमयः प्राणेष्वि'त्युपक्रमे विज्ञानमयपदात्। **जीवस्यै-वेति**। एवकार उपक्रमादीश्वरयोगव्यवच्छेदकः। **काठके त्विति**। तुना ज्योतिर्ब्राह्मणं व्यावर्त्यते। प्रकरणं ब्रह्मणः। 'हन्त त इदं प्रवक्ष्यामि गुह्यं ब्रह्म सनातन'मित्युपक्रमात्। 'सुप्तेषु जागर्ती'ति लिङ्गम्। शब्दस्य सामर्थ्यम्। स्वप्नो जीवावस्था, जागर्तीति ब्रह्मलिङ्गम्। 'तदेदं शुक्रं तद्ब्रह्मे'ति वाक्यशेषः। उपक्रमः यथा 'मरणं प्राप्य आत्मा भवति गौतम' इति जीवलिङ्गं च सन्देहबीजम्। तेन स्वप्नकर्ता जीवः परमात्मा वेति संशय उक्तवाक्यशेषः प्रवर्तते। तैः। परमात्मैवेत्येवकारः 'यस्मिंल्लोकाः श्रिताः सर्वे' इति श्रुतेः। **जीवस्येति**भाष्यं विवृण्वन्ति स्म **यो हीति**। काठकोक्तो हि। **भिन्नः** ज्योति-र्ब्राह्मणोक्ताद्भिन्नः। **आपाद्यत** इति। यदि प्रपञ्चो भिन्नो न स्यात्, प्रकरणलिङ्गवाक्यशेषाः परमा-त्मनो न स्युरिति। अतः काठके ज्योतिर्ब्राह्मणे प्रपञ्चो भिन्न इत्यापद्यते। **स** इति। स्वाप्निकः प्रपञ्चः। **न भिन्न** इति। ज्योतिर्ब्राह्मणोक्तात्काठकोक्तः प्रपञ्चो न भिन्नः। **अविद्ययेति** भाष्यं विवृण्वन्ति स्म **किञ्चेति**। **तत्राज्ञानिक एवेति**। **तत्र** स्वप्ने। **आज्ञानिक** आविद्यकः। **एवेति**। बाधात्। **हिताख्येति**। ज्योतिर्ब्राह्मणे। अर्थस्तु उक्तसुषुप्तावस्थाकामभगवतोरविद्यायाः स्वाप्निकायाः सम्बन्धो न स्वाभाविक इति दर्शयितुम्। 'ता वा अस्यैता हिता नाम नाड्यः' इत्यादिना नाडीनिरूपणम्। **अस्येति**। अकामभगवतो भेदे षष्ठी। अतोऽविद्यानाडीभिन्नाः स्वाप्निक्यः। ता उपक्रम्य 'अथ यत्रैन'मित्यादिग्रन्थः। पूर्वं 'न कञ्चन स्वप्नं पश्यती'त्युक्तम्, तत्र प्रतियोगि स्वप्नं निरूपयन्ति स्म। यत्र स्वप्ने एनं स्वप्नसदृशं घ्नन्तीव तस्करादयो ये केचन जिनन्तीव वशीकुर्वन्तीव दासरूपेण। कदा-चिद्धस्तीव विच्छाययति विच्छादयति, विद्रावयति। तथा गर्तं जीर्णकूपादिकं प्रति पततीव, न वस्तुतः। किं तत इत्यत आह **यदिति**। यदेव जाग्रत् जाग्रतः सम्बन्धि भयं पश्यति। षष्ठ्या लुक्। अन्ये तु जाग्रत् जागरित इति सप्तम्यालुक् सूचयन्ति। तदत्र स्वप्ने इति। अग्रे स्पष्टम्। **कर्तृभेद इति**।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

दुःखभोगार्थमपि सत्यत्वमङ्गीकर्तव्यम् । स्थानद्वयप्रतिज्ञा च विरुध्येत । 'जीवतो मृतांश्च पश्यती'ति लोकद्वयदर्शनम् । अतो लोकद्वयप्रतिच्छायरूपत्वान्मायया क्रीडायामन्यानुरोधाभावेनातिसुखत्वात् भगवत्कृतमात्रवाचकत्वाच्च श्रुतेरतिरि-

---

भाष्यप्रकाशः ।

'योऽयं विज्ञानमयः पुरुषः प्राणेषु हृद्यन्तर्ज्योति'रिति प्रतिवचनं दत्वा, तादृशत्वं जीवस्याप्यस्तीति तन्निराकरणार्थं 'स समानः सन्नुभौ लोकौ सञ्चरती'त्यादिना जीवतुल्यतया क्रीडितुरन्यस्य कथनेन तस्मिन्नेव तत्कर्तृत्वस्य 'सुषुप्त्युत्क्रान्त्योर्भेदेने'ति सूत्रे व्यवस्थापितत्वात् । जीवस्य स्वदुःखभयादिजनकसृष्टिकरणायोगाच्च । कात्स्न्र्येनानभिव्यक्तस्वरूपतया सत्यसङ्कल्पत्वाद्यभावाच्च । अतस्तत्र भगवानेव कर्ता । जीवस्त्वविद्यया दुःखादिकमिव कर्तृत्वमपि मन्यते । अतो न तत्सुखदुःखभोगार्थमपि स्वप्नप्रपञ्चस्य सत्यत्वमङ्गीकर्तव्यम् । किञ्च । यदि स्वाप्नप्रपञ्चस्य सत्यत्वं स्यात्, तदा 'तस्य वा एतस्य पुरुषस्य द्वे एव स्थाने भवत इदं च परलोकस्थानं चे'ति श्रुत्युक्ता स्थानद्वयप्रतिज्ञा च विरुध्येत ।

ननु तत्रैव 'सन्ध्यं च तृतीयं स्थानं तस्मिन् सन्ध्ये स्थाने तिष्ठन्नुभे स्थाने पश्यतीदं च परलोकस्थानं चे'ति तृतीयमप्युक्तम् ।

सत्यमुक्तम्, परं तूभयविलक्षणतया, तत्र च लोकद्वयदर्शनं जीवतां मृतानां च दर्शनेन । न हि ते तत्र सन्तीति प्रागेवोक्तम् । अतस्तृतीयत्वेपि लोकद्वयप्रतिच्छायरूपत्वान्न तेन प्रतिज्ञाविरोधः । सत्यत्वे स स्यादेव । नच किमीदृशसृष्ट्या क्रीडयेति शङ्क्यम् । मायया क्रीडायामन्यानुरोधाभावेनातिसुखत्वात् । अतो भगवत्कृतमात्रवाचकत्वात् काठकश्रुतेस्तद्बलेनातिरिक्तसत्यसृष्टिकल्पनायां प्रमाणाभावान्नातिरिक्तः स्वाप्नः प्रपञ्च इत्यर्थः ।

ननु कात्स्न्र्येनानभिव्यक्तत्वस्य जीवविशेषणत्वे 'न तत्र रथा' इति श्रुतेश्चाश्चर्यपरत्वे सति जीवदर्शनस्य भ्रान्तित्वात् किं वा स्वप्नस्य भवदभिमतमायामात्रत्वगमकम्, येन तत्कृतगुणदोष-

रश्मिः ।

ब्रह्मजीवरूपस्वप्नकर्तृभेदः । **प्राणेष्विति** । सामीप्यसप्तमीति केचित् । सूक्ष्मदेह इति व्याख्यातम् । **तादृशत्वं** विज्ञानमयत्वम् । **स समान** इति । स ईश्वरः समानो जीवसमानः । **अन्यस्येति** । ईश्वरस्य । **तस्मिन्नेवेति** । ब्रह्मण्येव, नतु जीवे । बलवदनिष्टाननुबन्धीष्टतासाधनज्ञानप्रवर्तकं तत्कृष्णसम्बन्धीत्याहुः **जीवस्य स्वेति** । **तत्रेति** । स्वप्ने । भगवानेव, नतु जीव इति जीवयोगव्यवच्छेदक एवकारः । **मन्यत** इति । अहं कर्तेत्यभिमन्यते । 'परात्तु तच्छ्रुते'रिति सूत्रात् । **स्थानद्वयेति**भाष्यं विवृण्वन्ति स्म **किञ्चेति** । **जीवत** इत्यादिभाष्यं विवृण्वन्ति स्म **ननु तत्रैवेति** । बृहदारण्यक एव । काठकव्यवच्छेदक एवकारः । इदंलोकपरलोकस्थाने **उभे स्थाने** । **नहि ते तत्रेति** । सन्ध्ये स्थाने मृताः सन्ति । मुक्तानामैक्येऽमुक्तानां सकर्मत्वेपि पृथग्दर्शनानर्हत्वेन परलोके सत्त्वात् । **प्रागेवेति** । 'सन्ध्यं तृतीयꣳ स्वप्नस्थानमिति, तस्मिन्सन्ध्ये स्थाने तिष्ठन्नुभे स्थाने पश्यतीदं परलोकस्थानं चे'त्यस्याः प्रागेवोक्तम् । उभयविलक्षणतयेत्युक्तं विशदयन्तो **लोके**तिभाष्यं विवृण्वन्ति स्म **अतस्तृतीयत्व** इति । 'जीवतो मृतांश्च पश्यती'ति लोकद्वयप्रतिच्छायरूपत्वात् लोकद्वयसूक्ष्मरूपत्वात् । **न तेनेति** । न तृतीयेन द्वयप्रतिज्ञाविरोध इत्यर्थः । **स** इति । प्रतिज्ञाविरोधः । **माययेति**भाष्यं विवरीतुं शङ्कते **नचेति** । **अन्येति** । विषयानुरोधाभावेन मिथ्यात्वादिति भावः । **भगवत्कृते**तिभाष्यं विवृण्वन्ति स्म

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

त्ककल्पनायां प्रमाणाभावाज्ज्योतिःशास्त्रनियमाभावाच मायामात्रमेव स्वप्न इति न तत्कृतगुणदोषसम्बन्धः। दीक्षितस्यान्नभोजनादिप्रायश्चित्तं तु भगवत्क्रीडायामपि प्रतिच्छायत्वात् क्रियते । तदानीं कर्तृत्वस्यारोपात् । अन्यदा कर्तृत्वस्याशास्त्रत्वान्न धर्माधर्मजनकत्वम् । देवताज्ञादिस्तु जीवब्रह्मणोर्विद्यमानत्वाद्युक्ता ।

भाष्यप्रकाशः ।

सम्बन्धो नाङ्गीक्रियते इत्याशङ्कायामाहुः **ज्योतिरित्यादि** । मेषादिराशिगे सूर्ये एतावद्दिनम्, एतावती रात्रिः, अस्मिन् देशे चेत्यादिनियमस्य तत्राभावात् तथेति न तत्कृतगुणदोषसम्बन्ध इत्यर्थः ।

ननु यदि स्वप्नप्रपञ्चो मिथ्या, तदा दीक्षितेन स्वप्नेऽन्नभोजनादौ कृते यद्दीक्षितस्य प्रायश्चित्तविधानं तद्विरुध्येत, मिथ्याभूते भोजनादौ तदयोगादित्यत आहुः **दीक्षितस्येत्यादि** । यद्यपि तत्र भोजनम्, तथापि स्वामिक्यां भगवत्क्रीडायां भोजनसदृशत्वात् तदानीं जीवेपि कर्तृत्वस्याविद्ययारोपात् प्रायश्चित्तं क्रियते । यथा व्रीह्यभावेपि नीवारेण कार्यसिद्धिः, तद्वदत्रारोपितकर्तृत्वमादायाप्यपराधसिद्धेः । शास्त्रेण यज्ञकर्मण्येव कर्तृत्वे नियमिते निषिद्धेष्वाभिमानिककर्तृत्वस्यापि दोषत्वादिति । अतो न तेन तस्य सत्यत्वसिद्धिरित्यर्थः । एतदुपष्टम्भाय युक्त्यन्तरमाहुः **अन्यदेत्यादि** । तथाच यदि सा सत्या स्यात्, तदा तेनान्यदापि धर्माधर्मौ स्याताम् । तथा सति 'स्वप्नेष्वगम्यागमनं च धन्य'मित्यादिकं न स्मर्येतेति सा मिथ्यैवेत्यर्थः ।

ननु यदि स्वप्नः सर्वोपि मिथ्या स्यात्, तदा तत्र देवतादर्शनाज्ञादिकं न स्यात्, भवद्वानुभवादिविसंवादि स्यादित्यत आहुः **देवतेत्यादि** । जीवा इन्द्रादयो योगोत्थसामर्थ्याः, ब्रह्म स्वत एवातिसमर्थम् । अतः समाधाविव स्वप्नेऽप्यन्तर्हृदि प्रविश्य विद्यमानत्वाद्दर्शनाज्ञादिकं ददाति, तदानीं बुद्धिर्जागर्तीति स्वप्नद्रष्टा जीवोप्यनुभवति । तेन तस्य तदानीं रथादिवत् करणाभावेन स्वप्नत्वाभावात्तत्सत्यता युक्ता । किञ्च । तत्र यज्ज्ञानं जायते, तन्न लौकिकम्, तत्तदि-

रश्मिः ।

अतो भगवदिति । **तद्बलेनेति** । भगवत्कृतमात्रवाचकशब्दबलेन । **सूर्ये इति** । सप्तम्यन्तम् । **एतावत्** त्रिंशद्घटिकापलचतुःपञ्चाशद्दिनम्, **एतावती** एकोनत्रिंशद्घटिकापलषट्[1] [रात्रिः] । आदिना वृषेर्के द्वात्रिंशद्घटिकापलचतुर्विंशदिनम् । ऐकोनत्रिंशद्घटिकापलषड्विंशरात्रिर्यथा । **देश इति** । ब्रह्मावर्तादौ । **तत्रेति** । स्वप्ने । **तथेति** । मायामात्रत्वम् । **अन्नेति** । आदिना रेतःस्रावः । **आरोपादिति** । ब्राह्मस्य कर्तृत्वस्य । **यज्ञकर्मण्येवेति** । एवकारेण स्वप्नयोगव्यवच्छेद(कः) क्रियते । **निषिद्धेष्विति** । स्वप्नाचार्याज्ञाविश्वासादिषु । **तेनेति** । आरोपितकर्तृत्वेन । **तस्य स्वप्नस्य** । **सेति** । स्वप्नसृष्टिः । **अन्यदेति** । दीक्षान्यकाले । भोजनकर्तृत्वेऽस्य न विद्यते शास्त्रं यस्मिन् तादृशत्वात् । **धर्माधर्मजनकत्वं** गुणदोषजनकत्वम् । **देवतेति** । आदिना बाहुना मेलनम् । **अनुभवादीति** । आदिनाप्तवाक्यम् । **स्वत एवेति** । उपाधिव्यवच्छेदकैवकारः । **बुद्धिरिति** । स्वप्नग्राहिका । **तस्येति** । दर्शनाज्ञादिकस्य । **रथादिवदिति** । आदिनाऽविद्या । करणाभावे हेतुरनुभवतीत्यनुभव उक्तः । अत उक्तं **करणाभावेन** । **तत्सत्यता** दर्शनाज्ञादेः सत्यता । **अलौकिकेति**भाष्यं विवृण्वन्ति स्म **किञ्चेति** ।

---

१. अष्टाविंश ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अलौकिकज्ञाने हि प्रतिच्छायत्वात् संवादः । क्वचिद्भगवदावेशे ईषत्संवादोपि । तस्मात् स्वतन्त्रसत्यतायां प्रमाणाभावान्मायामात्रं स्वप्नप्रपञ्च इति सिद्धम् ॥ ३ ॥

सूचकश्च हि श्रुतेराचक्षते च तद्विदः ॥ ४ ॥

ननु तर्हि जीवसाक्षिकमेकदेशेन किमिति सृजति, तत्राह । सूचकः शुभा-

---

भाष्यप्रकाशः ।

न्द्रियाजन्यत्वात् । किन्त्वात्मज्योतिषैव जायमानत्वादलौकिकम् । तस्मिंश्च ज्ञाने प्रतिच्छायरूपं सर्वं भासत इत्युपपादितम् । अतः प्रतिबिम्बवदस्यासत्त्वं चेदङ्गीक्रियते, तदा तद्वदेवा-स्याप्यर्थक्रियाकारित्वरूपः संवाद उपपन्नः । किञ्च । यथा प्रतर्दनाख्यायिकायामिन्द्रे भगवदावेशे सति तेन स्वोपासनाद्युक्तम्, तथात्रापि क्वचिद्भगवदावेशे सति ज्ञाने क्रियायां चोत्कर्षरूप ईषत्संवादो भवति । स च भगवदावेशस्यैव धर्मः, न तु स्वप्नस्येति तावतापि न स्वप्नस्य सत्यत्वसिद्धिरित्यर्थः । सिद्धमाहुः तस्मादित्यादि ।

ननु भवत्वेवं स्वप्नस्यासत्यत्वम्, तथापि तस्य जीवकर्तृकत्वं न प्रतिक्षेप्तुं शक्यम्, कैवल्यो-पनिषदि 'स्वप्ने च जीवः सुखदुःखभोक्ता स्वमायया कल्पितविश्वलोक' इति जीवमायाकल्पितत्व-कथनात्, श्रीभागवते च 'यथा शयानः पुरुषो मनसैवात्ममायया। सृष्ट्वा लोकं परं स्वाप्नमनुविश्या-वभासत' इति स्वाप्नस्रष्टृत्वकथनाच्चेति चेत् । न । श्रुतेर्ब्रह्मप्रकरणस्थत्वेन 'स्वमायये'त्यत्र 'स्वमपीतो भवती'तिवत् स्वपदेन ब्रह्मण एव परामर्षणीयत्वात् । जीवकर्तृत्वे स्वप्रतिकूलसृष्टिकरणविरोधरूपस्य बाधकस्य प्रागेवोक्तत्वात् । जीवपरामर्षपक्षेपि कल्पितपदेनाज्ञानिकमेव कर्तृत्वमायाति, न तु ब्रह्म यथा नटवज्ज्ञानपूर्वकं करोति तथा । आज्ञानिकं तु तत् ब्रह्मकृतौ स्वकृतत्वाभिमान एव पर्य-वस्यतीति तेन तदसिद्धेः । श्रीभागवतवाक्यं तु न स्वप्नसृष्टिकर्तारं निर्णेतुं प्रवृत्तम्, किन्तु तद्दृष्टान्तेन ब्रह्मणः स्रष्टृत्वमनुप्रविष्टत्वं च बोधयितुम् । दृष्टान्तस्तु परप्रसिद्ध्यापि भवतीति तमादाय जीवस्य स्वाप्नपदार्थस्रष्टृत्वं वदति, तत्राभिमानिककर्तृत्वाङ्गीकृतावपि बोधनसिद्धेर्न दृष्टान्तस्य बाध इति तेनापि तदसिद्धेः । तस्मात् पूर्वोक्तमनवद्यम् ॥ ३ ॥

सूचकश्च हि श्रुतेराचक्षते च तद्विदः ॥ ४ ॥ सूत्रमवतारयन्ति नन्वित्यादि । यदि

रश्मिः ।

उपपादितमिति । अतो लोकेतिभाष्यव्याख्याने उपपादितम् । क्वचिदितिभाष्यं विवृण्वन्ति स्म किञ्च । यथेति । स्वोपासनादीति । 'मामेवोपास्स्वे'ति । आदिना 'मामेवात्मानं जानीही'ति । अत्रापीति । स्वप्नेपि । ईषदिति । यथोपायाः । यथा वा गोपीनाम् । 'ता हि स्वप्ने सदा भगवन्तं पश्यन्ती'ति । ज्ञाने 'यत्पत्यपत्यसुहृदा'मित्यत्र । क्रियायां 'कृष्णोऽहं पश्यत गति'मित्यादौ । एवेति । स्वप्नव्यवच्छेदकः । तस्मादित्यादीति । स्वातन्त्र्यं व्यावहारिकत्वम्, न त्रैकालिकबाधविषयत्वम् । नापि शुक्तिरजतवद्विशेषदर्शननिवर्त्यत्वम् । ब्रह्मण एवेति । जीवयोगव्यवच्छेदकैवकारः । प्रागेवेति । अस्मिन्नेव सूत्रे । प्रातीतिकार्थाङ्गीकारत्वे त्वाहुः जीवेति । 'मृष तितिक्षाया'मिति मूर्धन्यान्तोऽपि धातुः । एवेति । स्वकृतत्वव्यवच्छेदक एवेति । तेन तदिति । स्वमायापदेन । स्वप्नस्य जीव(कर्तृ)कर्तृकत्वा-सिद्धेः । बोधयितुमिति । यथेतिशब्दादिति भावः । दृष्टान्तस्येति । भावप्रधानः । तेनापीति । श्रीभागवतवाक्येनापि स्वप्नस्य जीवकर्तृकत्वासिद्धेः ॥ ३ ॥

सूचकश्च हि श्रुतेराचक्षते च तद्विदः ॥४॥ तत्तदिति । 'साक्षी चेता केवलो निर्गुणश्चे'ति

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

शुभफलसूचको भवति स्वप्नः । चकारात् कचिदाज्ञाविशेषदानम् । कलिकालादेः प्रत्यक्षे बाधकत्वात् । युक्तश्चायमर्थः । प्रातःसूचकफलस्यैव दृष्टत्वात्, न तु स्वप्नपदार्थस्य । सूचकत्वे प्रमाणमाह । 'यदा कर्मसु काम्येषु स्त्रियं स्वप्नेषु पश्यति । समृद्धिं तत्र जानीयात् तस्मिन् स्वप्ननिदर्शन' इत्यादिश्रुतेः । किञ्च । आचक्षते च तद्विदः । स्वप्नाध्यायविदस्तथैवाचक्षते । 'आरोहणं गोवृषकुञ्जराणा'मित्यादिना । तस्मात् सूचनार्थं जीवप्रदर्शनमिति ॥ ४ ॥

भाष्यप्रकाशः ।

स्वक्रीडार्थं सृजति, तर्हि तत्तज्जीवसाक्षिकं पदार्थैकदेशेन द्रव्यशून्यधर्ममात्रेण कुतः सृजतीत्यर्थः । व्याकुर्वन्ति सूचक इत्यादि । आज्ञाविशेषदानमिति । तथाच तेनापि तस्योत्कर्षसूचक इत्यर्थः । अयमिति । सूचकत्वादिरूपः । तत्र हेतुः । प्रातरित्यादि । पदार्थस्येति । असत्यत्वादिति शेषः । इत्यादिश्रुतेरिति । आदिपदेन 'पुरुषं कृष्णं कृष्णदन्तं पश्यति स एनं हन्ती'त्याद्यशुभसूचकश्रुतेः संग्रहः । शेषं स्फुटम् । एतेन 'मन एव मनुष्याणां पूर्वरूपाणि शंसती'त्यादि, 'परिणमति फलोक्तिः स्वप्नचिन्ता स्ववीर्यै'रित्यादि च सर्वं सूचितं ज्ञेयम् । तेन ये स्वाप्नमतितुच्छमभ्युपगच्छन्ति, तन्निरस्तं वेदितव्यम् । तादृशस्य खपुष्पादितुल्यत्वे तदभानप्रसङ्गेन सूचकताया वक्तुमशक्यत्वादिति ॥ ४ ॥

रश्मिः ।

श्रुतेः तत्तज्जीवसाक्षिकम् । पदार्थौ तयोरेकदेशेन शब्देन ज्योतिषा द्रव्यशून्यधर्मः ज्योतिर्मात्रं तेन । तस्येति । पदार्थशून्यज्योतिषः । भाष्ये । कचिदित्युक्तेर्हेतुमाहुः कलीति । आदिना पापम् । आज्ञादिविशेषदानं प्रत्यक्षे । 'कलिनाऽधर्मबन्धुने'ति वाक्यम् । 'नराणां क्षीणपापानां कृष्णे भक्तिः प्रजायत' इति वाक्यं च । प्रकृते । सूचकत्वादीति । आदिना कलिकालादेर्बाधकत्वम् । अशुभेति । मरणसूचकश्रुतेः । शेषमिति । तद्विद इति । बृहस्पत्यादयः । 'बृहस्पतिप्रणीतं च स्वप्नाध्यायं पठेदपी'ति ज्योतिषे दुःस्वप्नशान्तौ वाक्यात् । एवकारेण प्रकारान्तरव्यवच्छेदः । आरोहणमित्यादि । आदिना 'स्वप्नेष्वगम्यागमनं च धन्य'मिति । 'खरयानतैलाभ्यञ्जनान्यधन्यानी'ति च । जीवप्रदर्शनमिति । जीवाय प्रदर्शनम् । 'सह सुपे'ति समासः । एवं शेषं स्फुटम् । मन एवेति । उक्तश्रीभागवत 'मनोमात्रमिदं ज्ञात्वे'त्यादिवाक्यैर्मनोमयः प्रपञ्चः स्वाप्नः । प्रपञ्चरूपं मन एव । मनोमयत्वेतरयोगव्यवच्छेदकैवकारः । अत्र पक्षेऽन्ययोगाभावात् । पूर्वरूपाणि स्वप्नैः सुकृतित्वदुःकृतित्वादिरूपैः । शंसति । अयं पूर्वजन्मनि सुकृती, अयं पूर्वजन्मनि दुःकृतीत्येवम् । किञ्च, कर्मविपाके वैद्यके मनोमयदेहैः पूर्वरूपशंसनं प्रसिद्धम् । आदिना··········। किञ्च । देवताज्ञादिः स्वाप्निकः शब्दसृष्टिः, अतो न मिथ्या । वैदिक्याः सृष्टेः 'शब्द इति चे'दितिसूत्रे शाब्दीत्वात् । परिणमतीत्यादि । फलोक्तिः फलानामुक्तिः । 'येऽन्योन्यतो भागवताः प्रसज्य सभाजयन्ते मम पौरुषाणी'त्यादिवाक्योक्ता । 'कीदृशी सा स्वप्नचिन्ता । स्वप्नेषु चिन्तनं यया ।' सा स्ववीर्यैः कीर्तनभक्तिजसामर्थ्यैः प्रेमलक्षणभक्त्यादिभिः परिणमति । तात्त्विकान्यथाभावं स्वप्ने देवताज्ञादिरूपं करोति । सूचितमिति । स्वप्ने मिथ्यायुक्ताभ्यां पदार्थाभ्यां सूचितम् । य इति । नास्तिकभेदाः । अतितुच्छमिति । चन्द्रादिद्वैताभासम् ॥ ४ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ ॥ ५ ॥

किञ्चिदाशङ्क्य परिहरति । ननु जीवाय भगवान् सृष्टिं करोति, प्रदर्शयति च स्वस्य सर्वलीलाम्, अंशश्चायम्, कथमस्य दुःखित्वमित्याशङ्क्य, परिहरति तुशब्दः । अस्य जीवस्यैश्वर्यादि तिरोहितम् । तत्र हेतुः पराभिध्यानात् । परस्य भगवतोऽभितो ध्यानं स्वस्यैतस्य च सर्वतो भोगेच्छा, तस्मात् । ईश्वरेच्छया जीवस्य भगवद्धर्मतिरोभावः । ऐश्वर्यतिरोभावादीनत्वं पराधीनत्वम्, वीर्यतिरोभावात् सर्वदुःखसहनम्, यशस्तिरोभावात् सर्वहीनत्वम्, श्रीतिरोभावाज्जन्मादिसर्वापद्विषयत्वम्, ज्ञानतिरोभावादेहादिष्वहंबुद्धिः सर्वविपरीतज्ञानं चापस्मारसहितस्येव, वैराग्यतिरोभावाद्विषयासक्तिः । बन्धश्चतुर्णां कार्यः, विपर्ययो द्वयोः, तिरोभावादेवैवम्, नान्यथा । युक्तोऽयमर्थः । एकस्यैकांशप्राकट्येपि तथाभावात् ।

भाष्यप्रकाशः ।

पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ ॥५॥ सूत्रमवतारयन्ति किञ्चिदित्यादि । तुशब्दार्थकथनमुखेन तद्विभजन्ते नन्वित्यादि । परिहारं व्याकुर्वन्ति अस्य जीवस्येत्यादि । चतुर्णामिति । ऐश्वर्यादिचतुष्टयतिरोभावानाम् । विपर्ययो द्वयोरिति । अन्यथाज्ञानं ज्ञानवैराग्यतिरोभावयोः कार्यमित्यर्थः । तत इत्यादिकं व्याकुर्वन्ति तिरोभावादेवैवम्, नान्यथेति । ऐश्वर्यादितिरोभावादेव बन्धविपर्ययौ, न तु स्वत इत्यर्थः । युक्तत्वं विवृण्वन्ति एकस्येत्यादि । 'युक्तं भगैः स्वै'रित्यादिवाक्यात् पूर्णा ऐश्वर्यादयो भगवत्येव । तन्मध्ये एकस्यैश्वर्यादेरेकांशप्राकट्येपि 'यत्पादपङ्कजे'त्यादिवाक्यैस्तथानिश्चयेन बन्धाभावात् । तदभावादेव बन्धविपर्ययाविति युक्तमित्यर्थः । नन्वानन्दांशतिरोभावादेवैतद्द्वयं कुतो न स्वीक्रियत इत्यत आहुः

रश्मिः ।

पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ ॥ ५ ॥ **तुशब्दार्थेति** । आशङ्कापरिहारस्तुशब्दार्थः । तत्कथनोपायेनेत्यर्थः । **नन्वित्यादि** । **जीवायेति** । भक्ताय साधारणाय च । लीलाशब्देन स्वप्नदर्शने यथा तथेत्युक्तम् । **स्वस्यैतस्येति** । यथा गोकुलाष्टके तथा । शृङ्गाररसमण्डने च । असुक्तत्वदशायाम् । स्वस्योत्कर्षेण जीवस्य निकृष्टत्वेन च सर्वतो भोगेच्छा । **भगवद्धर्मेति** । उच्चनीचभावाय । समत्वे लीला न स्युः । **दीनत्वमित्यादि** । अन्यानुरञ्जनाभावात् । **पराधीनत्वं** परोक्तकरणात् । **सर्वदुःखेति** । अनुभवसिद्धम् । **सर्वहीनत्वमिति** । 'यथा वृक्षस्य संपुष्पितस्य दूराद्गन्धो वात्येवं पुण्यस्य कर्मणो दूराद्गन्धो वाति, यथासिधारां कर्तेव हि तामवक्रामेयद्युवे युवे ह वा विह्वयिष्यामि कर्तं पतिष्यामीत्येवममृतादात्मानं जुगुप्सेत्' । अत्र कर्मगन्धो यशः । स्वधर्माभावात्सर्वहीनत्वम् । **जन्मादीति** । लक्ष्म्यभावं श्र्यभावो ज्ञापयति । लक्ष्म्यभावात्सत्कर्माभावेन जन्मादि । आदिना स्वार्थात्प्रच्यवः । **अहंबुद्धिरविद्यारूपा** । **एवेति** । स्वतो योगव्यवच्छेदकः । **बन्धेति** । दीनत्वादिर्बन्धोऽहंबुद्ध्यादिः स्वरूपविपर्ययः तौ । **युक्तत्वमिति** । सौत्रहिशब्दार्थम् । **भगवत्येवेति** । एवकारेण जीवयोगव्यवच्छेदः । **यत्पादेति** । आदिना 'वञ्चितोहं महाराज हरिणा बन्धुरूपिणा । येन मेऽपहृतं तेजो देवविस्मापनं मह'दिति प्रथमस्कन्धोक्तम् । **तथेति** । अस्यार्थो निश्चयेन बन्धः तस्याभावात् । **तदभावादिति** । बन्धाभावाभावाद्बन्धरूपात् । **एवेति** । इतरयोगव्यवच्छेदकः । नच बन्धाद्बन्धविपर्ययौ न स्यातामिति चेत् । न । बन्धविपर्ययौ न बन्ध इति प्रयोगात्

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

आनन्दांशस्तु पूर्वमेव तिरोहितः, येन जीवभावः । अत एव काममयः । अकामरूपत्वादानन्दस्य । निद्रा च सुतरां तिरोभावकर्त्री भगवच्छक्तिः । अतोऽस्मिन् प्रस्तावे जीवस्य धर्मतिरोभाव उक्तः । अन्यथा भगवत ऐश्वर्यादिलीला निर्विषया स्यात् । तस्मान्न जीवस्वरूपपर्यालोचनया किञ्चिदाशङ्कनीयम् ॥ ५ ॥

देहयोगाद्वा सोपि ॥ ६ ॥

ईश्वरेच्छयैश्वर्यादितिरोभावं स्वमते निरूप्य, मतान्तरेणापि नियतधर्मवादेन निरूपयति । देहयोगाद्वा । देहसम्बन्धादेवास्य सर्वतिरोभावः । विपर्ययो वा । अपिशब्दादन्यत् । अस्मिन् पक्षे देहवियोग एव पुनरैश्वर्यादिप्राप्तिः । पूर्वस्मिन्

भाष्यप्रकाशः ।

आनन्देत्यादि । पूर्वमिति । व्युच्चरणकाले । द्विविधा हि जीवाः, सदा मुक्ताः, बन्धयोग्याश्च । तत्राद्याः सेवायोग्या इति तेषु स्वरूपानन्दमात्रस्यैव तिरोभावः, न धर्मरूपस्य तस्य, नाप्यैश्वर्यादेः । द्वितीयेषु यथायोग्यं सर्वेषां तिरोभाव इति निर्णयादिति । अत्र गमकमाहुः अत एवेत्यादि । नन्वत्रैतन्निरूपणस्य कः प्रसङ्ग इत्यत आहुः निद्रा चेत्यादि । तस्य प्रयोजनमाहुः अन्यथेत्यादि । सिद्धमाहुः तस्मादित्यादि । किञ्चिदिति । दुःखित्वानुपपत्त्यादिकम् ॥ ५ ॥

देहयोगाद्वा सोपि ॥ ६ ॥ सूत्रप्रयोजनमाहुः ईश्वरेच्छेत्यादि । व्याकुर्वन्ति देहेत्यादि । वाशब्दोऽवधारणे, अनादरे वा । सूक्ष्मदेहसम्बन्धादेवास्य सः आनन्दैश्वर्यादीनां तिरोभावो विपरीतज्ञानं वा । अपिशब्दादन्यद्बन्धदुःखादि । एतस्य पक्षस्य जघन्यत्वज्ञापनाय पक्षद्वयतारतम्यं

रश्मिः ।

कर्मतावच्छेदकभेदात् । व्युच्चरणेति । 'यथाग्नेः क्षुद्रा विस्फुलिङ्गा' इति श्रुतौ व्युच्चरणमुक्तम् । तत्र व्युच्चरणोत्तरं वियोगज आनन्दतिरोभावः । इदमुत्तरार्धे अष्टपञ्चाशत्तमाध्याये सत्यावाक्यं तदादिभिस्तन्मध्य इत्यादिरित्यन्वयः । तथाहि । द्वितीयस्कन्धनवमाध्यायवाक्यो'क्तेतरत्र चाध्रुवै'रत्राप्यैश्वर्यादेरंशप्राकट्यम् । तत्र सत्यायां दीनत्वपराधीनत्वाभावेनैश्वर्यस्यैकांशप्राकट्यम् । सर्वदुःखासहनेन वीर्यैकांशप्राकट्यमर्जुने । वाक्यं तूक्तम् । वियोगत्वेनानन्दतिरोभावत्वेन कार्यकारणभावात् । ननु नानन्दतिरोभावः, 'एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ती'तिश्रुतेः, अत आहुः द्विविधेति । बन्धयोग्या इति । सकर्मकाः । स्वरूपेति । एवकारो मात्रायोगव्यवच्छेदकः । निर्णयादिति । 'यत्पादपङ्कजे'त्यादौ निर्णयात् । अत एवेत्यादीति । काममय इति । 'काममयोऽयं पुरुष' इति श्रुतेः । अकामेति । 'सुषुप्तिस्त्वकामरूपो भगवा'निति 'सुषुप्त्युत्क्रान्त्योर्भेदेने'ति सूत्रभाष्यम् । 'सुषुप्तावानन्दभु'गिति नृसिंहतापनीये । मात्रारूपस्यापि तथानुभवात् । तथा चाकामरूपत्वं सुषुप्त्यानन्दस्य । तन्मात्रायाश्च । अत्रैतदिति । स्वप्ने षड्गुणतिरोभावनिरूपणस्य । निद्रा चेत्यादीति । षड्गुणैश्वर्यतिरोभावकर्त्री । अतोस्मिन् स्वाप्निके प्रस्तावे जीवस्य षड्गुणैश्वर्यतिरोभाव उक्तः । अन्यथेत्यादीति । स्वेतरस्मिन् जीवे एकस्यैश्वर्यादे रेकांशप्राकट्याभावे स्वप्ने तिरोभावाभावे । निर्विषयेति । अन्यविषयाभावात्तथा । दुःखित्वेति । आदिना ऐश्वर्यादितिरोधानानुपपत्तिः । क्रीडार्थत्वात् ॥ ५ ॥

देहयोगाद्वा सोपि ॥६॥ ईश्वरेच्छेत्यादीति । नियतधर्मव्यवच्छेदकैवकारः । नियतधर्मेति । स च समवायातिरिक्तविषयतासम्बन्धेनेच्छाधर्मोऽनियत इति नियतेन देहधर्मेण । सूक्ष्मदेहसम्बन्धादेवेति । एवकारोऽनियतधर्मेच्छायोगव्यवच्छेदकः । अपिशब्दादितिभाष्यं विवृण्वन्ति स्म अपि-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कल्पे विद्यमानेपीति विशेषः । न त्वीश्वरेच्छया विकल्पः ।

कश्चित् परशब्देन देहादिमाह । तदा अभिध्यानयोगयोराकस्मिकता स्यात् । 'सर्वस्य वशी सर्वस्येशान' इति विरोधश्च ।

कश्चित्तु तस्याभिध्यानात् 'तृतीयं देहभेद' इति श्रुत्यनुरोधेन जीवकर्तृका-

---

भाष्यप्रकाशः ।

स्फुटीकुर्वन्ति अस्मिन्नित्यादि । नत्वित्यादि । क्वचिदीश्वरेच्छया क्वचिद्देहयोगेनेति विकल्पो नात्राभिप्रेत इत्यर्थः ।

उक्तव्याख्यानदार्ढ्यार्थं व्याख्यानान्तरं दूषयितुमनुवदन्ति **कश्चित् परशब्देन देहादिमाहेति ।** देहारम्भकं कर्माहेत्यर्थः । इदं च न प्रसिद्धषड्भाष्यस्थम् । मध्वरामानुजशैवभिक्षुभिः पराभिध्यानपदे ब्रह्मकर्तृकाभिध्यानस्यैव व्याख्यानात् । अत इदानीमुत्सन्नस्यैव कस्यचिन्मतस्योल्लेखः । दूषयन्ति **तदेत्यादि । आकस्मिकतेति ।** निर्हेतुकता । तथाच देहारम्भकेन कर्मणा बन्धे विपरीतज्ञाने चाभ्युपगम्यमानेऽभिध्यानयोगयोर्निर्हेतुकतया तत्पदप्रयोगवैयर्थ्यं स्यात् । बन्धादेः कर्माद्यधीनत्वे ईश्वरस्य सर्वनियन्तृत्वभङ्गेन 'सर्वस्ये'त्यादिश्रुतिश्च विरुध्येतेत्यत उपेक्ष्यमित्यर्थः ।

शङ्करभास्कराचार्ययोर्मतमाहुः **कश्चित्त्वित्यादि ।** ऐकमत्यादेकवचनेनोल्लेखः । श्रुतिस्तु श्वेताश्वतरस्था । 'ज्ञात्वा देवं सर्वपाशापहानिः क्षीणैः क्लेशैर्जन्ममृत्युप्रहाणिः, तस्याभिध्यानात्तृतीयं देहभेदे विश्वैश्वर्यं केवल आप्तकाम' इति । अर्थस्तु, देवं ज्ञात्वा देवज्ञानेन सर्वेषां पाशानां बन्धकानां पुण्यपापादीनामपहानिर्दाहः, क्षीणैर्दग्धैः क्लेशैरविद्यास्मितादिभिर्जन्ममृत्युप्रहाणिः पुनः पुनर्जन्ममरणप्रवाहनिवृत्तिः, तस्याभिध्यानात् परमेश्वरविषयकाचिन्तनात् देहभेदे देहनिवृत्तौ, 'देहभेदै'रितिपाठे नानादेहैः, तृतीयं विश्वैश्वर्यम्, ऐहिकाचान्द्रादिलोकसम्बन्धिनश्चैश्वर्यादतिरिक्तं ब्रह्मलोकसम्बन्ध्यैश्वर्यं भवेदिति शेषः । ततः केवलो ब्रह्मभूत आप्तकामो भवतीति । 'तृतीयदेहभेदे' इति पाठे तु ऐहिकात् पारलौकिकाच्च तृतीयो ज्ञानिदेहस्तस्य निवृत्तौ सत्यां विश्वैश्वर्यं प्राप्य ब्रह्म-

रश्मिः ।

शब्दादिति । बन्धदुःखादीति । आदिना षड्गुणतिरोभावः । **अस्मिन्नित्यादीति ।** एवकारो विद्यमानदेहयोगव्यवच्छेदकः । **विद्यमाने इति ।** भगवान् व्यासः भगवान्नारद इति प्रयोगात् । **कर्माहेति ।** देहस्यादिः कर्म देहादिस्तम् । आदिशब्दो 'न नपुंसक'मिति पुंस्त्वम् । **ब्रह्मकर्तृकेति ।** 'परस्य ब्रह्मणोऽभितो ध्यानं सर्वतो रमणेच्छे'त्यत्र परस्येति कर्तरि षष्ठीति भावः । तत्तद्भाष्यादेवकारः । रामानुजभाष्यं यथा (पराभिध्यानात्परमपुरुषसंकल्पादिति) । **उत्सन्नस्यैवेति ।** उत्सन्नप्रच्छन्नशाखामूलत्वस्य स्मृतिषु प्रसिद्धेः । एवकारः प्रच्छन्नयोगव्यवच्छेदकः । जैमिनिबादरिकाशकृत्स्नौडुलोम्यादिमतानां भाष्येऽप्रच्छन्नत्वात् । एकदेशिमतं च 'अरूपवदेव हि तत्प्रधानत्वादि'तिसूत्रोक्तम् । अत आहुः **कस्यचिन्मतस्येति ।** कर्मपदोक्त्या जैमिनिमतमिति भवत्येवावधृतिः । **निर्हेतुकतयेति ।** बन्धविपरीतज्ञाने उत्पाद्य क्षीणशक्ति कर्म नाभिध्यानयोगयोर्हेतुतामर्हत्यतो निर्हेतुकतया । **प्रयोगेति ।** सूत्रद्वये प्रयोगद्वयस्य वैयर्थ्यं स्यादित्यर्थः । **सर्वस्येति**भाष्यं विवृण्वन्ति स्म **बन्धादेरिति ।** आदिना विपर्ययः । देहयोगश्च । **कर्मादी**त्यादिना इच्छा विद्या पूर्वप्रज्ञा चेति । 'ईश्वरेच्छयैवैश्वर्यादितिरोभाव'मित्याद्युक्तभाष्यात् । 'तं विद्याकर्मणी समन्वारभेते पूर्वप्रज्ञा चे'ति श्रुतेश्च । **उल्लेख इति ।** शङ्करभास्कराचार्ययोरुल्लेखः **कश्चिदिति**शब्देन । **अविद्यास्मितेति ।** 'अविद्यास्मितारागद्वेषाभिनिवेशाः क्लेशा' इति योगसूत्रम् । तृतीयत्वं समर्थयन्ति स्म **ऐहिकादिति । चान्द्रादीति ।** आदिनादित्यविद्युल्लोकौ । छान्दोग्य

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भिध्यानं मत्वा, अतिरोहितमिति कल्पयति । विपर्ययशब्देन च मोक्षम् । बहुध्याहारेण च सूत्रद्वयं योजयति । तत् ब्रह्मवादापरिज्ञानादसङ्गतेश्च साधनोपदेशस्य भ्रान्तोक्तमित्युपेक्ष्यम् । निद्राया विवेकज्ञानाभावावसरत्वात् यथा व्याख्यात एवार्थः ॥ ६ ॥

इति तृतीयाध्याये द्वितीयपादे प्रथमं सन्ध्याधिकरणम् ॥ १ ॥

भाष्यप्रकाशः ।

भूतो भवतीत्यर्थो ज्ञेयः । एतस्यां श्रुतौ पराभिध्यानपदेन परमेश्वरविषयकं ध्यानमुच्यत इति शब्दसाम्यकृतेनैतदनुरोधेनेश्वरविषयकं जीवकर्तृकाभिध्यानं सौत्रत्वेन विचार्य, पूर्वं तिरोहितमैश्वर्यं तस्माद्धेतोरतिरोहितं भवतीति कल्पयति । तत ईश्वरादेवास्य बन्धविपर्ययौ, ईश्वरापरिज्ञानाद्बन्धः, ईश्वरपरिज्ञानान्मोक्ष इति ।

तद्दूषयन्ति तदित्यादि । तथाच यदि ब्रह्मवादं जानीयात्, देहयोगसूत्रं सिद्धान्तीयत्वेन नोरीकुर्यात्, वाशब्दं च जीवेश्वरान्यत्वाशङ्काव्यावृत्त्यर्थं न व्याकुर्यात् । ब्रह्मवादेऽन्येषां हेतुना 'मिदमनेनैवमेवं करिष्यामी'तीश्वरेच्छायाः शरीर एव व्यापारतया निवेशात्, अवान्तरेऽस्मिन्नवस्थाप्रकरणे ईश्वराभिध्यानरूपसाधनोपदेशस्यासङ्गतेश्च तथेत्यर्थः । स्वोक्तव्याख्यानस्योचितत्वाय पूर्वोक्तां युक्तिं स्मारयन्ति निद्राया इत्यादि । इदं हि निद्राप्रकरणम् । निद्रा च तदैवावसरं प्राप्नोति, यदा विवेकज्ञानं न भवति । अतो ज्ञानतिरोभावस्यैवात्र वक्तव्यत्वात् तस्य चोक्तरीत्यैव बोधाद्यथोक्त एवार्थ इत्यर्थः ॥ ६ ॥ इति प्रथमं सन्ध्याधिकरणम् ॥ १ ॥

रश्मिः ।

'आदित्याच्चन्द्रमसं चन्द्रमसो विद्युतं तत्पुरुषोमानवः स एनान्ब्रह्म गमयत्येष देवयानः पन्था इती'ति श्रुतेः । पञ्चम्यन्तं पदम् । **शब्दसाम्येति** । ब्रह्मजीवसाधारणपरशब्दकृतेनैतस्य जीवस्यानुरोधेनेत्यर्थः । परशब्दोऽत्रावृत्त्योभयवाचक इतीश्वरविषयकं जीवकर्तृकाभिध्यानम् । **ईश्वरस्याभिध्यानं जीवस्येति** । 'कर्तृकर्मणोः कृती'त्युभयत्र षष्ठी । ईश्वरस्येति कर्मणि विषयार्थके षष्ठी । **जीवस्येति** कर्तरि । तथाचेश्वरविषयकं जीवकर्तृकाभिध्यानं भवति । **विचार्येति** । विद्यमानमपि तत्तिरोहित'मविद्याव्यवधानात् तत्पुनस्तिरोहितं सत्परमेश्वरमभिध्याय, ततो यतमानस्य जन्तोर्विधूतध्वान्तस्य तिमिरतिरस्कृतस्येव दृक्शक्तिरौषधवीर्यादीश्वरप्रसादात्संसिद्धस्य कस्यचिदेवाविर्भवतीति न स्वभावत एव सर्वेषां जन्तूना'मितिभाष्येण विचार्य । **तत्** जीवैश्वर्यम् । **अतिरोहित**मितिभाष्यं विवृण्वन्ति स **पूर्वमिति** । **भाष्ये** । **बह्वध्याहारेणेति** । ज्ञानैश्वर्यशक्त्यध्याहारः । अंशांशिभावाध्याहारः । ब्रह्मजीवकर्मकर्तृत्वाध्याहारः पूर्वसूत्रे । देहेतिसूत्रे ऐश्वर्यतिरोभावः । देहयोगाद्वेति सूत्रद्वयं योजयन्ति स **प्रकृते** । **ऊरीकुर्यादिति** । इच्छावादत्याजकत्वादिति भावः । **जीवेश्वरेति** । जीवस्येश्वरान्यत्वं तस्याशङ्का तस्या व्यावृत्त्यर्थम् । किन्तूक्तरीत्या विकल्पार्थं व्याकुर्यात् । **इदमित्यादि** । इदमैश्वर्यं अनेन देहयोगहेतुना एवं तिरोहितत्वप्रकारेण एवमतिरोहितत्वप्रकारेण करिष्यामीति 'स ईक्षांचक्र' इति ब्रह्मवादे पूर्वसूत्रोक्तेच्छायाः शरीरे निविष्टत्वात् । परन्तु व्यापारतया । इच्छया तत्तद्धेतूपस्थापनात् । तज्जन्यत्वे सति तज्जन्यजनकत्वं व्यापारः । **अवान्तर इति** । साधनप्रकरणावान्तरे स्वप्नाद्यवस्थाप्रकरणे । **तथेति** । भ्रान्तोक्तमित्यर्थः । **पूर्वोक्तामिति** । पूर्वसूत्रोक्ताम् । **निद्रेति** । स्वप्नप्रकरणम् । **तदैवेति** । कालान्तरयोगव्यवच्छेदकः । **विवेकेति** । देहगेहादेर्विवेकेन ज्ञानम् । आत्मानात्मविवेकज्ञानं न भवतीति वा । अज्ञानं भवतीति यावत् । तमःकार्यत्वान्निद्रायाः । **यथा व्याख्यात** इतिभाष्यं विवृण्वन्ति स **अतो ज्ञानेति** । अतो निद्रावसरस्यावश्यकत्वात् । ज्ञानतिरोभावोऽज्ञानं तस्यैवात्राधिकरणे योग्यदेहेपि शुभाशुभसूचनाय स्वप्नप्रदर्शनस्य वक्तव्यत्वात्तस्य स्वप्नदर्शनस्य **चोक्तरीत्या** भाष्योक्तरीत्या योग्यदेहानन्तरं सङ्गत्या बोधात् । एवकारोऽन्योक्तव्याख्यायोगव्यवच्छेदकः । **एवार्थ** इत्यत्रैवकारोऽन्योक्तार्थव्यवच्छेदकः ॥ ६ ॥ **इति प्रथमं सन्ध्याधिकरणम्** ॥ १ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तदभावो नाडीषु तच्छ्रुतेरात्मनि च ॥ ७ ॥ (३-२-२)

प्रसङ्गाज्जीवस्याज्ञानं निरूप्य सुषुप्तौ केवलमज्ञानं निरूपयितुं स्थानस्वप्नाभावौ निरूपयति। एवं श्रूयते। नाडीरनुक्रम्य 'तासु तदा भवति, यदा सुप्तः स्वप्नं न कश्चन पश्यति। अथास्मिन् प्राण एवैकधा भवती'ति। तथा 'प्राज्ञेनात्मना सम्परिष्वक्तो न बाह्यं किञ्चन वेद नान्तर'मिति।

तत्र संशयः। स्वप्नवत् प्रपञ्चसृष्टिं मायिकीमपि भगवान् करोति, न वेति संशयः।

तत्र 'य एष सुप्तेषु जागर्ती'त्यत्र जीवस्वापमात्रे भगवत्सृष्टेरुक्तत्वात्, 'स्वप्नं न कश्चन पश्यती'त्यत्रापि दर्शनमात्रनिषेधात्, 'न बाह्यं किञ्चन वेद नान्तर'मिति च जागरणस्वप्नप्रपञ्चयोरविशेषेणादर्शनकथनात्, सुषुप्तावपि प्रपञ्चनिर्माणमस्ती-

---

भाष्यप्रकाशः।

तद्भावो नाडीषु तच्छ्रुतेरात्मनि च ॥ ७ ॥ सूत्रमवतारयन्ति प्रसङ्गादित्यादि। अज्ञानमिति। विपरीतज्ञानजनकमज्ञानम्। स्थानपदेनाज्ञानस्थानं बोध्यम्। अस्य सूत्रस्याधिकरणत्वाय विषयवाक्याद्याहुः एवमित्यादि। अत्र प्रथमं वाक्यं कौशीतकिब्राह्मणे बालाक्यजातशत्रुसंवादस्थम्। द्वितीयं बृहदारण्यकीयज्योतिर्ब्राह्मणस्थम्।

तत्र संशय इति। सुषुप्तौ सृष्टिकरणस्य संशयः। काठकवाक्ये सृष्टिनिर्माणश्रावणं विषयश्रुतौ दर्शनाभावमात्रश्रावणं च सन्देहबीजम्। तदेतत् पूर्वपक्ष एव सूचयन्तस्तमाहुः तत्रेत्यादि। मुक्त्यवस्थायामपि बाह्यप्रपञ्चसत्तापादनं पूर्वपक्षयुक्तिफलम्। सत्ताया द्रष्टृदर्शन्व्याप्तिदर्शनात् तदभावे प्रपञ्चसत्ताभाव इत्याशङ्क्य परिहरति स्वाप्ययेत्यादि। तथाच सत्तादर्शनयोर्व्याप्त्यभावात् तदभावमात्रेण सत्ताभावो न वक्तुं शक्य इत्यर्थः।

रश्मिः।

तदभावो नाडीषु तच्छ्रुतेरात्मनि च ॥ ७ ॥ प्रसङ्गं बोधयितुमज्ञानस्वरूपमाहुः। विपरीतं विपर्ययः पराभिध्यानसूत्रोक्तः भगवद्धर्मविपरीतधर्मरूपः भाष्ये दुःखित्वमित्यनेनोपलक्षणयोक्तः। बन्धो दुःखित्वं विपर्ययः भगवद्धर्मविपरीतधर्म इति। तथा च पूर्वाधिकरणोक्तविपर्ययोक्तेः प्रसङ्ग इत्यर्थः। अन्योपि प्रसङ्गो भाष्ये स्वप्नवदित्यादिना वक्तव्यः। एवं चायं भाष्यार्थः। विपर्ययो जीवनिष्ठः तज्ज्ञानं विपर्ययाधीनं ज्ञातविपर्ययजनकं अज्ञानं तमः। 'सुषुप्तावानन्दभु'गिति ह्यानन्दधर्मस्तमः। 'आनन्दाच्च तम' इति सुबोधिन्याः। **अज्ञानस्थान**मिति। आनन्दः। 'सुषुप्तिस्त्वकामरूपो भगवा'निति भाष्यात्। 'अकामरूपत्वादानन्दस्ये'त्युक्तभाष्याच्च। बृहदिति। सूत्रान्तराच्छः। वृद्धत्वाभावात्। **द्वितीय**मिति। **प्राज्ञेनात्मने**त्यादि। **तत्रे**त्यस्य सुषुप्तावित्यर्थः। सुषुप्तावपि प्रपञ्चनिर्माणमस्तीति पूर्वपक्षभाष्यात्। **दर्शनाभावे**ति। 'न कंचन पश्यती'त्यत्र नञो दर्शनानुकूलव्यापारेऽन्वयादिति भावः। मात्रचा सृष्टिनिर्माणव्यवच्छेदः क्रियते। **बाह्ये**ति। मुक्तौ प्रपञ्चव्यतिरेकः स्यात्, यदि सर्वावस्थायां प्रपञ्चव्यतिरेकः स्यात्। अतो मुक्तावपि प्रपञ्चव्यतिरेकाभाव इति बाह्यप्रपञ्चसत्तापादनम्। **सत्ताया** इति। सत्ताया द्रष्टृदर्शने व्याप्तिः। मुक्तिः प्रपञ्चसत्तावती। द्रष्टृदर्शनात्। स्वप्नवदित्यत्र। **तद्भाव** इति। व्याप्त्यभावे। **परिहरती**ति। पूर्वत्र हेतुं वदन्निति शेषः। **व्याप्त्यभावा**दिति। मायादर्शने साध्याभाववति हेतुसत्त्वात्साधारण्येन व्याप्त्यभावात्। स्वाप्ययशब्देन गृहीतसुषुप्तौ स्वप्नसन्निधानाद्यत्किञ्चित्सत्यमायादर्शनसत्त्वात्। **सत्ताभाव** इति। मुक्त्यवस्थायां प्रपञ्चसत्ताभावः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

त्यवगन्तव्यम् । ततश्च कस्यामप्यवस्थायां प्रपञ्चव्यतिरेकाभावान्मुक्तावपि स्यात् । स्वाप्ययसम्पत्त्योरज्ञानमात्रविशेषात् । 'सति सम्पद्य न विदुः सति सम्पद्यामह' इति । तस्मात् बाह्यसत्सम्पदोर्विद्यमानयोरपि यथा ज्ञानाभावादग्रहणम्, एवं प्रपञ्चस्यापीत्येवं प्राप्ते, उच्यते ।

तदभावो नाडीषु । तस्य स्वप्नस्याभावो नाडीषु । तथा आत्मनि च । कुतः । तच्छ्रुतेः । प्रपञ्चाभावश्रुतेः । कामनया हि प्रपञ्चः । सुषुप्तावस्थाया अकामरूपत्वश्रुतेः । 'तद्वा अस्यैतदाप्तकाममात्मकाममकामꣳ रूप'मिति । नाडीषु आत्मनि चेति ग्रहणात् सुषुप्तिर्द्विविधेति सूचयति । तथाहि । 'हिता नाम नाड्यः' पुरीतत्यन्ता हृदयदेशात् बाह्याः, आभ्यन्तरः परमात्मा, हृदयदेशस्तु

भाष्यप्रकाशः ।

सिद्धान्तं व्याचक्षते तस्येत्यादि । स्वप्नस्येति । मायिकसृष्टेः । सा प्रपञ्चाभावश्रुतिः केत्याकाङ्क्षायां तां व्युत्पादनेन स्फुटीकुर्वन्ति कामनयेत्यादि । हि यतो हेतोः 'कामं काम'मिति स्वप्नसृष्टिबोधकवाक्ये कामविषयाणां निर्माणश्रावणात् पुरुषकामनया स प्रपञ्चो बोधितः । बृहदारण्यके तु 'तद्वा अस्यैत'दित्यनेन सुषुप्तावकामं रूपं जीवस्य श्राव्यते । अतः स्वप्नसृष्टिहेत्वभावबोधिका या सुषुप्तावस्थायां अकामरूपत्वश्रुतिः, सैव तच्छ्रुतिस्तस्याः । तथाच यथा ज्योतिश्चरणाधिकरणे प्राकरणिको व्युत्पादनसापेक्षो हेतुः साधकः, तथात्रापीत्यर्थः । एवं व्याख्याने बीजं तु तदभावपदस्य लाक्षणिकतानिवृत्तिर्बोध्या । एवं स्वप्नाभावनिरूपणं व्याकृत्य स्थाननिरूपणं व्याकुर्वन्तो मतान्तरादत्र विशेषमाहुः नाडीष्वित्यादि । हृदयदेशात् बाह्या इति । हृदयदेशात् बाह्यदेशं

रश्मिः ।

भाष्ये । **तस्मादिति ।** श्रुत्यापादकवाक्ययोः सत्त्वात् । **बाह्येति ।** बाह्यप्रपञ्चः । **विद्यमानयोः** प्रपञ्चसत्तावतोः । **अग्रहणमिति ।** तथाचानयोः साध्यव्यापकताग्रहाद्धेतोः व्याप्यताग्रहः । तथाच मायादर्शने उक्तरीत्या साधारण्यमिति भावः । एवं प्रपञ्चस्यापि विद्यमानस्याग्रहणं ज्ञानाभावादित्यर्थः । आपादनाभावे भाष्यार्थः स्पष्टः । यद्यपि बाह्यप्रपञ्चसत्ता यस्माद्द्रष्टृदर्शनादिति द्रष्टृदर्शनापादनमर्थः । सत्ताया इत्यनुमानं तु मुक्तिः द्रष्टृदर्शनवती, सत्तायाः, स्वप्नवत् । व्याप्त्यभावादित्यपि पूर्ववन्न स्वाप्ययसम्पत्त्योः साध्याभाववति हेतुसत्त्वात्साधारण्येन व्याप्त्यभावात् । **प्रकृते ।** **तदभावमात्रेणेति ।** प्रपञ्चदर्शनाभावमात्रेण । **सत्ताभावो** हेत्वभावः । **भाष्ये ।** **अग्रहणमिति ।** प्रपञ्चदर्शनस्यानुव्यवसायेऽग्रहणम् । तथाच हेतुमति साध्यसत्त्वान्न साधारण्यमित्यनुमानपक्षेपि भाष्यार्थः सुष्ठु । **प्रकृते ।** **मायिकेति ।** इयं ज्ञानात्मिका ग्राह्या । 'स्वप्नः सुप्तस्य विज्ञान' इति कोशात्स्वप्नस्य ज्ञानत्वात् । **जीवस्येति ।** ननु 'सुषुप्तिस्त्वकामरूपो भगवा'निति 'सुषुप्त्युत्क्रान्ति'सूत्रभाष्यविरोध इति चेत् । न । 'अकामरूपत्वादानन्दस्ये'त्युभयरूपत्वात् । **प्राकरणिक इति ।** ज्योतिर्ब्रह्म प्राकरणिकः हेतुश्चरणाभिधानादिति । **एवं व्याख्यान इति ।** ब्रह्मजीवसाधारण्येन व्युत्पादनसापेक्षतच्छ्रुतिरूपहेतुव्याख्याने । अयमर्थः । अन्यत्र तदभावपदेन स्वप्नदर्शनाभावो व्याख्यातः । 'तद्वा अस्यैत'दिति श्रुतिर्नोक्तेति । **लाक्षणिकतेति ।** स्वप्नदर्शने लाक्षणिकता । दर्शनमनुव्यवसाय इत्यपि गौरवग्रस्तः पक्षः । **हृदयदेशादिति** भाष्ये ल्यब्लोपे पञ्चमीत्याहुः **हृदयेति ।**

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

जीवस्य। इन्द्रियाणां च स एव देशः। तत्र निद्रया भगवच्छक्त्या बहिर्दृष्ट्याच्छादने भगवल्लीलायां तां पश्यति। तत्राप्याच्छादने गाढसुप्तो ज्ञानरहितः क्रियाशक्त्या अन्तर्भगवन्तं वा प्रविशति। बहिर्नाडीषु वा समायाति। अत एव बृहदारण्यकषष्ठे 'यत्र सुप्तो न कश्चन कामं कामयत' इति वारद्वयमाह। 'ता वा अस्यैता हिता

भाष्यप्रकाशः।

प्राप्य स्थिताः। आभ्यन्तर इति। हृदयदेशादाभ्यन्तरः। तामिति। स्वामिकीं भगवल्लीलाम्। द्वैविध्ये प्रमाणमाहुः अत एवेत्यादि। तदेव स्फुटीकुर्वन्ति ता वा इत्यादि। तथाच बृहदारण्यके 'यत्र सुप्त' इत्याद्युक्त्वा, किं तत् स्वापस्थानमित्याकाङ्क्षायां 'ता वा अस्यैता हिता नाम नाड्य' इति पूर्वमुक्त्वा, पुनरपि तथैवोक्त्वा, 'तद्वा अस्यैत'दित्यादिना आत्मरूपं स्थानान्तरमुक्तम्। तस्मात् सुषुप्तेर्द्वैविध्यम्। उभयत्रापि कामनाभावाच्च न सृष्टिः, अत एव च न मुक्तावपीत्यर्थः।

यत्तु, 'तद्यत्रैतत्सुप्तः समस्तः सम्प्रसन्नः स्वप्नं न विजानात्यासु तदा नाडीषु सुप्तो भवती'ति, 'ताभिः प्रत्यवसृप्य पुरीतति शेत' इति, 'तासु तदा भवती'ति च, 'य एषोऽन्तर्हृदय आकाशस्तस्मिञ्छेत' इति, 'सता सोम्य तदा सम्पन्न' इत्यादीनि दहरदृप्तबालाकीयबालाकीयानि विषयवाक्यान्युपन्यस्य, किमेतेषां नाडीपुरीततत्परमात्मनां परस्परनिरपेक्षाणां सुषुप्तिस्थानत्वम्, उत परस्परसापेक्षतयैकस्येति संशये, परस्परनैरपेक्ष्यमयुक्तम्। तथा सति व्रीहियववद्विकल्पापत्त्या पक्षे बाधापत्तेः। नच नाडीषु सुप्तो भवति, पुरीतति शेते, य एषोऽन्तर्हृदय आकाशस्तस्मिञ्छेत इत्येकविभक्तिनिर्देशेनैकार्थत्वात् विकल्पस्योचितत्वं शङ्क्यम्। प्रासादे शेते, पर्यङ्के शेते, इत्यादौ नानार्थत्वसमुच्चययोरप्येकविभक्तिदर्शनेन हेतोः साधारणत्वात्। 'तासु तदा भवति, यदा सुप्तः स्वप्नं

रश्मिः।

भाष्ये। इन्द्रियाणां चेति। 'मन इन्द्रियनायक'स्तत्रेति तथा। यद्वा। हृदयब्राह्मणे 'एष प्रजापतिर्यद्धृदयम्, एतद्ब्रह्मैतत्सर्वं तदेतत्त्र्यक्षरꣳहृदय'मित्युक्त्वा 'एतत्सर्व'मिति सर्वपदार्थमाह। 'हृ इत्येकमक्षरमभिहरन्त्यस्मै स्वाश्चान्ये च य एवं वेद, द इत्येकमक्षरं ददत्यस्मै स्वाश्चान्ये च य एवं वेद, यमित्येकमक्षरमेति स्वर्गलोकं य एवं वेदे'ति। अर्थस्तु, अस्मै ब्रह्मणे स्वाश्चा जीवेन्द्रियाणि अन्ये विषयाः। मर्यादामार्गीयसर्वात्मभाव उक्तः, अम्बरीषस्येव। निरोधलक्षणग्रन्थोक्तः। 'इन्द्रियाणि जुहोती'ति सामश्रुतेः। अत एवैवकारः। **भगवच्छक्त्येति**। त्रिष्वनन्तरूपभगवच्छक्त्या। अनन्तस्यानन्तानन्दरूपत्वेनानन्दस्य तमःशक्तित्वात्। 'आनन्दाच्च तम' इति सुबोधिन्या द्वितीयनवमाध्याये स्पष्टम्। **बहिरिति**। सतिसप्तम्यन्तम्। **तत्रापीति**। स्वप्नेपि स्वप्नसृष्ट्याच्छादने सति। **गाढत्वं** सम्यक्त्वम्। 'प्राज्ञेनात्मना सम्परिष्वक्त' इत्युक्तश्रुतेः। **ज्ञानरहित** इति। 'न बाह्यं किञ्चन वेद न चान्तर'मिति श्रुतेः। **क्रियाशक्त्येति**। 'सम्परिष्वक्त' इतिश्रुतेः। **भगवन्तमिति**। अकामरूपं भगवन्तम्। **प्रकृते। स्थानान्तरमिति**। नाडीस्थानम्। अन्यत्स्थानं स्थानान्तरम्। **उभयत्रेति**। सुषुप्त्योः। सुषुप्तिस्त्वित्यादिभाष्यार्थः स्फुटः।

यत्त्वित्यादि। तदेतत्समीपतरवर्ति यत्र यस्मिन्काले सम्यक् अस्तः। **ताभिरिति**। नाडीभिः। **तास्विति**। नाडीषु। **दहरेति**। जलीयाः परमाणव इत्यत्रेव छः। **पक्ष** इति। नाड्यः तदभाववत्यः तच्छ्रुतेः। आत्मवत्। 'आत्मा तदभाववान् तच्छ्रुतेः नाडीव'दित्यत्र हृदये स्वप्नदर्शनाभावरूपसाध्ये पक्षे नाडीषु बाधः। पक्षे साध्याभावस्य बाधत्वात्। **नानार्थत्वेति**।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भाष्यप्रकाशः ।

न कञ्चन पश्यति, अथास्मिन् प्राण एवैकधा भवती'ति कौशीतकिश्रुतौ प्राणाख्यस्य परमात्मनो नाडीसमुच्चयावधारणात् । यत्र पुनः केवलनाडीनामेव सुषुप्तिस्थानत्वेन श्रावणम्, तत्रापि ब्रह्मणः प्रतिषेधाभावान्नाडीद्वारेण ब्रह्मण एव स्थानत्वस्य युक्तत्वात् । नच द्वारत्वे 'नाडीषु सृप्तो भवती'ति सप्तमीविरोधः । सञ्चारस्थानत्वेन तदविरोधात् । गङ्गया सागरं गच्छतो गङ्गायां स्थितिवत् तदुपपत्तेः । तस्मान्नाडीब्रह्मणोः समुच्चयः । एवं पुरीतद्ब्रह्मणोरपि । पुरीततोपि ब्रह्मप्रक्रियायां सङ्कीर्तनात् । 'योऽन्तर्हृदय आकाशस्तस्मिञ्छेत' इति प्रकृत्य, 'पुरीतति शेत' इति कथनात् । हृदयाकाशस्य ब्रह्मत्वं तु दहराधिकरणे सिद्धम् । पुरीतत्तु हृदयवेष्टनम् । एवञ्च तद्वेष्टितो हृदयाकाशः प्राकारपरिक्षिप्तपुरवत् भवतीति हृदयाकाशे शयने पुरीततोपि समुच्चयो जात एवेति । एवञ्च श्रुतिषु स्थानत्रयकथनेपि नाडीपुरीततोर्द्वारमात्रत्वम् । ब्रह्मैव तु सुषुप्तिस्थानमित्युक्तम् ।

तत्र पुरीतत्समुच्चयं त्वनुमन्यामहे । एकवाक्यगतत्वात् । नाडीनां समुच्चयं तु न मृष्यामः । बृहदारण्यके ज्योतिर्ब्राह्मणे 'यत्र सुप्तो न कञ्चन कामं कामयते, न कञ्चन स्वप्नं पश्यति, ता वा अस्यैता हिता नाम नाड्य इति, अथ यत्र सुप्तो न कञ्चन कामं कामयते, न कञ्चन स्वप्नं पश्यति, तद्वा अस्यैतदात्मकाममाप्तकाममकाम९ रूपं तद्यथा प्रियया स्त्रिये'ति नाडीपरमात्मभेदेन अथशब्दात् प्रकृतच्छेदेन च श्रुतस्य 'यत्र सुप्त'वाक्याभ्यासस्य विरोधात् । अभ्यासप्रकृतच्छेदाभ्यां सिद्धे सुषुप्तिस्थानभेदे विकल्पस्यापि प्राप्ततया दुष्टत्वाभावात् । 'ताभिः प्रत्यवसृप्ये'त्युक्ते नाडीषु सर्पण इवार्थादपि तत्प्राप्तेश्च । एवं सति कौशीतकीये 'अथास्मिन् प्राण एवे'ति वाक्येपि विकल्पार्थक एवाथशब्दो ग्राह्यः । आनन्तर्यार्थकत्वेपि पूर्वापरकालभेदस्य प्राप्तत्वेन पूर्वकालिकस्य नाडीषु सुष्वापस्याबाधात् । अपरकालिकस्य प्राण एकीभावस्यापि भगवदिच्छाकृतप्रत्यवसर्पणतः

रश्मिः ।

समुच्चयस्तु प्रासादे शेते, ततः प्रत्यवसृत्य पर्यङ्के शेत इति । एकविभक्तिः सप्तमी । हेतोः तच्छ्रुतिरूपस्य साध्याभाववत्यात्मनि सत्त्वेन साधारणत्वात् । **नाडीति** । तास्वितिपदोक्तनाडीसमुच्चयावधारणात् । **अथे**त्यस्यानन्तर्यार्थत्वात् । **यत्रे**ति । 'आसु तदा नाडीषु सृप्तो भवती'त्यादौ । प्रकरणाभावादेवकार आत्मव्यवच्छेदकः । **ब्रह्मण एवे**ति । एकवाक्यतासम्भवादेवकारः साक्षान्नाडीव्यवच्छेदकः । **सप्तमी**ति । किन्तु नाडीभिः सृप्तो भवतीति तृतीयापत्तिरित्यर्थः । **सञ्चारे**ति । समस्तो जीवो नाडीषु सञ्चरतीति तथा । **तदविरोधात्** सप्तम्यविरोधात् । **गच्छत** इति । काष्ठादेः । समुद्रे गच्छतः काष्ठादेः गङ्गायां समुद्रधारायां काष्ठादिर्गच्छतीति प्रयोगात् । **तदुपे**ति । सप्तम्युपपत्तेः । **नाडीब्रह्मणोरि**ति । नाड्यात्मनोः । **कथनादि**ति । दहरस्य परमात्मत्वनिर्णयात् । अन्तर्हृदय आकाशो दहरः । हृदयेऽन्तराकाश इत्यन्वयः । **हृदयवेष्टनमि**ति । भास्करभाष्येप्येवम् । **हृदयाकाश** इति । ब्रह्मपुरम् । तदाहुः **प्राकारे**ति । प्राकारो हर्म्यं परिक्षिप्तः यत्र पुरे तद्वत् । **जात एवे**ति । उक्तदृष्टान्तादेवकारः । **ब्रह्मैवे**ति । नाडीपुरीततोर्व्यवच्छेदकैवकारः । **सुषुप्तिस्थानभेद** इति । नाड्यकामजीवरूपसुषुप्तिस्थानभेद इत्यर्थः । **दुष्टत्वे**ति । अयमग्रे विचारयिष्यते । **ताभिरि**ति । नाडीभिः सह जीवः । प्रत्यवसृप्येत्युक्ते नाडीषु सर्पणम् । पुत्रेण सह तृणं स्पृष्ट्वा गतः पितेत्यत्र पुत्रे तृणस्पर्शवत् । **अर्थादा**क्षेपादपि तत्प्राप्तेर्विकल्पप्राप्तेः । विकल्पस्तु नाडीपुरीततोः । **विकल्पार्थक एवे**ति । कोशादेवकारः । नन्वष्टदोषदुष्टविकल्पार्थं विकल्पार्थत्वं न युक्तमत आहुः **आनन्तर्ये**ति । **पूर्वे**ति । अनन्तरस्य काल-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भाष्यप्रकाशः।

सुखेन सिद्धेश्च। नच नाडीस्वापवाक्ये ब्रह्मणोऽप्रतिषेधात् प्राप्तिरिति वाच्यम्। आभ्यासिकभेदादेवार्थात् तत्प्रतिषेधसिद्धेः। अन्यथा तद्वैयर्थ्यप्रसङ्गस्य दुर्निवारत्वादिति। एवञ्च सुखापोत्तरकालीनस्मरणेपि कदाचित् सुखस्य स्वापविशेषणतया भानं कदाचिच्च नेत्यपि युज्यते। नच नाडीषु स्वापे प्रपञ्चदर्शनप्रसङ्गः। सुषुप्तौ कामाभावश्रावणेन मनसो लयावगमात् करणाभावेन मायिकप्रपञ्चानुत्पत्त्या बाह्यस्य च विप्रकृष्टतया करणलयेन च तदप्रसङ्गात्। अतो न दर्शनाभावार्थमपि सत्सम्पत्त्यपेक्षा। किञ्च। सूत्रकारस्यापि सुषुप्तिद्वैविध्यमेवाभिप्रेतम्। अन्यथा 'तदभाव आत्मनि तच्छ्रुते'रित्येव सूत्रयेत्। तावतैव द्वैतदर्शनाभावपाप्मसंसर्गाभावयोः सिद्ध्या नाडीचकारयोर्निर्देशस्य वैयर्थ्यात्। तेनैतत् सिद्धम्। नाडीपरिवर्तने स्वप्नदर्शनम्। तासां प्रान्तभागे पुरीतन्निकटे सुषुप्तिः। पुरीतदन्तर्हृदये आकाशे सत्सम्पत्तिरिति।

ननु भवत्वेवम्, तथापि विकल्पस्य कथमदुष्टत्वमितिचेत्। उच्यते। विकल्पे हि प्राप्तप्रामाण्यपरित्यागः, अप्राप्ताप्रामाण्यस्वीकारः, परित्यक्तप्रामाण्यस्वीकारः, स्वीकृताप्रामाण्यपरित्यागश्चेति

रश्मिः।

विशेषणत्वादिति भावः। **आभ्यासिकेति**। 'यत्र सुप्तो न कञ्चन कामं कामयत' इति वारद्वयमाह, अतो 'यत्र सुप्त' इति वाक्याभ्यासिकभेदात्। अभ्यासस्य भेदकत्वं पूर्वतन्त्रेस्ति। एवकारेण प्रकृतच्छेदयोगव्यवच्छेदः क्रियते। **तत्प्रतीति**। ब्रह्मणः 'योन्तर्हृदयाकाशस्तस्मिञ्छेत' इति श्रुत्युक्तस्य प्रतिषेधसिद्धेः। ननु नञाद्यभावात्कुतस्तत्प्रतिषेधसिद्धिः, अत उक्तं **अर्थादिति**। आक्षेपात्। ननु किमर्थं नञाद्यर्थप्रतिषेधाक्षेप इत्यतो युक्तिमाहुः **अन्यथेति**। **तद्वैयर्थ्यप्रसङ्गस्याभ्यासिकभेदवैयर्थ्यप्रसङ्गस्य**। तथाचाभ्यासिकभेदवैयर्थ्यप्रसङ्गनिवारणार्थमित्यर्थः। **सुखापेति**। 'सुखमहमस्वाप्सं न किञ्चिदवेदिष'मिति स्मरणे। **कदाचिच्चेति**। सुखसहचरितदुःखाभावकालो यदि। **चियद्यर्थकम्**। **मनस इति**। कामरूपवृत्तिमतो मनसः। **करणाभावेनेति**। 'यथा शयानः पुरुषो मनसैवात्ममायया। सृष्ट्वा लोकं परं स्वाप्नमनुविश्यावभासत' इत्युक्तश्रीभागवतवाक्यात्। **तदप्रसङ्गात्** प्रपञ्चदर्शनाप्रसङ्गात्। **अपीति**। पूर्वं सुषुप्तौ प्रपञ्चसत्तार्थं सत्सम्पत्तिः स्वाप्ययसम्पत्तिसूत्रोपन्यासेनोक्ता। तथाच सत्सम्पत्तिश्रुत्युपन्यासो विषयश्रुत्युपन्यासे समाप्तपुनरात्तत्वदोषग्रस्त इति भावः। **एवेति**। नाडीषुपदस्य चशब्दस्य चोपादानादेवकारः। **द्वैतदर्शनेति**। तथाच भाष्यं 'नाडीषु सुप्तो भवती'त्युक्त्वा 'तन्न कश्चन पाप्मा स्पृशती'ति। ब्रह्मसम्पत्तिश्च पाप्मसंस्पर्शाभावे हेतुः समधिगतः। 'सर्वे पाप्मानो निवर्तन्ते अपहतपाप्मा ह्येष ब्रह्मलोक' इत्यादिश्रुतिभ्यः। ब्रह्मसम्पत्त्या द्वैतदर्शनाभावोपि। पाप्मसंसर्गाभावोपि विवृतः। स्वप्नदर्शनसुषुप्तिद्वयविवेकमाहुः **तेनैतदिति**। **प्रान्तभाग इति**। 'ताभिः प्रत्यवसृप्य पुरीतति शेत' इति श्रुतेः। **पुरीतन्निकट इति**। तेन 'पुरीतति शेत' इत्यत्र सामीप्ये सप्तम्युक्ता। **सति सम्पत्तिरिति**[1]। 'आत्मनि चे'त्युक्ता सुषुप्तिरपीयम्। **कथमिति**। शाङ्करप्रश्नः। श्रुतीनां विरोधे विकल्प इति मन्वङ्गीकारात्समादधतिस्म **विकल्पे हीति**। 'नाडीषु सुप्तो भवतीति,' 'पुरीतति शेते,' 'य एषोन्तर्हृदय आकाशस्तस्मिञ्छेत' इति। 'एतदेकवाक्यतापन्ने नाडीपरिवर्तन' इत्याद्युक्ते वाक्ये। विकल्पे हि अष्टौ दोषाः। 'तस्मादात्मैव सुषुप्तिस्थान'मिति शङ्करभाष्ये समुच्चयोऽङ्गीकृतः, तत्र नैकोपीति तान् गणयन्तिस्मानुवादरूपात्। **प्राप्तेति**। 'इषेत्वेति शाखां छिनत्ती'त्यनेन खशयनस्य प्राप्तत्वात्। शाखा खशयेति व्याख्यानात्। **अप्राप्तेति**। वैदिकत्वेनाप्राप्तमप्रामाण्यं तस्य स्वीकारः। **परित्यक्तेति**। अर्थबोधार्थं तथा। गौणं प्रामाण्यम्। **स्वीकृतेति**। तदर्थमेव

१. सदित्यत्र रश्मौ सतीति पाठः। २. मीमांसक।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नाम नाड्यः', 'तद्वा अस्यैतदाप्तकाम'मिति भेदेन । सुषुप्तिस्तूभयत्र । ज्ञानशक्तेः सर्वथा तिरोधानात् । तस्मात् सुषुप्तौ न प्रपञ्चसृष्टिः ॥ ७ ॥

इति तृतीयाध्याये द्वितीयपादे द्वितीयं तदभावो नाडीष्वित्यधिकरणम् ॥ २ ॥

अतः प्रबोधोऽस्मात् ॥ ८ ॥ (३-२-३)

प्रबोधे सन्देहः । 'प्रतियोन्याद्रवति बुद्धान्तायैवे'ति जीवसमानधर्मेब्रह्म-

---

भाष्यप्रकाशः ।

ब्रह्मवाक्यकोटौ दोषचतुष्टयम् । एवं नाडीवाक्यकोटौ दोषचतुष्टये व्रीहियववाक्यवद्योजितेऽष्टौ दोषा इति हि भवतां मतम् । तत्र प्रामाण्याप्रामाण्ययोः स्वरूपं विचारणीयम् । किं सदर्थबोधकत्वं प्रामाण्यम्, असदर्थबोधकत्वमप्रामाण्यम्, उत बोधकत्वं प्रामाण्यम्, अबोधकत्वमप्रामाण्यम्, अथवा अनुष्ठापकत्वं प्रामाण्यम्, अननुष्ठापकत्वमप्रामाण्यमिति । तत्र नाद्येन । वाक्यद्वयेनापि सदर्थबोधस्य जायमानतया तत्त्यागस्याभावेनासदर्थबोधकत्वस्य क्वाप्यनङ्गीकारेण तत्कृतदोषाणामत्राभावात् । अत एव न द्वितीयेन । नापि तृतीयेन । वाक्यद्वयस्यापि सिद्धार्थपरतया अनुष्ठापकत्वस्याभावेन त्याज्यत्वस्य तत्रायोगात् । अननुष्ठापकत्वस्य सर्वसम्मतत्वेन विकल्पानङ्गीकर्तृमतेपि तुल्यतया तत्र पर्यनुयोगानवकाशात् । तस्मात् पूर्वोक्तमनवद्यम् ॥ ७ ॥ इति द्वितीयं तदभावो नाडीष्वित्यधिकरणम् ॥ २ ॥

अतः प्रबोधोऽस्मात् ॥ ८ ॥ अधिकरणप्रयोजनमाहुः प्रबोधे सन्देह इति । तथाच तन्निरासायेदमधिकरणमित्यर्थः । विषयवाक्यमाहुः प्रतियोनीत्यादि ।

इदं बृहदारण्यकीयज्योतिर्ब्राह्मणस्थम् । 'स वा एष एतस्मिन् सम्प्रसादे रत्वा चरित्वा दृष्ट्वैव पुण्यं च पापं च प्रतिन्यायं प्रतियोन्याद्रवति बुद्धान्तायैवे'ति । अर्थस्तु, स प्रकृतो जीवात्मा

रश्मिः ।

वेदान्ताधिकरणमालायां तु 'यदा जीवो नाडीषु शेते, तदा पुरीतद्ब्रह्मवाक्ययोः प्राप्तं प्रामाण्यं परित्यक्तं स्यात् । अप्राप्तं प्रामाण्यं चाङ्गीक्रियेत । यदा पुनः पुरीतद्ब्रह्मणोः शेते, तदा पुरीतद्ब्रह्मवाक्ययोः पूर्वत्यक्तं प्रामाण्यं स्वीक्रियेत । पूर्वस्वीकृतं चाप्रामाण्यं परित्यज्येतेति प्राप्तपरित्यागोऽप्राप्तस्वीकारस्त्यक्तस्वीकारः स्वीकृतत्यागश्चेति दोषचतुष्टयं पुरीतद्ब्रह्मवाक्यकोटौ । तथा नाडीवाक्यकोट्यामपि दोषचतुष्टये योजिते सत्यष्टौ दोषाः सम्पद्यन्त' इति । एवमिति । ब्रह्मवाक्योक्तप्रकारेण । व्रीहीति । एकपुरोडाशार्थत्वं व्रीहियवयोर्दृष्टम्, तद्वाक्ये तु 'व्रीहिभिर्यजेत यवैर्यजेते'ति च । तद्वत्सुषुप्त्यर्थत्वं ब्रह्मवाक्यनाडीवाक्ययोरिति ब्रह्मवाक्य इव नाडीवाक्ये दोषचतुष्टये योजिते भवतां शाङ्कराणां मतम् । अत्र वितण्डामाहुः सदर्थेति । प्रमाकरणं सदर्थबोधकं तत्त्वं प्रामाण्यमित्यर्थः । बोधकत्वमिति । अनधिगतार्थगन्तृत्वम् । वाक्यद्वयेनेति । विकल्पसङ्ग्राहकेण 'तासां प्रान्तभागे'त्याद्युक्तेन समुच्चायकसङ्ग्राहकेण । 'तस्मादात्मैव सुषुप्तिस्थान'मिति शङ्करभाष्यवाक्येन च । क्वापीति । प्रमाणलक्षणत्वेनोक्तव्याख्याकत्वेन च क्वापि । अत्रेति । प्रामाणिकविकल्पे । अतएव क्वाप्यनङ्गीकारादेव । सिद्धार्थेति । ननु साध्यार्थाग्निष्टोमवत्साध्यार्थपरतया । तत्रेति । अनुष्ठापकत्वाभावे । तत्रेति । विकल्पे । 'यत्रोभयोः समो दोषः परिहारश्च तत्समः । नैकः पर्यनुयोक्तव्यस्तादृगर्थविचारण' इत्युक्तेः ॥ ७ ॥ इति द्वितीयं तदभावो नाडीष्वित्यधिकरणम् ॥ २ ॥

अतः प्रबोधोऽस्मात् ॥ ८ ॥ प्रतियोनीत्यादीति । जीवसमानधर्मं ब्रह्म तस्य प्रकरणे ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रकरणे निरूपितम् । ततो नाडीभ्यः पुनर्हृदयदेशं गत्वा, भगवतो वा समागत्य, जागर्तीति, आहोस्वित्तत्र स्थितः, तत एव जागर्तीति ।

तत्र श्रुत्यनुरोधात् हृदयदेशमागत्य जागर्तीत्येवं प्राप्ते, उच्यते ।

अतो नाडीभ्य एव प्रबोधः । गर्तपतितस्य प्रबोधे हि ततो गमनम् । प्रतियो-

भाष्यप्रकाशः ।

वै निश्चयेन एषः स्वयंज्योतिः । एतस्मिन् सम्प्रसादे सम्यक्प्रसीदत्यस्मिन्निति सम्प्रसादः सुषुप्तिस्थानं तस्मिन् सम्प्रसादे रत्वा क्रीडित्वा सता सम्परिष्वज्य, चरित्वा 'चर गतिभक्षणयोः' तदानन्दं भुक्त्वा, दृष्ट्वैव पुण्यं च पापं च । चकारात् तदुभयफलभूते सुखदुःखे स्वप्ने नाडीष्वनुभूय, प्रतिन्यायम्, आयो गमनं नितरामायो न्यायः पूर्वस्मात् गमनात् प्रातिकूल्येन गमनं प्रतिन्यायः, तद्यथा स्यात् तथा, प्रतियोनि, यतः सम्प्रसादे समागतस्तत्स्थानं योनिस्तल्लक्ष्यीकृत्य आद्रवत्यागच्छति बुद्धान्ताय जागरणायेति ।

अन्ये तु, रमणं स्वरूपानन्दानुभवः । 'आनन्दभु'गिति श्रुतेः । चरणं सुषुप्तावीश्वरसम्पत्तिः । 'सता सौम्य तदा सम्पन्नो भवती'ति श्रुतेः । पुण्यदर्शनं त्वानन्दानुभवः । तस्य तत्फलत्वात् । सुखमहमस्वाप्समित्यनुभवात् । पापदर्शनं त्वज्ञानानुभवः । तस्य तत्फलत्वात् । न किञ्चिदवेदिषमित्यनुभवादिनेति श्रुतेरित्याहुः । तदग्रे विचारणीयम् ।

संशयाकारमाहुः तत इत्यादि । भगवतो वा समागत्येति । भगवतः सकाशात् हृदयदेशं समागत्य ।

पूर्वपक्षमाहुः तत्रेत्यादि । श्रुतौ 'चरित्वा प्रतिन्यायं प्रतियोन्याद्रवति बुद्धान्ताये'ति गमनार्थकधातूत्पन्नक्त्वाप्रत्ययेन प्रतियोन्याद्रवणात् पूर्वकाले गमनं श्राव्यते । अतस्तदनुरोधात् स्वस्थानं हृदयदेशमागत्यैव जागर्तीत्येवं प्राप्त इत्यर्थः ।

सिद्धान्तं व्याकुर्वन्ति अत इत्यादि । श्रुतौ हि प्रतिन्यायमाद्रवणमुक्तम् । तच्चागमनक्रियारूपम् । तादृशी च क्रिया न जागरणं विनोपपद्यते । अतः प्रतिकूलागमनरूपाज्जागरण-

रश्मिः ।

सुषुप्त्युत्क्रान्त्यधिकरणे स्फुटम् । न्यायशब्दं व्युत्पादयन्तिस्म आय इत्यादि । योनिर्बीजम् । गमनादिति । हृदयान्नाड्यात्मनो गमनात् । प्रातिकूल्येन नाड्यात्मभ्यां हृदये गमनम् । भगवत इति । 'आत्मनि चे'ति सूत्रांशेन भगवान् स्थानत्वेनोक्तस्तस्मात् । भाष्ये । यत्र स्थित इति । नाडीषु भगवति च । एवकारः प्रतिन्यायव्यवच्छेदकः । प्रकृते । तत्रेतिभाष्यशब्दार्थमाहुः श्रुताविति । प्रतियोनीति । यतः सम्प्रसादे समागतस्तत्स्थानं योनिस्तल्लक्षीकृत्याद्रवत्यागच्छति तस्मात्प्रतियोन्याद्रवणात् पूर्वकाले चरित्वेति गमनं विषयश्रुतौ श्राव्यते । अत इति । उक्तार्थवाचकपदघटितत्वात् । तदनुरोधाद्विषयश्रुत्यनुरोधात् । स्वस्थानं जीवस्थानम् । आगत्यैवेति । भाष्य एवकारो नास्ति, परं पूर्वपक्षिप्रौढ्योक्तः । पुरीतन्नाडीब्रह्मयोगव्यवच्छेदकः । प्रतिन्यायमिति । 'प्रतिन्यायं प्रतियोन्याद्रवती'त्यनेनोक्तम् । आगमनेति । आद्रवतीत्यस्यागच्छतीत्यर्थात् । न जागरणमिति । 'बुद्धान्ताये'त्युक्तजागरणं फलरूपप्रवर्तकं विना नोपपद्यते । 'प्रयोजनमनुद्दिश्य न मन्दोपि प्रवर्तत' इति वाक्यात् । अत: प्रतीति । फलस्य विवक्षणात् । प्रतिकूलागमनं हृदयागमनं तेन रूप्यते व्यवह्रियते यद्बुद्धान्तरूपं जागरणं इन्द्रियैर्विषयग्रहणं तस्मात्फललिङ्गात् । अत इत्यावर्तते । अतो नाम नाडीभ्य एव प्रबोध इत्यर्थः । एवकारो हृदययोगव्यवच्छेदकः । एवकारस्य

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

न्याद्रवणं तु भगवत इति । किञ्च । प्रबोधोऽस्मात् । अस्मादात्मनः सकाशादेव प्रबोधः । प्रिययेव सम्परिष्वक्तस्य बोधाभावे कथमागमनम् । अत एव सम्परिष्वक्तो निबिडनिद्रः । तस्मात् यत्रैव तिष्ठति, तत एव प्रबोध इति सिद्धम् ॥ ८ ॥

भाष्यप्रकाशः ।

लिङ्गान्नाडीभ्य एव प्रबोधः । युक्तं चैतत् । गर्तपतितस्य प्रबोध एव ततो गमनं लोके यतो दृश्यते । न च 'चरित्वे'त्यस्य विरोधः । 'चर गतिभक्षणयो'रिति भक्षणार्थस्यैव तत्र ग्राह्यत्वात् । 'आनन्दभु'गिति श्रुत्या भोगस्य तत्रोक्तत्वादिति । नच तत्र प्रबुद्धोऽन्यत्र कुतो न गच्छतीति शङ्कनीयम् । श्रुत्यन्तर इन्द्रियाणां यथास्थानं विप्रतिष्ठावदत्र जीवस्य प्रतियोन्याद्रवणं भगवत एव । तस्यैव प्रेरकत्वात् । किञ्च । प्रतियोन्याद्रवणवत् प्रबोधोपि भगवद्धेतुकः । न हि स कर्मणेति वक्तुं शक्यम् । 'अनन्वागतं पुण्येनानन्वागतं पापेने'ति श्रुतेः । किञ्च । तत्र प्राज्ञेन सम्परिष्वक्तः प्रियया स्त्रियेव । न हि तादृशस्य बोधाभावे ततो निर्गत्यागमनं सम्भवति । अत एव सम्परिष्वक्तो निबिडनिद्रः । यदा हि भगवता परिष्वङ्गस्त्यज्यते, तदायं प्रबुध्यते । प्रतियोन्याद्रवति च । एवं सति तदभिप्रायाण्येव 'सत आगत्य न विदुः सत आगच्छामह' इत्यादीनि वाक्यानि । न तु स्थानान्तराभावाभिप्रायाणि । स्थानान्तरसद्भाव उपपत्तेरुक्तत्वात् । अतो यत्रैव स्वपिति, तत एव प्रबुध्यते, न तु हृदयदेशमागत्येति सिद्धम् ॥ ८ ॥

रश्मिः ।

स एवेतिसूत्रादनुकर्षात् । ननु प्रतिकूलागमनं जागरणे हेतुरुक्तः, स हृदयागमनरूपमिति सौत्रो नाडीभ्यः प्रबोधेपीत्येवकारानुकर्षो व्यर्थ इति शङ्कामपनुदन्तो **गर्तेति**भाष्यं विवृण्वन्तिस्म **युक्तं चेति** । दृष्टान्तपूर्वकं विवृण्वन्तिस्म **गर्तेति** । विवशाशयस्येति विशेषणमत्र । लोके यतो दृश्यतेऽतो नाडीगर्तपतितस्य प्रबोध एव बुद्धान्तायैव ततो नाडीगर्तेभ्य एव गमनमित्यर्थः । **विरोध** इति । समस्तस्य गमनासम्भवादिति भावः । एवेति । गत्यर्थयोगव्यवच्छेदकः । **प्रतियोन्याद्रवणमिति**-भाष्यं विवरीतुमाहुः **नच तत्रेति** । नाडीषु । **अन्यत्रेति** । हृदयादन्यत्र । **श्रुत्यन्तर** इति । सप्तान्नब्राह्मणे व्रतमीमांसायां 'वदिष्याम्यहमिति वाग्दध्रे द्रक्ष्याम्यहमिति चक्षु'रित्यादौ । **यथास्थानं** स्वगोलकान्यनतिक्रम्य विशेषेण प्रतिष्ठा तद्वत् **अत्र** सुषुप्तौ **प्रतियोनि**र्हृदयम् । एवेति । रत्वेति श्रुतेः । **किञ्च प्रबोध** इति भाष्यं विवृण्वन्तिस्म **किञ्चे**त्यादिना । **कर्मणेति** । प्रारब्धभोजकेन । **अनन्विति** । पुण्यपापकर्मनिषेधोऽत्र । अत आत्मनः सकाशादेव बोधः, 'आत्मनि चे'ति पूर्वसूत्रे दर्शनात् । एवकारोत्र कर्मयोगव्यवच्छेदकः । **प्रियये**तिभाष्यं विवृण्वन्तिस्म **किञ्च तत्रेति** । **अत एवे**तिभाष्यं विवृण्वन्तिस्म **अत एवेति** । **प्रतियोनीति** । हृदयम् । आङ्पूर्वको द्रु गतौ धातुः । **तदभीति** । भगवत्परिष्वङ्गत्यागाभिप्रायाणि । **इत्यादीनीति** । आदिना 'अहं सर्वस्य प्रभवः' 'मम योनिर्महद्ब्रह्म तस्मिन्गर्भं दधाम्यह'मिति । 'सत आगच्छामह' इति ज्ञानेऽर्जुनस्य तं प्रति न वदेद्भगवान् । एवकारव्यवच्छेद्यमाहुः **नत्विति** । स्थानान्तरं भगवत्परिष्वङ्गः । **उपपत्तेरिति** । श्रुतार्थानुपपत्तेः पूर्वाधिकरण उक्तप्रायत्वात् । स्थानान्तराभावे श्रुतानि नाडीपुरीतद्ब्रह्महृदयान्यनुपपन्नानि भवेयुरिति । अत्रेदं बोध्यम् । 'न विदु'रित्यज्ञानं भगवत्परित्यागहेतुकम् । न तु भगवत्परिष्वङ्गाभावहेतुकमिति । **तस्मा-दिति**भाष्यं विवृण्वन्तिस्म **अत** इत्यादि । **यत्रैवेति** । नाड्यादिषु विकल्पपक्षाश्रयणात् । समुच्चयपक्षानाश्रयात् । एवकारः सुषुप्त्यधिकरणान्तरयोगव्यवच्छेदकः । एवकारव्यवच्छेद्यमाहुः **नत्विति** ॥ ८ ॥

१. हृदयादि ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स एव तु कर्मानुस्मृतिशब्दविधिभ्यः ॥ ९ ॥

किञ्चिदाशङ्क्य परिहरति । ननु प्रिययेव प्राज्ञेनात्मना परिष्वक्तस्य ब्रह्मलोकं गतस्य प्रबोधेन ज्ञाने मुक्त एव भवेत्, न तु पुनरागच्छेत्, अतो भगवदिच्छया देहनिर्वाहाय तत्स्थाने नियुक्तोऽन्य एव जीवः समायातु, अन्यतः प्रबोधे तु स एव, व्यवहारस्तु तावता सेत्स्यति, मुक्त्यर्थं प्रयत्नस्तु न कर्तव्य इत्याशङ्क्य, परिहरति तुशब्दः ।

अस्मादपि प्रबोधे स एव । कुतः । कर्मानुस्मृतिशब्दविधिभ्यः । चत्वारो हेतवः । लौकिकवैदिकयोर्ज्ञानकर्मभेदात् । तत्र लौकिके कर्मणि सामिकृतकर्मणः शेषसमापनात् । न हि कश्चिदपि सुप्तप्रबुद्धः[1] सामिकृतं न समापयतीति क्वचित् सिद्धम् । तथानुस्मृतिः । न हि पूर्वदृष्टं न स्मरतीति क्वचित् सिद्धम् । शब्दाश्च 'पुण्यः पुण्येन कर्मणा भवति, पापः पापेन' 'क्वैष तदाभूत्, कुत एतदागा'दिति,

---

भाष्यप्रकाशः ।

स एव तु कर्मानुस्मृतिशब्दविधिभ्यः ॥ ९ ॥ सूत्रमवतारयन्ति किञ्चिदित्यादि । एतेनाधिकरणान्तरत्वं निवारितम् । तुशब्दव्याख्यानमुखेन शङ्कां व्याकुर्वन्ति नन्वित्यादि । अत्र समायात्वित्यन्तमेक आक्षेपः । अन्यत इत्यादिस्त्वन्यः । तथाच लाघवात् द्वितीयः पक्ष एवादर्तव्य इति युक्तम् । किञ्च, अन्यस्मिन् जीवे तत्रागते पितृपुत्रभर्तृभार्यादिव्यवहारविघातापत्तौ स भगवता योगिप्रवेशन्यायेन सेत्स्यतीति कल्प्यम् । किञ्च । मुक्त्यर्थं यत्नस्तु न कर्तव्यः । निद्रयैव तत्सिद्धेः । तेन साधनशास्त्रवैफल्यम् । अन्यतः प्रबोधे तु न कश्चिदपि दोष इति स एवादर्तव्य इत्याशङ्क्येत्यर्थः ।

परिहारं व्याकुर्वन्ति अस्मादित्यादि, सिद्धमित्यन्तेन लौकिकं हेतुद्वयमुक्तम् ।

रश्मिः ।

स एव तु कर्मानुस्मृतिशब्दविधिभ्यः ॥ ९ ॥ निवारितमिति । शङ्काव्यावर्तकत्वेन पूर्वपक्षाव्यावर्तकत्वात् । तुशब्देति । मुखमुपायः । समायात्वित्यन्तमिति । अत्र भाष्य एवकारः 'न स पुनरावर्तत' इति श्रुतेः । अन्यत इति । नाडीतः । स इत्यादि । स व्यवहारः भगवता व्यापकेण सर्वपित्रादिरूपिणा योगिप्रवेशन्यायेन राजादिव्यवहारन्यायेन । मुक्त्यर्थमिति-भाष्यं विवृण्वन्तिस्म मुक्त्यर्थमिति । निद्रयैवेति । सुषुप्तेस्तृतीयावस्थात्वेनैवकारः । तत्सिद्धेः 'स्वाप्ययसम्पत्त्योरन्यतरापेक्षमाविष्कृतं ही'त्याविष्कृतेन सायुज्ये मुक्तिसिद्धेः । तेनेति । अस्य साधनस्य सकलसाधारण्येन । तत्रागतजीवस्यान्यत्वेन च । स एवेति । द्वितीय एव । निर्दुष्टत्वादेवकारः । परिहारमिति । ॐमिति परिहारम् । अङ्गीकारेण परिहारस्य दृष्टत्वात् । अस्मादित्यादीति । नाडीतोस्मादात्मनोपि प्रबोधे स एव समायाति । लौकिके होलाकाद्युत्सवाख्ये कर्मणि । न स्मरतीति । अनु न स्मरतीत्यर्थः । शास्त्रक्रमेण पूर्वं कर्मोदाहृतम्, पश्चाज्ज्ञानम् । क्वैष तदेति । दृप्तबालाकिब्राह्मणस्थम् । तदेति । सुप्तकाले । 'सति सम्पद्ये'त्यादिश्रुतिः स्पष्टा । आदिशब्दार्थो व्याख्यातः ।

---

1. सुप्तप्रतिबुद्ध इति पाठः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तथा 'सति सम्पद्ये'त्यादयश्च । विधयश्च 'श्वोभूते ब्रह्माणं वृणीते' 'श्वोभूते शेषं समाप्नुयात्' 'एक एव यजेत' 'द्वादशरात्रीर्दीक्षितः स्या'दित्यादि, 'यः कामयेत वीरो म आजायेते'त्यादयः । भगवतैव मर्यादारक्षार्थं तथा करणात् । पूर्वपक्षयुक्तयो दुर्बलाः । तस्मात् स एव प्रतिबुध्यते ॥ ९ ॥

भाष्यप्रकाशः ।

वैदिकं हेतुद्वयं व्याकुर्वन्ति शब्दाश्चेत्यादि । तथाच सौषुप्तिकसत्सम्पत्त्या मुक्तौ पुण्यपापात्मकफलाभावादुक्तवाक्यं विरुध्येत । 'कैष' इत्यत्रा'प्येष' इत्यनेन सुप्तं आगतं चैकमेव परामृशति । तदपि विरुध्येत । 'सति सम्पद्ये'त्यत्रापि सर्वासां प्रजानामज्ञानं वदति । यदि ता मुक्ताः स्युः, तदा अज्ञानोक्तिरपि विरुध्येत । अत एते शब्दाः सुप्तप्रबुद्धस्यैकस्यैव ज्ञापकाः । एवं विधयोपि । ननु भवत्वेवमेकः, तथापि भगवत एव प्रबोधे मुक्त्यापत्तिः कथं परिहर्तव्येत्यत आहुः भगवतेत्यादि ।

अयमर्थः । 'नायमात्मे'ति श्रुत्या भगवज्ज्ञानं प्रति वरणमेव साधनम् । तच्च मर्यादायां साधनद्वारैवेति मर्यादारक्षार्थं भगवता बोधसमये मुक्त्यजनकस्याज्ञानकरणात् न मुक्तिरिति शेषः । 'सति सम्पद्य न विदुः सति सम्पद्यामह' इत्यादिश्रुत्या तथा निश्चयात् । अतः पूर्वपक्षयुक्तीनां दुर्बलत्वात् भगवतः सकाशात् प्रबोधेपि स एव प्रबुध्यत इत्यर्थः ॥ ९ ॥

रश्मिः ।

पुराणस्यापि वेदत्वात् । एक एवेति । द्वितीयादिजीवपत्यृत्विग्योगव्यवच्छेदकः । मे इति । मत्तः । वैदिकज्ञानकर्मणोः सिद्धार्थमाहुः तथाचेति । मुक्ताविति । अद्वैतरूपायाम् । पुण्यपापाभ्यां कर्मभ्यां आत्मा स्वरूपं यस्य मुक्तिरूपफलस्य तदभावात् । 'पुण्यपापे विधूय निरञ्जनः परमं साम्यमुपैती'ति श्रुतेः । उक्तवाक्यं पुण्यपापरूपसाधनसत्ताया मुक्तौ बोधकं वाक्यम् । तदन्यजीवपक्षे विरुध्येतेत्यर्थः । आगतमिति । हृदयान्नाडीष्वागतं जीवम् । एकमेवेति । एष इत्येकवचनादेवकारो द्वितीयादिजीवयोगव्यवच्छेदकः । तदपि एकत्वमपि । ता इति । प्रजाः । एत इति । 'पुण्येन' 'पापेन' 'एषः' 'न विदु'रित्यादिशब्दाः । एकस्यैवेति । द्वितीयादिजीवयोगव्यवच्छेदकैवकारः । एवमिति । वृणीतेत्येकवचनात् । समाप्नुयादित्येकवचनात् । 'एक एवे'ति सावधारणात् । 'द्वादशरात्री'रित्यत्यन्तसंयोगे द्वितीया । 'दीक्षित' इत्येकवचनाच्च । एवमग्रेपि । एवं विधयोपि सुप्तप्रबुद्धस्यैकस्यैव ज्ञापका बोध्याः । एक इति । नान्यः । भगवत एवेति । पञ्चम्यन्तं पदम् । एवकारो नाडीयोगव्यवच्छेदकः । मर्यादापदेन मर्यादामार्गं गृहीत्वा वरणशब्देन स्वकीयेन स्वीकारं गृहीत्वा व्याचक्रुः अयमिति । भगवज्ज्ञानमिति । स्मार्तः प्रयोगः । गीतायां तथादर्शनात् । श्रौतवरणपदार्थः । लभ्यः प्राप्तव्यः । सा च वरणव्यापारज्ञानमन्तरा न भवतीति । एवेति । ज्ञानयोगव्यवच्छेदकः । ज्ञाने सति वरणेन व्यापारेण लभ्य इत्यस्य सुवचत्वात् । एवेति । भक्तिहेतुनिर्णयग्रन्थोक्तपुष्टिमार्गीयकेवलानुग्रहयोगव्यवच्छेदकः । अत्र साधनं मुक्त्यजनकस्याज्ञानम् । तेन सुषुप्तिमर्यादारक्षार्थम् । भगवतेति । अत्र भाष्ये एवकारः स इच्छायोगव्यवच्छेदकः । भगवति सतीच्छाऽप्रयोजिकेति ज्ञापकः । नाडीयोगव्यवच्छेदको वा । इत्यादीति । आदिना 'इमाः सर्वाः प्रजा अहरहर्गच्छन्त्य एतं ब्रह्मलोकं न विदन्तीति' 'न विदु'रिति निश्चयादिति । न विदुरितिशब्दाभ्यां तथा । पूर्वपक्षेतिभाष्यं विवृण्वन्तिस्म अत इत्यादि । 'व्यवहारस्त्वि'त्यादिभाष्योक्तानाम् । प्रबोधेपीति । नाडीप्रबोधसमुच्चायकोपिः । स एवेति । नान्यः ॥ ९ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मुग्धेऽर्धसम्पत्तिः परिशेषात् ॥ १० ॥

किञ्चिदाशङ्क्य परिहरति । ननु यत्र कर्मानुस्मृतयो न सन्ति, तत्रान्यो भविष्यति, क्वचिन्मूर्च्छादिविशेषे सर्वस्मृतिनाशेन मुग्धभावदर्शनात्, तत्र यथा लौकिकवैदिकव्यवहाराः, तथान्यत्रापि भविष्यन्ति, अनुस्मरणादयश्च बुद्धिवृत्तयः, गङ्गाप्रवाहजलस्य गङ्गावत्, य एव चिदंशस्तत्रायाति, स एव तथा भवतु, किं स एवेति निर्बन्धेनेत्याशङ्क्य परिहरति ।

भाष्यप्रकाशः ।

मुग्धेऽर्धसम्पत्तिः परिशेषात् ॥ १० ॥ सूत्रमवतारयन्ति किञ्चिदित्यादि । एतदेव विभजन्ते नन्वित्यादि । यत्रैते हेतवः सन्ति, तत्र स एव भवतु । यत्र पुनरैक्यसाधका एते हेतवो न सन्ति, यथा मूर्च्छाविशेषनिवृत्त्यनन्तरमतिमुग्धे अमरुनामके राजनि । तद्देहे शङ्कराचार्यजीवप्रवेशस्य लोके प्रसिद्धेः । अतस्तादृशे मुग्धे यथा लौकिकवैदिकव्यवहाराः, तथा सौषुप्तिकेऽप्यन्यजीवे भविष्यन्ति । किञ्च । अनुस्मृत्यादयो बुद्धेर्वृत्तयः, ता जाग्रत्यपि नाना भवन्ति । अतो गङ्गाप्रवाहे पतितस्य जलान्तरस्यापि यथा गङ्गावत् व्यवहारः, तथा य एव चिदंशस्तस्मिन् बुद्धिवृत्तिप्रवाह आयाति, स एव पूर्वकर्मसमापनकर्ता भवतु । एवं शब्दा विधयश्च बुद्ध्यैक्यमादायैव नेतव्या इति लौकिकवैदिकव्यवहारसिद्धौ किं स एव समायातीति निर्बन्धेनेत्याशङ्क्य परिहरतीत्यर्थः ।

परिहारं व्याकुर्वन्ति मुग्ध इत्यादि । मूर्च्छाद्यनन्तरं जीवतो मुग्धभावे अर्धसम्पत्तिः तत्तदितरानिश्चायिका साधारण्येव बुद्धिर्विचारकस्य भवति, न सर्वा, नान्यतरनिश्चायिकेत्यर्थः ।

रश्मिः ।

मुग्धेऽर्धसम्पत्तिः परिशेषात् ॥ १० ॥ एते हेतव इति । 'अनुस्मरणादयश्च बुद्धिवृत्तय' इति भाष्यात् । **अन्यजीव** इति । 'ननु प्रियेयेवे'ति भाष्योक्ते । **न सन्तीति** । 'तत्रान्यो भविष्यती'तिभाष्यमत्र ज्ञेयम् । दृष्टान्तमुखेन **क्वचिन्मूर्च्छादी**तिभाष्यार्थमाहुः **यथा मूर्च्छेति** । मूर्च्छाविशेषो मरणमूर्च्छाभिन्नः । **अतिमुग्धे** इति । एकदेशविकृतिन्यायेन भाष्ये मुग्धशब्द इत्याशयः । भाष्ये मूर्च्छादीत्यत्रादिशब्देनाघातः । **राजनीति** । सर्वस्मृतिनाशेन मुग्धभावदर्शनादिति भाष्यं योजनीयम् । सर्वस्मृतिनाशो 'मेनेऽसन्तमिवात्मान'मिति वाक्योक्त इव । अत्र हेतुः **तद्देह** इत्यादिः । **तत्र यथे**तिभाष्यं विवृण्वन्तिस्म **अतस्तादृश** इति । **तथान्यत्रापी**ति भाष्यविवरणं **तथा सौषुप्तिकेत्यादि** । **अन्वि**त्यादिभाष्यं विवृण्वन्ति स्म **किञ्चे**ति । 'अनुस्मरणादय' इत्युक्ते शाङ्करोक्तोपाधिबुद्धिसरणमाकस्मिकं स्यात्तदर्थं लाघवाय सौत्रानुस्मृतिशब्दपुरःसरं व्याकुर्वन्तिस्म **अनुस्मृत्यादय** इति । 'बुद्धेर्गुणेनात्मगुणेन चैव आराग्रमात्रो ह्यपरोपि दृष्ट' इति श्रुतेर्जीवोपाधिबुद्धेर्वृत्तयः । आदिना पूर्वदृष्टस्मरणानुव्यवसायस्मृतस्मरणे । **य एवेति** । अन्ययोगव्यवच्छेदकः । **बुद्ध्यैक्य**मिति । बुद्ध्यैक्यमेवादाय । जीवैक्ययोगव्यवच्छेदकैवकारः । **स एवेति** । अन्ययोगव्यवच्छेदक एवेति । नान्यः समायातीति । **गङ्गे**त्यादिभाष्यस्य गङ्गाप्रवहणजले प्रवहणक्रिययैक्यप्राप्ते जले । कर्मादीनां सम्बन्धसामान्यविवक्षायां षष्ठी । गङ्गाम्बुवपुस्तद्वदित्यप्यर्थः । **मूर्च्छादीति** । आदिनाघात इत्युक्तम् । **तत्तदिति** । तत्तत् च यत् इतरत् तत्तदितरत् । कर्मधारयः । तस्यानिश्चायिका । **साधारण्येव**, ननु तत्तद्विषयिकाऽसाधारणीत्येवकारार्थः । सापि विचारकस्य, अविचारकस्य तु राजामरुवत्सर्वापि । **नान्यतरेति** । तयोस्तयोः संशयविषययोरन्यतरस्य निश्चायिका । ततश्च तयोः संशायिकेति सर्वेत्यु-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मुग्धे मुग्धभावे अर्धसम्पत्तिरेव, न सर्वा । नहि मुग्धस्य यज्ञादावधिकारोऽस्ति । पूर्वप्रवृत्तानि तु जीवनाधिकारात् क्रियन्ते । लौकिकव्यवहारोपि नापूर्वः सिध्यति । पूर्वोक्तहेतुसद्भावे तु न कोपि दोषः । अतो मुग्धे अर्धसम्पत्तिः पूर्वैव, नोत्तरा । कुत एतत् । परिशेषात् । स एव वा, न वेति निश्चयप्रमाणानामभा-

भाष्यप्रकाशः ।

कथमर्धेत्याकाङ्क्षायामेतदेव व्युत्पादयन्ति न हीत्यादि । **मुग्धस्येति** । मूर्च्छोपरतावपि निवृत्तपूर्वसंस्कारस्य ।

अयमर्थः । शास्त्रार्थवत्त्वाधिकरणे कर्तृत्वं जीवगतमेव, न तूपाधिगतमिति स्थितम् । अतः शब्दा विधयश्च जीवमेव विषयीकुर्वन्ति । तत्र 'अर्थी समर्थो विद्वा'नित्यादिनोक्तो यो यज्ञादावधिकारः, स मुग्धस्य तस्यापि नास्ति, अर्थित्वाद्यभावात्, अतोऽपूर्वाणि न क्रियन्ते । पूर्वप्रवृत्तानि त्वग्निहोत्रादीनि जीवनाधिकारात् क्रियन्ते । एवं लौकिकव्यवहारोपि पूर्व एव निर्वहति, नापूर्वः कोपि सिध्यति । असिद्धे च तस्मिंस्तत्र स वा, अन्यो वेति निर्णेतुं न शक्यते । लोके अमरुशरीरे अन्यस्यैव, ब्रह्मवैवर्तब्रह्मखण्ड उपबर्हणगन्धर्वशरीरे तस्यैव प्रवेशस्मरणात् । वसिष्ठोपदिष्टविस्मृतमन्त्रपूजादेस्तत्पत्न्या बोधनेनातिमुग्धताया अपि स्मारणाच्च । अतो यत्र मुग्धभावानन्तरं कर्मानुस्मृत्यादिहेतूनां सद्भावः, तदा तु स एव तत्र जीव इति न कोपि शब्दादिविरोधदोषः । यत्र पुनरनुस्मृत्याद्यभावः, तत्र, अत उक्तदोषात् हेतूनां पूर्वैव संपत्तिः, नोत्तरेत्यर्धैव विचारकस्य बुद्धिरित्यर्थः । अत्र पृच्छति कुत इत्यादि । एतत् अर्धमपि कुत इत्यर्थः । तत्रार्धसत्तायां हेतुं विवृण्वन्ति स एव वा न वेत्यादि । प्रसक्तप्रतिषेधे[1] यः प्रसक्तस्तदप्रतियोगी स परिशेषः ।

रश्मिः ।

च्यते । **शास्त्रार्थेति** । गताध्यायेऽस्ति । **एवेति** । उपाधिव्यवच्छेदकः । तदेवाहुः **नत्विति** । **जीवमेवेति** । न तूपाधिम् । **उक्त इति** । क्वचिच्छास्त्रे उक्तः । **तस्यापीति** । विचारकस्यापि । **पूर्वेति**भाष्यं विवृण्वन्ति स्म **पूर्वप्रवृत्तानीति** । **जीवनेति** । 'यावज्जीवमग्निहोत्रं जुहोती'ति श्रुत्या । **लौकिके**तिभाष्यं विवृण्वन्ति **एवं लौकिकेति** । **पूर्व एवेति** । अपूर्वयोगव्यवच्छेदकः । **सिध्यतीति** । पूर्वकर्मवदपूर्वकर्मणि विध्यभावान्न सिध्यति । **तस्यैवेति** । गन्धर्वस्य । एवकारेण नान्यस्य । **वसिष्ठेति** । गन्धर्वस्य । **पूर्वोक्ते**तिभाष्यं विवृण्वन्ति स्म **अतो यत्रेति** । **स एवेति** । हेतुसत्त्वे साध्यसत्त्वनियमादेवकारः । **न कोपीति** । साधारण्यादिहेत्वाभासरूपोपि । शब्दादिसहानवस्थानलक्षणविरोधरूपो दोषः । **अत** इतिभाष्यं विवृण्वन्ति स्म **यत्र पुनरिति** । गन्धर्वे । **उक्तेति** । शब्दादिविरोधदोषात् । **पूर्वैवेति** । कर्मरूपा । एवकारः उत्तरानुस्मृत्यादियोगव्यवच्छेदकः । तेनार्धा कर्मसम्पत्तिः । **नोत्तरेति** । अनुस्मृतिशब्दविधिरूपा । नेत्येवमेवकारव्यवच्छेद्योत्तरा सम्पत्तिरुक्ता । तेनार्धसम्पत्तिरंशसंपत्तिः । अर्धसम्पत्तित्वेनार्धसम्पत्तिस्वीकारः । **अर्धमपीति** । अपिनांशरूपं गौणार्धम् । **अर्धसत्तायामिति** । गौणमुख्यार्धसत्तायाम् । **हेतुं** विशेषम् । स वान्यो वेत्युक्ते संशय एवकारघटितत्वे प्रत्यभिज्ञेत्याशयेन विवृण्वन्ति स्म **प्रस्तुते** ति । प्रस्तुतं पूर्वसूत्र एक्यं हेतुचतुष्टयकं तस्य प्रतिषेधः नवेति द्वितीयकोट्युक्तः । तस्मिन् सति यः प्रसक्तोऽभावः तत्प्रतियोगिहेतुचतुष्टयकमैक्यम् । तदप्रतियोगी

१. प्रसक्तेत्यत्र प्रस्तुतेति रश्मिपाठः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वादर्थात् सन्देहोऽवशिष्यते । तस्मात् सन्देहान्मुग्धे अर्धप्रतिपत्तिः ।

भाष्यप्रकाशः ।

प्रकृते च स एवायं न वेति सन्देहे एकतरनिश्चयजनकप्रमाणानामभावात् सन्देह एवार्थान्निषेधाप्रतियोगित्वेनावशिष्यते । अतः स एव परिशेष इत्यर्थः । सिद्धमाहुः तस्मादित्यादि । उक्तविधात् परिशेषरूपात्सन्देहान्मुग्धेऽर्धप्रतिपत्तिरर्धं ज्ञानं विचारकस्य, तस्मादेव पूर्वा संपत्तिः, न तु निश्चयात् । अतो मुग्धदृष्टान्तेन न सौषुप्तिकसिद्धान्तभङ्ग इत्यर्थः । किञ्च, अत्र प्रतिपत्त्यादिपदमनुक्त्वा यत् संपत्तिपदमुक्तम्, तेन मुग्धे मूर्च्छितेऽर्धसंपत्तिः । यथा नाडीषु सतो नैकट्यात् दुःखाभावमात्ररूपार्धसंपत्तिः, तथेति बोध्यते । तेन कालीयदमनस्थले मूर्च्छितस्यार्धसंपत्त्या इन्द्रियाणां प्राणानां च पुनरागमनं यदुक्तम्, तदपि न विरुध्यत इति बोधितम् । अनुस्मृत्या च स एव जीव इत्यपि । अविचारस्तु जीवावस्थाभावत्वादेवेति च । एवमत्र प्रासङ्गिकपरिहारेण सुषुप्तः प्रबुद्धः स एव, न त्वन्य इति निर्णीतम् ।

अन्ये तु । अस्मिन् सूत्रे मुसलाद्यभिघातजन्यां मूर्च्छां विचारयन्तो, 'जाग्रत्स्वप्नः सुषुप्त'मिति तिस्रोऽवस्था बृहदारण्यके जीवस्योक्ताः, ताः पूर्वं विचारिताः, उत्क्रान्तिश्चतुर्थी, साग्रे विचारयिष्यते, इयं तु न जाग्रत्स्वप्नयोरन्तर्भवति, ज्ञानाभावात्, नापि सुषुप्तौ, निमित्तभेदादाकारभेदाच्च, नापि मरणे, प्राणोष्मणोरुपलम्भात्, अतः परिशेषादियं पञ्चमीत्याहुः ।

रश्मिः ।

स एव वा नवेति सन्देहः स परिशेष इत्यर्थः । **सन्देह** इति । प्रत्यभिज्ञाविषयविषयके सन्देहे द्वितीयकोटिसहिते । कोट्योरेकतरनिश्चये प्रमाणानां शब्दयोगिप्रत्यक्षानुमानानामभावात् । **सन्देह एवे**ति । एकतरयोगव्यवच्छेदकैवकारः । **स एवे**ति । सन्देहः । एवकारः पूर्ववत् । **अर्धं ज्ञान**मिति । सन्देहार्धं स एवेति ज्ञानम् । **तस्मादेव** अर्धज्ञानात् । **एवे**ति । कर्मयोगव्यवच्छेदकः । गौणत्वात् । किञ्च, ननु स एवेत्येकविषयकान्निश्चयात् । पूर्वोत्तरीयभावाभावात् । **अत** इति । आभ्यां सन्देहात् परिशेषरूपात् निश्चयाभावाच्चेत्यर्थः । **मुग्धे**ति । सुषुप्तिः स एवेत्यैक्यवती कर्मानुस्मृतिशब्दविधिभ्यः सैवेयं दीपमालिकेतिवत् । अस्य सौषुप्तिकसिद्धान्तस्य । मुग्धदृष्टान्तेन सुषुप्तिः न स एवेत्यैक्यवती । परिशेषात् । मुग्धवदिति सत्प्रतिपक्षाद्भङ्गो नेत्यर्थः । **किञ्च, अत्रे**ति । सूत्रे । **तेने**ति । सत्स्मारकेण सम्पत्तिशब्देन । 'सता सौम्य तदा संपन्नो भवती'त्यत्र सत्सम्पत्तिरित्यत्र च सम्बन्धावधारणादेकसम्बन्धिज्ञानमपरसम्बन्धिस्मारकमिति सत्स्मारकत्वम् । हेतुचतुष्टये कर्मरूपार्धसम्पत्तिः स एवेत्यर्धसम्पत्तिः सन्देहे । मोक्षेऽर्धसम्पत्तिं दृष्टान्तेनाहुः **यथे**ति । **दुःखे**ति । 'दुःखाभावः सुखं चैव पुरुषार्थद्वयं मत'मिति मोक्षेऽर्धसम्पत्तिर्दुःखाभावरूपा । असौत्री नात्र दार्ष्टान्तिके सन्देग्धव्या । **मूर्च्छितस्ये**ति । नन्दादिषु यस्यकस्यचिन्मुग्धस्य त्रिविधार्धसम्पत्तिः । **यदुक्त**मिति । श्रीभागवते यदुक्तम् । ननु नन्दादीनां गर्गोपदिष्टानां कुतो न 'नारायणसमो गुणै'रित्यस्य विचारो मोहजनक इत्याशङ्क्याहुः **अविचार** इति । विचारस्य न जीवावस्थात्वम् । प्रकरणं तु जीवावस्थानामिति भावः । एवकारो मोहयोगव्यवच्छेदकः । **अत्रे**ति । सूत्रद्वये । प्रासङ्गिक आशङ्काविषयस्तस्य परिहारेण । **स एवे**ति । उक्तद्वितीयकोटिकः । **नत्वन्य** इति । प्रथमकोटिको नेत्यर्थः । **निमित्ते**ति । मूर्च्छाया मुशलाद्यभिघातो निमित्तम् । सुषुप्तौ तु तमः । 'न किञ्चिदवेदिष'मिति तमःकार्याज्ञानकथनात् । **इति भेदात्** । **उपे**ति । मूर्च्छायां

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

न तत्र प्राणायनविघातकृता मूर्च्छा विचार्यते । तस्याः प्राणधर्मत्वात् । यथा बाल्यं शरीरधर्मः । व्यर्थश्च विचारः । जीवावस्था एव हि विचार्यन्ते । केवलसाक्षिवादस्तु न ब्रह्मवादः । तस्मादेक एव जीवः स्वप्नादिदोषसम्बन्धरहितस्तादृशजन्म-

भाष्यप्रकाशः ।

तत् दूषयन्ति न तत्रेत्यादि । तत्रावस्थासु इन्द्रियादिस्थानभूतगोलकाभिघातकृता मूर्च्छा तु न विचार्यते, तस्याः प्राणानां स्वस्थानपरित्यागेन जायमानतया प्राणधर्मत्वात्, अतो यथा बाल्यं शरीरधर्मो न विचार्यः, तथेयमपि । किञ्च, अयं व्यर्थो विचारः । यथा भवन्मते नाड्यः पुरीतद्वा सुषुप्तिस्थानमिति विज्ञानेन न किञ्चित्प्रयोजनम्, तथैतज्ज्ञानेनापि न किञ्चित् प्रयोजनम् ।

यत् पुनर्भामत्याम्, एतस्या अवस्थान्तरत्वे तत्प्रविलयाय यत्नान्तरमास्थेयमित्येतद्विचारप्रयोजनमुक्तम् । तदपि तदा युज्येत, यदि सूत्राणि संसारव्यवहाराय प्रवृत्तानि स्युः । आराज्ज्ञानोपयोगस्तु शरीरारोग्यस्याप्यस्तीति वयसः स्थापनमपि सूत्रे विचारयेत् । अतो न किञ्चिदेतत् ।

नच जीवस्य केवलं साक्षित्वात् सर्वा अप्यवस्थास्तदुपाधीनामेवेति प्राणावस्थारूपाया अस्या अपि विचारे को दोष इति वाच्यम् । यतः केवलसाक्षिवादो न ब्रह्मवादः । 'सुषुप्त्युत्क्रान्त्योर्भेदेने'त्यत्र सम्यङ्निवारितत्वात् । अतोऽस्या जीवावस्थात्वाभावाद्व्यर्थैवैतद्विचार इत्यस्य सूत्रस्य सुषुप्त्यधिकरणशेषत्वमेव युक्तमित्यर्थः ।

भास्कराचार्यैस्तु केवलसाक्षिवादेऽन्यद्दूषणमुक्तम् । येषामीश्वर एव साक्षात् संसारीति दर्शनम्, तेषां न पूर्वपक्षोऽवकल्पते, न सिद्धान्त इति । तथाच 'स एव त्वि'ति सूत्रवैयर्थ्यापात इति तेषामाशयः ।

सिद्धमाहुः तस्मादित्यादि । यस्मादस्मिन्नधिकरणे यः सुप्तो भवति, स एव प्रबुध्यत इति सिद्धम्, पूर्वाधिकरणे च स्वप्नादेर्मिथ्यात्वम्, पूर्वपादे च योग्यशरीरावाप्तिप्रकारः सिद्धः, तस्मादेक एवेत्यादिना यदुक्तम्, तत् सिद्धमित्यर्थः ।

भिक्षुस्तु । एतां मूर्च्छां सुषुप्तिविशेषत्वेनाङ्गीकृत्य, मुग्धे अस्पष्टज्ञाने पुरुषे अर्धसंपत्तिरूपा

रश्मिः ।

तथा । **न तत्रेत्यादीति** । नत्वत्रेत्यपि क्वचिद्भाष्यपुस्तके पाठः । **तस्या** इति भाष्यं विवृण्वन्ति स्म **तस्या** इत्यादि । मूर्च्छायाः प्राणपरित्यागेनेत्याद्यग्रे स्पष्टम् । **यथे**तिभाष्यं विवृण्वन्ति स्म **अतो यथेति** **व्यर्थ** इतिभाष्यं विवृण्वन्तिस्म **किञ्चेति** । **इत्येतदिति** । इत्येतज्ज्ञानं विचारप्रयोजनम् । **आरादिति** । संसारव्यवहाराय प्रवृत्तानीत्यङ्गीकार **आराज्ज्ञानोपयोगः** दूरज्ञानोपयोगः । **शरीरेति** । वयसः स्थापनस्य । अतो न किञ्चिदेतत् । किन्तु जीवावस्था एव विचार्यन्त इति । एवकारेण प्राणधर्मयोगव्यवच्छेदः क्रियते । **केवलेति** भाष्यं विवरीतुमाहुः **नचेति** । **एवेति** । साक्षियोगव्यवच्छेदकः । विवृण्वन्तिस्म **यतः केवलेति** । **सुषुप्त्यधीति** । तव मते तथा । **एवेति** । अवस्थात्रयप्रसिद्ध्या तुरीयाकाङ्क्षायां चतुर्थीति, नतु पञ्चमीत्येवकारः । **ईश्वर एवेति** । अवधारणविषय ईश्वरः । **साक्षादिति** भिन्नजीवः, न संसारी । **न पूर्वपक्ष** इति । स एवान्यो वा प्रतिबुध्यत इत्यनियमरूपः पूर्वपक्षो न, तथा स एवेति नियमरूपसिद्धान्तो न । पूर्वपक्षस्यान्यो वेति भेदघटितत्वात् । **सिद्धान्ते** स एवेत्यत्र भेदघटितान्ययोगव्यवच्छेदकैवकारघटितत्वादवकल्पत इत्यर्थः । **तथाचेति** । स एवेतिसूत्रविषये भास्करभाष्ये च । **तेषामिति** । भास्कराचार्याणाम् । **एक एवेति** । भाष्येण । **भिक्षुरिति** । भगवान् भिक्षुः । **अर्धसंपत्तिरूपेति** । सुखमहमस्वाप्समित्यर्धसम्पत्तिरूपा इयमेव अस्पष्टज्ञानम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

युक्तो भगवज्ज्ञानरहितो ज्ञानाधिकारीति सिद्धम् ॥ १० ॥

इति तृतीयाध्याये द्वितीयपादे तृतीयमतः प्रबोध इत्यधिकरणम् ॥ ३ ॥

भाष्यप्रकाशः ।

सुषुप्तिर्भवति, यथा संप्रज्ञातासंप्रज्ञातभेदेन योगो द्विविधो भवति, तथा सुषुप्तिरपीति । इमां च ब्रह्मण्यर्धसंपत्तिरूपां सुषुप्तिमधिकृत्य, 'आनन्दभुक् चेतोमुखः प्राज्ञः' 'जाग्रत्स्वप्नसुषुप्त्यादिप्रपञ्चं यत् प्रकाशत' इत्यादिश्रुतयः प्रवृत्ता इत्याह ।

तन्न । श्रुतीनां या प्रवृत्तिः, सा नाडीषु सुषुप्तिमादायाप्युपपद्यमाना न मोहावस्थामपेक्षत इति न श्रुतिभ्यस्तत्रान्तर्भावः शक्यवचनः । सुखदुःखमोहानुस्मृतीनां रोमहर्षवेपथुवैकृत्यादीनां च दर्शनेन सुषुप्तेः सकाशाद्भेदस्य स्वयमेवाङ्गीकारात् तस्याः सुषुप्तावन्तर्भावेपि हेत्वभावः । नचायोगिनां जीवद्दशायां बृहदारण्यकेऽवस्थात्रयस्यैवोक्तत्वाज्जाग्रत्स्वप्नयोर्वैलक्षण्ये परिशेषात् सुषुप्तावन्तर्भाव इति युक्तम् । परिशेषस्य मरणार्धसंपत्तावपि तौल्यात् । नच पुनरुत्थानान्न मरणेऽन्तर्भाव इति वाच्यम् । नामभ्रान्त्या यमदूतनीतानामपि पुनरुत्थानात् । षष्ठस्कन्धे चित्रकेतुसुतस्य पुराणान्तरेषु सावित्रीपत्युः सत्यवतश्च पुनरुत्थानकथनाच्च ।

अतो मरणं सर्वप्राणदेहसंबन्धोपरतिः, मूर्च्छा तु सूक्ष्मप्राणदेहसंबन्धावस्थितिरिति रामानुजाचार्योक्तमेवात्र युक्तम् । परमेतद्विचारस्यात्र प्रयोजनं तैरपि नोक्तम् ।

माध्वास्तु भिक्षुवदेवाङ्गीकुर्वन्ति ॥ १० ॥ **इति तृतीयमतः प्रबोध इत्यधिकरणम् ॥ ३ ॥**

रश्मिः ।

सम्प्रज्ञातेति । सबीजनिर्बीजसमाधिः । 'परो हि योगो मनसः समाधि'रिति वाक्यात् । तत्र शब्दार्थज्ञानविकल्पे संकीर्णा सवितर्का समापत्तिः । **तत्रेति** । समापत्त्योर्मध्ये । स्मृतिपरिशुद्धौ स्वरूपशून्येवार्थमात्रनिर्भासा निर्वितर्केति तयोर्लक्षणे । **इमामिति** । सम्प्रज्ञातसमाधिवदस्पष्टज्ञानरूपाम् । **आनन्दभुगिति** । सुखमहमस्वाप्समित्यर्थे सुखत्वेनानन्दभुक् मनोबुद्धिचेतस्सु सुषुप्तिश्चेतोमुखः चेतउपाया चेतःकरणा । प्राज्ञस्तु सुषुप्तिसाक्षी । **यदिति** । यदव्ययं प्रकाशते । अत्र यदव्ययं प्राज्ञः । **इत्यादीति** । आदिना 'यत्र न कंचन कामं कामयते न स्वप्नं पश्यती'ति । वितण्डां वारयन्ति स्म **न मोहेति** । मूर्च्छावस्थां नापेक्षते । **तत्रान्तरिति** । अवस्थात्रये मूर्च्छान्तर्भावः । **रोमेति** । आदिना स्नेहः । **स्वयमिति** । भगवता भिक्षुणैव । नान्येन युक्तिं सहपक्षकेण । **तस्या** मूर्च्छायाः । **एवेति** । अन्यावस्थाव्यवच्छेदकः । **मूर्च्छा** सुषुप्त्यन्तर्भूता । अवस्थात्रयबोधकबृहदारण्यकात् । जाग्रत्स्वप्नवैलक्षण्यपरिशेषवत् इत्यनुमानमाहुः **नचायोगिनामिति** । अयं हेतुः हेतुतावच्छेदकलाघवे उक्तो हेतुः । **परिशेषादिति** । शङ्कराचार्यजाग्रत्स्वप्नवदिति स्फुटम् । अतः सन्देहात् सुषुप्तौ स्वप्नवज्जाग्रतोप्यन्तर्भावः । अयं दृष्टान्तः । **सुषुप्तावित्यादिसाध्यम्** । **स्मरणादिति** सौत्रात्स्मरणात्प्रमाणात् संशयार्धसम्पत्तावपि । **तौल्यादिति** । एककोटिकस्य । एवं कृते मूर्च्छाया मरणेन्तर्भावः वैद्यके प्रसिद्धः । 'मूर्च्छायां चतस्रो गुटिकाः संजीविन्या देया' इति । जीवनसंभावनाकर्त्री संजीवनीति । तत्र शङ्कते **न चेति** । **यमेति** । नृगाजामिलप्रभृतीनाम् । **पुनरुत्थानेति** । मृतस्य । **एवात्रेति** । मूर्च्छाविषयेऽन्ययोगव्यवच्छेदः क्रियते । रामानुजाचार्यवचनात् । तद्युक्तम् । **एवेति** । अन्यप्रकारयोगव्यवच्छेदकः ॥ १० ॥ **इति तृतीयमतः प्रबोध इत्यधिकरणम् ॥ ३ ॥**

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

न स्थानतोपि परस्योभयलिङ्गं सर्वत्र हि ॥ ११ ॥ (३. २. ४.)

इदानीं विषयनिर्धारार्थं ब्रह्मस्वरूपं विचार्यते । तत्र प्रथममन्योन्यविरुद्धवाक्यानां निर्णयः क्रियते । तदर्थमेतावत् सिद्धम् । समन्वयाविरोधाभ्यामेकमेव ब्रह्म प्रतिपाद्यत इति । तत्र यथा कार्यविरोधः परिहृतः, एवं ब्रह्मधर्मविरोधोपि परिहरणीयः । अन्यथा अबोधकता स्यात् । तत्र स्वगतधर्माणामविरुद्धानामग्रिमपादे विचारः । जडजीवधर्मत्वेन प्रतीतानामत्र विचारः क्रियते ।

भाष्यप्रकाशः ।

न स्थानतोपि परस्योभयलिङ्गं सर्वत्र हि ॥११॥ प्रस्तूयमानस्य ग्रन्थस्य सङ्गतिं वदन्तः प्रयोजनमाहुः इदानीमित्यादि । ज्ञानाधिकारिविचारोत्तरं ज्ञानविषयनिर्धारो युक्त इति तदर्थमवसरसङ्गत्या ब्रह्मणो विवक्षितज्ञानविषयस्य स्वरूपं पादशेषेणाग्रिमपादेन च विचार्यत इत्यर्थः । एतेन विचारेणोपनिषदां ब्रह्मबोधकताप्रकारो ज्ञातो भविष्यतीति तदर्थोऽयं विचार इति बोधितम् । नन्वस्मिन्नधिकरणे वाक्यविचारो दृश्यते, न तु स्वरूपस्येत्याशङ्क्य एतदधिकरणप्रयोजनमाहुः तत्र प्रथममित्यादि । प्रथममिति । स्वरूपविचारात् पूर्वम् । ननु ब्रह्मस्वरूपनिर्णयः प्रथमाध्याये कृतः, विरुद्धवाक्यनिर्णयश्च द्वितीयाध्याय इति किं पुनस्तन्निर्धारणादिनेत्यत आहुः तदर्थमित्यादि । तदर्थमिति । स्वरूपनिर्धारार्थम् । तथाच कार्यमन्यस्य न भवति, किन्तु सर्वं ब्रह्मण एव कार्यमिति तत्र निर्धारात् सर्वत्र वेदान्तेष्वेकमेव ब्रह्म प्रतिपाद्यत इत्येतावत् सिद्धम् । द्वितीयोक्तो विरोधपरिहारोपि तद्विषयनिर्धारार्थत्वेनैव फलितः, न तु ब्रह्मस्वरूपनिर्धारार्थत्वेन, ब्रह्मधर्मविरोधस्यापरिहृतत्वात् । अतस्तत्र यथा कार्ये अन्यजन्यत्वकृतो विरोधः कारणैक्यनिर्धारार्थं परिहृतः, एवं कारणभूतब्रह्मस्वरूपनिर्धारार्थं ब्रह्मधर्मविरोधोपि परिहरणीयः । अन्यथा सधर्मकं निर्धर्मकं वा, जीववत् सदोषं वा, यावद्दोषरहितं वेत्यादिसन्देहानपायादबोधकता वाक्यानां स्यात् । अतस्तन्निवृत्त्यर्थमिदं निर्धारणमित्यर्थः ।

एवं विचारावश्यकत्वं प्रतिपाद्य तत्रावान्तरविषयं विभजन्ते तत्र स्वगतेत्यादि । अविरुद्धानामिति । परस्परविरुद्धत्वेपि भगवदीयत्वेन प्रतीततया स्वरूपाविरुद्धानाम् ।

रश्मिः ।

न स्थानतोपि परस्योभयलिङ्गं सर्वत्र हि ॥ ११ ॥ **अवसरेति** । समन्वयेऽविरोधेन स्थिरीकृते विषयनिर्धारः प्रसङ्गसङ्गत्या युक्तः, परन्तु अनधिकारिहृदये न स्फुरतीति प्रतिबन्धकीभूताधिकारिचिन्तानिवृत्तौ सत्यामवश्यवक्तव्यत्वमवसर उक्तः । आवृत्तौ गौरवमित्यवसरसङ्गत्या । **विवक्षितेति** । परम्परासम्बद्धधर्मिसाक्षात्सम्बद्धधर्मिविषयकज्ञानविषयस्य । **ब्रह्मण एवेति** । एवकारेण सांख्यादिस्मृत्युपष्टब्धप्रधानादिव्यवच्छेदः । **तत्रेति** । प्रथमद्वितीयाध्याययोः । **तत्र यथेति** भाष्यं विवरीतुमाहुः **द्वितीयोक्त** इति । **तद्विषयेति** । वाक्यविषयनिर्धारार्थत्वेन । **एवेति** । ब्रह्मस्वरूपनिर्धारार्थत्वव्यवच्छेदकः । **ब्रह्मधर्मेति** । द्वितीयाध्याये तथा । विवृण्वन्ति स्म **अतस्तत्रेति** । तत्र द्वितीयाध्याये ब्रह्मणि ब्रह्मत्वेन सहावस्थानलक्षणो हि कार्यस्य विरोधः ब्रह्मरूपकारणैक्यनिर्धारार्थं प्रधानादिकारणवादनिरासेन परिहृतः । एवमितिभाष्यं विवृण्वन्ति स्म **एवं कारणेति** । **ब्रह्मधर्मेति** । रूपमरूपं चेति ब्रह्मधर्मयोर्विरोधः सहानवस्थानलक्षणः । **अन्यथेति** भाष्यं विवृण्वन्ति स्म **अन्यथेति** । **इत्यादीति** । आदिना रूपमरूपं चेति सन्देहः तेषामनपायात् । तत्तद्धर्मप्रकारकबोधकता तत्प्रतियोगिता-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तत्र क्वचिज्जडजीवधर्मा भगवति बोध्यन्ते, क्वचिन्निषिध्यन्ते । यथा 'सर्वकर्मा सर्वकामः' ।

नचैते जीवधर्मा एव न भवन्तीति वाच्यम् । उच्चावचकर्मणां कामानां च जीवगतत्वप्रतीतेः । 'नेतरोऽनुपपत्ते'रिति सर्वत्र वैलक्षण्यस्योक्तत्वात् । कार्यविशेषधर्माणां कारणे वक्तुमशक्यत्वात् । नच कारणधर्मा एव सर्वे कार्ये अंशे वा प्रतीयन्त इति वाच्यम् । 'अस्थूलमनण्वि'त्यादिवाक्यैः प्रापञ्चिकसर्वधर्मवैलक्षण्यस्योक्तत्वात् ।

अत्र केचिदविरोधमेवमाहुः । सर्वत्र कारणत्वात् भगवानस्ति । ततश्च अस्थूले अस्थूलः, अनणावनणुः, उच्चावचकर्तर्युच्चावचकर्ता, उच्चावचकामे उच्चावचकामः, पृथिव्यां सर्वगन्धः, जलादावगन्धः । एवं रसादिषु । एवं स्थानतः परस्योभयलिङ्गमुपपद्यते ।

भाष्यप्रकाशः ।

एवं विषयं विभज्य प्रस्तुताधिकरणविषयादिकमाहुः तत्र क्वचिदित्यादि, निषिध्यन्त इति । अस्थूलादिवाक्येषु निषिध्यन्ते । तथाच विरुद्धवाक्यद्वयदर्शनात् संशयः । किमुभयलिङ्गं ब्रह्म, अन्यतरलिङ्गं वेति ।

पूर्वपक्षमाहुः नचेत्यादि । प्रकरणावरुद्धत्वान्नेति न वाच्यमित्यर्थः । तत्र हेतुः उच्चावचेत्यादि । प्रतीतेरिति । प्रत्यक्षादेव प्रतीयमानत्वात् । नच श्रुत्यपेक्षया लौकिकप्रमाणस्य निर्बलत्वात् तस्य भ्रान्तत्वमिति वाच्यम् । 'नेतरोऽनुपपत्ते'रित्यादिसूत्रेषु सर्वत्र जीववैलक्षण्यस्योक्तत्वात् सर्वकामत्वादीनां ब्रह्मधर्मत्वे जीवसालक्षण्यापत्त्या शास्त्रस्यापि विरोधात् । कार्यकारणव्यवहारभङ्गापत्त्या कार्यविशेषधर्माणां कारणे वक्तुमशक्यत्वात् । शेषं स्फुटम् । तथाच धर्मविधेरुपासनार्थतयोपचारादपि नेतुं शक्यत्वान्निषेधस्य तु प्रयोजनान्तरशून्यतया स्वरूपबोधनमात्रफलकत्वेनान्यथा नेतुमशक्यत्वान्निर्विशेषलिङ्गमेव प्रतिपत्तव्यमिति प्राप्तम् ।

तत्र सूत्रं व्याकुर्वन्ति अत्रेत्यादि ।

रश्मिः ।

काभावो वाक्यानां स्यादित्यर्थः । प्रकरणेति । ब्रह्मप्रकरणावरुद्धत्वात् । एवेति । अनुमानयोगव्यवच्छेदकः । न चेतिभाष्यं विवरीतुमाहुः नच श्रुतीति । तस्येति । अंशांशिनोरभेदे सति वैलक्षण्यस्याप्रत्येतुः । विवृण्वन्ति स्म नेतरेति । आनन्दमयाधिकरणे व्याकृतानि । सर्वत्रेति । जीवे जडे च । शास्त्रस्येति । 'नेतरोऽनुपपत्ते'रित्यादेः । कार्येतिभाष्यं विवृण्वन्ति स्म कार्येति । कार्यविशेषेति । सर्वकर्मसर्वकामादीनाम् । पूर्णत्वेन तत्राभावात्, नतु कार्यत्वादीनाम् । 'अजायमानो बहुधा विजायते' इति प्राकट्यरूपामुत्पत्तिमादायांशतस्तेषां सत्त्वात् । स्फुटमिति । एवेति । नैयायिकप्रवादादेवकारः । अंश इति । 'यथाग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्त्येवमेवास्मादात्मनः सर्वे जीवाः सर्व आत्मान' इति पृथगुपदेशात् । प्रापञ्चिकेति । नञः पर्युदासार्थत्वात्तथा । एवं शेषं स्फुटमित्यर्थः । पर्युदासः सदृग्ग्राही । अस्य पूर्वपक्षत्वं स्फुटयन्ति स्म तथाच धर्मेति । धर्मविधेरिति । 'सर्वकर्मा सर्वकाम' इति भाष्योक्तोभयकोडीकारेण यो धर्मविधिः 'ज्योतिष्टोमेन स्वर्गकामो यजेते'ति धर्मैकदेशधर्मविधेः । 'धर्मं चरे'ति विधेर्वा । सर्वकर्मत्वेन सर्वकामत्वेन ब्रह्मोपासनार्थतया सामान्यविशेषभावसम्बन्धरूपोपचाराच्छक्यसम्बन्धात् । शक्यसम्बन्धो लक्षणा । एवेति । आरोपापवादसङ्गतिसत्त्वादेवकारः । तत्रेति ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अथवा । कारण एव रूपमरूपं चावच्छेदभेदेन अचिन्त्यसामर्थ्याद्वा । अन्यथा असतः सज्जननप्रसङ्ग इति अपिना संगृहीत इति ।

एतदुभयमपि न । कुतः । सर्वत्र हि । सर्वत्रैतादृशं रूपं भगवत उपदिश्यते । हि युक्तोऽयमर्थः । भगवत्स्वरूपप्रतिपादकानि हि एतानि वाक्यानि,

---

भाष्यप्रकाशः ।

केचित् ब्रह्मवादैकदेशिन ऋषयो वक्ष्यमाणरीत्योभयलिङ्गाविरोधं व्युत्पादयन्ति । 'यतो वा इमानि' 'सदेव सौम्ये'त्यादिभिर्भगवत उपादानत्वस्य सिद्धत्वात् सर्वत्रोपादेये कार्ये भगवानस्तीत्यविवादम् । ततश्च यथा पार्थिवकारणभूता पृथिवी घटपटस्तम्भादिषु कार्येषु निमित्तवशात् तत्तद्रूपतां धत्ते, तथा भगवानप्यस्थूलादिषु द्रव्येषु, रसादिषु च गुणेषु, तत्तद्रूपतां धत्ते इत्येवं स्थानधर्मरूपं तत्तल्लिङ्गं परस्मिन् भासत इति परस्योभयलिङ्गमुपपद्यत इत्येकं मतम् ।

अथवेत्यादिनोक्तं द्वितीयं मतम् । अवच्छेदभेदेनेति । अवच्छिद्यत इत्यवच्छेदः प्रदेशस्तेन । तत्र युक्तिस्त्वचिन्त्यसामर्थ्यम् । भाष्ये वाशब्दो वाक्यालङ्कारे । पूर्वोक्तरीत्यान्यथाङ्गीकारे तु स्थानस्य कार्यत्वात् स स धर्मस्तत्र तत्र स्थाने कुत आगत इति विमर्शे कारणस्य तद्धर्मवत्ताभावेन कार्ये तस्यासतः सत्ता स्यात् । तस्मात् तद्विहायैवं तत्तदवच्छेदभेदेनाचिन्त्यसामर्थ्यादुभयलिङ्गत्वमुपपादनीयमिति । तदिदमपिना संगृहीतम् ।

एवं स्थानतोपीतिपदद्वयेन तदुभयमनुवदन्निषेधति नेत्यनेन । तत्र हेतुः सर्वत्रेति । तं व्याकुर्वन्ति सर्वत्रेत्यादि । ननु तत्तद्वाक्येषु तत्तल्लिङ्गताया एव श्रवणात् सर्वत्रैतादृशरूपोपदेशस्य चाश्रवणात् कथं युक्तत्वमित्याकाङ्क्षायां तद्व्याकुर्वन्ति भगवदित्यादि । एतानीति । सर्वकर्मत्वास्थूलत्वादिबोधकानि ।

तथाहि । सर्वकर्मत्वादिवाक्यं तावत्, 'अथ खलु क्रतुमयः पुरुष' इति क्रतूपदेशं प्रकृत्य शाण्डिल्यविद्यायाम्, 'एष म आत्मान्तर्हृदय एतद्ब्रह्मैतमितः प्रेत्य संभवितास्मी'त्युपसंहारे

रश्मिः ।

एवं पूर्वपक्षे सिद्धान्तसूत्रं व्याकुर्वन्ति अस्तीति । कार्यरूपतया तदाधेयतया च । तेन 'तद्रूपं तत्र च स्थितं साकारव्यापकत्वाच्चे'त्युक्तेषु द्वयं द्रव्ये, साकारव्यापकं तु गुणे द्रव्येपीत्याशयेनाहुः अस्थूलादिष्विति । अस्थूलादिषु स्थानेषु रसादिषु च स्थानेषु । अथवेत्यादिनेति । पूर्वत्र कारणरूपस्य ब्रह्मणः कार्यस्थानत उभयलिङ्गमुक्तम् । अधुना कारणस्थानत उभयलिङ्गमाहुः अथवेति । एवकारेण कार्यरूपव्यवच्छेदः । रूपं मूर्तं अरूपममूर्तम् । मूर्तामूर्तब्राह्मणेन । अन्यथेति भाष्यं विवृण्वन्ति स्म अन्यथेति । अस्मात्प्रकारादन्यप्रकारस्य । अन्यथेत्यस्मात्षष्ठ्या लुक् । तद्विहायेति । पूर्वपक्षं विहाय । अवेति । पृथिवीदेशेन रूपं वायुदेशेनारूपमिति देशभेदरूपावच्छेदभेदेन । पदद्वयेनेति । नन्वेकमपि न पदं 'अव्ययादाप्सुप' इति 'सुब्लुकि लुकालुस्त्वे नलुमताङ्गस्ये'त्यस्य प्राप्त्या कथं 'सुप्तिङन्त'मित्यनेन पदत्वमिति चेत् । न । शब्दलक्षकत्वाद्भ्रान्तेर्जीवधर्मत्वात् । तदुभयमिति । पक्षद्वयम् । एतेनैतदुभयमिति भाष्यं विवृतम् । तत्तल्लिङ्गताया इति । 'सर्वकर्मा सर्वकाम' इत्यादिषु सर्वकर्मत्वादिना तत्तज्जीवादिषु तत्तच्छब्दस्य सामर्थ्यं शक्त्यादि तस्य समूहस्यैव श्रावणात् । एवकारः शक्याद्यर्थव्यवच्छेदकः । अर्थपदशक्त्यादिज्ञानानन्तरं गुरूपदेशादिसहकारणसाध्यत्वात् । तत्तल्लिङ्गसमूहस्तत्तल्लिङ्गता तस्या इत्यर्थः । शब्दरूपमङ्गीकृत्य यत्किञ्चिच्छाब्दं वाङ्गीकृत्याह सर्वत्रेति । युक्तत्वमिति । भगवदुपदेशरू-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

न त्वनुवादकानि । वैयर्थ्यापत्तेः ।
अचिन्त्यत्वे ज्ञानानुदयः । 'तमेव विदित्वातिमृत्युमेति' 'भक्त्या माम-

भाष्यप्रकाशः ।

तत्क्रतुविषयं ब्रह्मैव बोधयति । क्रतुश्चात्र नोपासना । शब्दान्तरात् । अन्यथा तद्वैयर्थ्यप्रसङ्गात् । किन्तु मननम् । एवमन्यान्यपि वाक्यानि 'अणोरणीया'नित्यादीनि जीवव्यतिरिक्तमात्मानं विषयीकुर्वन्तीत्यस्थूलादिवाक्यवत् प्रमाणान्तरानवगतभगवत्स्वरूपप्रतिपादकानि, न त्वनुवादकानि । यदि हि तेषां स्थानगतधर्मानुवादकत्वं स्यात्, तदा तैर्ब्रह्मज्ञानाभावात् तेषां वैयर्थ्यमेव स्यात् । न ह्यौपाधिकानां धर्माणां तद्वत्तया ब्रह्मणो वा ज्ञानं मुक्त्यर्थमिति वक्तुं शक्यम् । तथा सति दर्शनान्तरीयज्ञानादपि सा स्यात् । ततश्च शास्त्रवैयर्थ्यापत्तिः । नापि यथाकथञ्चिच्छाखाचन्द्र-न्यायेन ब्रह्मप्रतिपत्त्यर्थम् । तथा सति परस्परविरुद्धान् धर्मान्न बोधयेयुः । प्रतिपत्तिजननप्रति-बन्धकत्वात् । किञ्च । अस्मिन् वाक्येऽनुवादकत्वं संभवत्यपि न । 'ज्यायानाकाशा'दित्युक्तेः । न हि लोके आकाशाज्ज्यायः किञ्चिदस्ति स्थानम्, येन तद्वशाद्ब्रह्मणि तदनूद्येत । दिक्कालात्मनां तत्समत्वात् । एवं सांख्यादिदृष्ट्या प्रकृत्यादिग्रहणेपि ततो नान्यस्य ज्यायस्त्वम् । ज्यायस्त्वं चात्र परिमाणादेव विवक्षितं ज्ञायते । अग्रे 'अणीयान् व्रीहे'रिति श्रावणात् । अतस्तत्प्रतिपादकत्वमेवात्र मन्तव्यम् । तथा सर्वकर्मत्वादिप्रतिपादकत्वमपि, निरङ्कुशानां तेषामन्यत्राभावादिति । तस्मान्नात्र स्थानप्रयुक्तानुवादकत्वम् ।

एवं द्वितीयेपि मते, सामर्थ्यस्याचिन्त्यतया तस्याज्ञानात् तद्वतो ब्रह्मणोप्यज्ञानापत्तिः ।

रश्मिः ।

पार्थस्य युक्तत्वम् । **तद्धेति** । **ब्रह्मैवेति** । अन्तर्हृदय इति लिङ्गादेवकारः । **तद्वैयर्थ्येति** । शब्दा-न्तरवैयर्थ्यप्रसङ्गात् । **विषयीति** । विरुद्धसर्वधर्माश्रयत्वेन विषयीकुर्वन्ति । अनधिगतार्थगन्तृत्वप्रमाणा-दन्यत् प्रमाणं प्रमाणान्तरं तदनवगतं यद्ब्रह्मस्वरूपं विरुद्धधर्माश्रयं तस्य प्रतिपादकानि । हेतुभाष्यं विवृण्वन्ति स्म **यदि हीत्यादि** । **ब्रह्मेति** । किन्तु स्थानगतधर्मज्ञानात् । तेषां ब्रह्मज्ञानांशे वैयर्थ्यम् । **एवेति** । अवैयर्थ्ययोगव्यवच्छेदकः । **नहीति** । उपाधिः अस्थूलादिः स्थानं अस्थूलादेः । पृथिवीस्थानं सर्वगन्धस्य । जलादिस्थानमगन्धस्य । तादृशधर्माणामौपाधिकानाम् । तादृशधर्मवत्तया तादृशास्थूलाद्यौ-पाधिकस्थूलादिमत्तया पृथिव्याद्यौपाधिकसर्वगन्धादिमत्तया वा ब्रह्मणो वा ज्ञानम् । **दर्शनेति** । मायावच्छिन्नं चैतन्यमीश्वरः इति ज्ञानात् । सांख्यदर्शनेऽसङ्गोपाधिकासङ्गपुरुषज्ञानात् । **शास्त्रेति** । अविरोधाध्यायसहकृतोक्तोपपादकवेदान्तशास्त्रवैयर्थ्यापत्तिः । **यथाकथमिति** । औपाधिकेनापि प्रकारेण । अस्यां स्थूलायां शाखायां चन्द्र इति न्यायेन । शाखाग्रद्वारं चन्द्राग्रद्वारं प्रत्युक्तिः सूक्ष्मप्रतिपत्त्यर्था । **प्रतिपत्तीति** । नच विरुद्धधर्माश्रयत्वेन प्रतिपत्तिः । अन्यैरनङ्गीकारात् । **तद्वशादिति** । स्थानवशात् । **तदनूद्येतेति** । तदित्यव्ययम् । स्थानगतधर्मः । ननु नास्ति चेत्कथमाकाशाज्ज्यायस्त्वेन स्थानं प्रतिपत्तव्यमिति चेत्, तत्राहुः **दिक्कालेति** । प्रसिद्धं नैयायिकमते । दिशं प्रस्तुत्य सा चैका विभ्वी नित्या चेति, तथा कालं प्रस्तुत्य स चैको विभुर्नित्यश्चेति । तथात्मानं प्रस्तुत्य स चैको विभुर्नित्यश्चेति । शब्दगुणकमाकाशमित्याकाशात् ज्यायस्त्वम् । नैयायिकमते । सिद्धान्ते तु अचिन्त्यश-क्तिमत्त्वादाकाशाज्ज्यायःशब्दप्रवृत्तिः । **तत इति** । प्रकृत्यादेः । **एवेति** । ब्रह्मत्वादियोगव्यवच्छेदकः । **अणीयानिति** । अत्राणुपरिमाणम् । अतिशये ईयसुन् । **तत्प्रतीति** । ब्रह्मप्रतिपादकत्वम् । एवकारेणानुवादकत्वयोगव्यवच्छेदः । **अपीति** । ब्रह्मणि मन्तव्यमित्यन्वयः । **तेषामिति** । सर्वकर्मत्व-सर्वकामत्वादीनाम् । **नात्रेति** । अत्र श्रुतिषु स्थानमस्थूलादि प्रयोजकं तत्प्रयुक्तं तद्गतधर्मानुवादकत्वं न

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

भिजानाति यावान् यश्चास्मि यादृशः, ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तर'मिति ज्ञानानन्तरमेव सायुज्यप्राप्तेः । नच 'यस्यामतं तस्य मतं मतं यस्य न वेद सः, अविज्ञातं विजानतां विज्ञातमविजानता'मिति वाच्यम् । शास्त्रानारम्भप्रसङ्गात् । अयं च विरोधः परिहरणीयः । सर्वे हि विरोधा अत्र चिन्त्यन्ते । नापि तत्तदुपादानभूतप्रदेशविशेषेणाविरोधः । अनुवादकत्वेन वैयर्थ्यापत्तेः । न च भगवति भेदोऽस्ति । प्रत्यारम्भ'मेकमेवा-

भाष्यप्रकाशः ।

ततश्च 'तमेवे'त्यादिश्रुत्युक्तसाधनाभावान्मोक्षस्याप्यप्राप्त्यापत्तिः । भक्त्याभिज्ञानादेरपि बाधापत्तिः स्यात् । नच 'यस्यामत'मित्यादावमतस्य मतत्वश्रावणादचिन्त्यत्वेनामतत्वेपि सुखेन ज्ञानोदयसंभव इति वाच्यम् । तथा सति विचारशून्यानामपि ज्ञानसंभवेन विचारशास्त्रस्य वेदान्तरूपशास्त्रस्य वानारम्भप्रसङ्गात् । किञ्च । एतद्वाक्योक्तममततायां मतत्वं तदा बुद्धिगोचरीभवेत्, यदास्य बोधनप्रकारोवगम्येत, स एव तु नावगम्यते । वदतो व्याघातात् । अतोयमपि विरोधः परिहरणीयः । यतः सर्वे विरोधा अत्र चिन्त्यन्ते । अतो यावदस्य बोधनप्रकारो न व्युत्पादितः, तावत्पर्यन्तमबोधकत्वान्नानेन ज्ञानं वक्तुं शक्यम् । किञ्च । नापि तत्तदुपादानभूतप्रदेशविशेषेणाविरोधो युज्यते । तादृशत्वस्य पृथिव्यादौ दर्शनात् वाक्यस्य लोकसिद्धानुवादकत्वेन वैयर्थ्यापत्तेः । नच पृथिव्यादीनां सांशत्वादंशभेदेन तथात्वम्, भगवतस्तु निरंशत्वात् प्रदेशभेदेनोपगम्यत इत्यनुवादकत्वाभावान्न वैयर्थ्यमिति वाच्यम् । यदि भगवति स्वगतभेदो भवेत्, तरौ पत्रपुष्पादीनामिव, तदैवमुपगन्तुं शक्येत । स तु नास्ति । प्रत्यारम्भं यत्र यत्र ब्रह्म निरूपणमारभ्यते, तत्र तत्र 'एकमेवाद्वितीय'मिति वचनात् । यदि सर्वत्रैकरूपता न स्यात्, तदा प्रत्यारम्भं तथा कथन-

रश्मिः ।

किन्तु ब्रह्मप्रतिपादकत्वम् । **अचिन्त्यत्व** इति भाष्यं विवृण्वन्ति स्म **एवं द्वितीय** इति । **तमेवेति**भाष्यं विवृण्वन्ति स्म **ततश्चेति** । **बाधेति** । ज्ञानाभावेऽभिज्ञानबाधः । **अभित** इत्यस्य ज्ञानधर्मत्वात् ।

भाष्ये ज्ञानानन्तरमिति 'विदित्वे'ति क्त्वान्तार्थः । क्रमादेवकारः । अन्यथा 'अतिमृत्युमेति विदित्वे'त्यपि वदेत् । नचेतिभाष्यं विवृण्वन्ति स्म **नचेति** । **शास्त्रेति**भाष्यं विवृण्वन्ति स्म **तथा सतीति** । **विचारेति** । मतपदोक्तं मननं विचारस्तच्छून्यानाम् । **अयं चेति** भाष्यं विवरीतुमाहुः **किञ्च एतदिति** । **वाक्योक्तेति** । ममेदं मतमिति ममतायां श्रुतिनिष्ठायाम् । **अवगम्येतेति** । अधोक्षजत्वातिरिक्तप्रकारः सर्वेषामाचार्याणां नूतनमार्गप्रवर्तकत्वात्तन्मध्ये कस्यचिन्मार्गत्वेन ज्ञायेत सर्वैः । **वदत** इति । मतममतमितिवदतो व्याघातः 'मम माता वन्ध्ये'ति वाक्यवत् । विवृण्वन्ति स्म **अतोयमपीति** । **यतो हीति**भाष्यं विवृण्वन्ति स्म **यत** इति । **अत्रेति** पूर्वपादे । उत्तरत्र च पादे । **अस्येति** विरोधस्य । बोधनप्रकारो विरुद्धसर्वधर्माधारत्वलक्षणः । विरोध्यस्य ज्ञानावरोधकत्वात् । **नापीति**भाष्यं विवृण्वन्तिस्म **किञ्चेति** । **तत्तदुपादानेति** । यथोद्भूतगन्धोपादानपृथिवीभूतप्रदेशरूपविशेषेण पाषाणभूतप्रदेशेन चाविरोधो गन्धतदभावयोः । **वैयर्थ्येति** । लोकेऽनधिगतार्थगन्तृत्वाभावेनाप्रामाण्यात्तथा । **न चेति**भाष्यं विवरीतुमाहुः **न चेति** । विवृण्वन्ति स्म **भगवत** इति । **इत्यन्विति** । **इति उक्त**प्रकारेण लोकेंशभेदात्तदननुवादमादाय प्रमाणलक्षणोपपत्तेरनुवादकत्वाभावादित्यर्थः । **स्वगतेति** । गीताष्टादशाध्यायोक्तसात्त्विकज्ञाननष्टस्वगतभदो भवेत् । प्रत्यारम्भमिति भाष्यं विवृण्वन्ति स्म **प्रत्या-**

१. अमततायामित्यत्र ममतायामिति पाठो रश्मौ । २. सर्वे हीत्यत्र यतो हीति रश्मौ पाठः स्यात् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

द्वितीय'मिति वचनात् । अल्पकल्पनायामपि श्रुतिविरोधः सिद्धः । श्रुत्यविरोधार्थमेव हि प्रवृत्तेः । तस्मान्न मतान्तरानुसारेण जडजीवधर्माणां सत्त्वासत्त्वे परिहर्तुं शक्ये ॥ ११ ॥

न भेदादिति चेन्न प्रत्येकमतद्वचनात् ॥ १२ ॥

प्रकारान्तरेण समाधानमाशङ्क्य परिहरति । न भवदुक्तो विरोधः सम्भवति । भेदात् । कारणकार्येषु सर्वत्र भेदाङ्गीकारात् । प्रपञ्चविलक्षणं ब्रह्म भिन्नम् । प्रपञ्चधर्मवत् ब्रह्म भिन्नम् । तथा अज्ञातं ज्ञातं च । एकस्य भेदस्याङ्गीकारे सर्वमुपपद्यत इति चेत् । न । प्रत्येकमतद्वचनात् । अभेदवचनात् । 'इयं पृथिवी सर्वेषां भूतानां मध्वि'ति ब्राह्मणे 'अयमेव स योऽय'मिति सर्वत्राभेदवचनात्, कार्यकारणरूप-

---

भाष्यप्रकाशः ।

मनर्थकमेव स्यात् । अतोल्पकल्पनायामपि श्रुतिविरोधः सिद्धः । नच सोल्पत्वान्न दुष्ट इति युक्तम् । श्रुत्यविरोधार्थमेव भगवतो व्यासस्य प्रवृत्तेः । तस्मान्न मतान्तरोक्तरीत्या जडजीवधर्माणां सत्त्वासत्त्वरूपस्योभयलिङ्गविरोधस्य परिहारसिद्धिरित्यर्थः ।

विद्वन्मण्डने तु प्रकरणसिद्धार्थविचारेणैतस्य सिद्धान्तसूत्रत्वमेव सेत्स्यतीत्याशयेन वक्ष्यमाणरीत्यैतदधिकं व्याख्यातम् । सोपाधिकं ब्रह्म सविशेषश्रुतिविषयः, निरुपाधिकं तन्निर्विशेषश्रुतेरित्यपि मतमर्थान्निरस्तम् । विशेषाणामौपाधिकत्वे ब्रह्मणस्तत्स्वभावत्वाभावेन तन्निरूपकश्रुतीनामब्रह्मनिरूपकत्वापत्तेरिति ॥ ११ ॥

न भेदादिति चेन्न प्रत्येकमतद्वचनात् ॥ १२ ॥ सूत्रमवतारयन्ति प्रकारान्तरेणेत्यादि । अत्र सूत्रे उभयलिङ्गमिति पूर्वसूत्रादनुवर्तते, तदाहुः न भवदुक्त इत्यादि । उभयलिङ्गपदेन भवता उक्तो विरोधो न सम्भवतीत्यर्थः । भेदादिति विवृण्वन्ति कारणेत्यादि । सर्वत्रेति । लोके वेदे च । सिद्धान्तांशं व्याकुर्वन्ति इयमित्यादि । सर्वत्राभेदवचनादिति । सर्ववाक्येष्वभेदवचनात् । अभेदवचनस्यैव व्याख्यानं कार्यकारणेत्यादि । मधुब्राह्मणस्थाः कार्यादयस्त्वेवं बोध्याः । तथाहि । 'इयं पृथिवी सर्वेषां भूतानां मध्वस्यै पृथिव्यै सर्वाणि भूतानि मधु यश्चायमस्यां पृथिव्यां तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मं शारीरस्तेजोमयोऽमृतमयः पुरुषोऽयमेव

रश्मिः ।

रम्भमिति । एवेति । अप्यर्थक एवकारः । अल्पेति भाष्यं विवृण्वन्ति स अत्र इति । अंशभेदात् । अल्पोंशभेदस्तस्य ब्रह्मणि कल्पनायामपि श्रुतिविरोधः सिद्ध इति नापि तत्तदुपादानभूतप्रदेशविशेषेणाविरोधो युज्यते । श्रुत्यविरोधार्थमिति भाष्यं विवरीतुमाहुः न च स इति । 'एकदेशविकृतमनन्यव'दिति न्यायेनादुष्टः । अन्यथा 'जराया जरसन्यतरस्या'मिति सूत्रेण निर्जरशब्दस्य जरसादेशाभावे निर्जरसाविति न स्यात् । विवृण्वन्तिस्म श्रुत्यविरोधेति । एवेति । अत्र 'केचिदविरोधमेवमाहु'रित्यादिभाष्यादेवकारः । प्रवृत्तेरिति । शब्दार्थे कृते प्रवृत्तिज्ञानम् । मतान्तरेति । 'स्थानतः परस्योभयलिङ्ग'-मितिरीत्या ॥ ११ ॥

न भेदादिति चेन्न प्रत्येकमतद्वचनात् ॥ १२ ॥ इत्यर्थ इति । सौत्रप्रथमनकारेणार्थः कर्तव्यः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रकाराणां भेदनिषेधात्। तस्मान्न भेदाङ्गीकारेण श्रुतयो योजयितुं शक्याः॥ १२॥

भाष्यप्रकाशः।

स योऽयमात्मेदममृतमिदं ब्रह्मेदं सर्व'मित्येकं वाक्यम्। एवमग्रेपि, अबग्न्याकाशवाय्वादित्यचन्द्रदिग्विद्युत्स्तनयित्नुधर्मसत्यमानुषात्मवाक्यानि। एवं चतुर्दश।

तत्रायमर्थः। इयं प्रसिद्धा पृथिवी सर्वेषां भूतानां ब्रह्मादितृणस्तम्बान्तानां मधु मध्विव। उपकारकं कार्यम्, भूतादृष्टजन्यत्वात्। तथा, अस्यै पृथिव्यै अस्याः पृथिव्याः सर्वाणि भूतानि पूर्वोक्तानि मधु मध्विव उपकारकाणि, कारणत्वात्। किञ्च। यश्चायमस्यां पृथिव्यां तेजोमयश्चिन्मात्रप्रकाशमयः अमृतमयः अमरणधर्मा पुरुषः, सोपि 'तदभिध्यानादेव त्वि'ति न्यायेन पृथिवीरूपतया तदुपकारकत्वात् तस्यै मध्विति चकारेण समुच्चीयते। यश्चायमध्यात्मम्, 'अधिशरीरं शारीरः शरीराभिमानी' त्यन्ये। वस्तुतस्तु 'यः पृथिव्यां तिष्ठ'न्नित्यादिनोक्तोऽन्तर्यामी तेजोमयोऽमृतमयः पुरुषः सोपि तेनाभिमानेन प्रकारेण भूतोपकारकत्वाद्भूतानां मध्वित्यपि चकारान्तरेण समुच्चीयते। अयमेव सः। अयं तेजोमयादिरूपः पुरुष एव सः। मैत्रेयीब्राह्मणान्ते पूर्वग्रन्थ उक्तो योऽयमात्मा उक्तविधपुरुषरूप इदममृतमानन्दः। इदं ब्रह्माक्षरम्। इदं सर्वं पूर्वोक्तकार्यकारणरूपप्रकारात्मकमिति। एवमग्रिमेष्वपि वाक्येषु बोध्यम्।

सिद्धमाहुः तस्मादित्यादि। एतेषां कार्यादीनां भगवदात्मकत्वनिगमनेन प्रतिवा-

रश्मिः।

एवेति। अन्यवादानां द्वितीयाध्यायपादयोर्निराकरणादेवकारः। कार्यकारणरूपभेदात्। छान्दसी षष्ठीस्थाने चतुर्थीत्याहुः **अस्याः पृथिव्या** इति। **पूर्वोक्तानीति**। ब्रह्मादितृणस्तम्बान्तानि। **कारणत्वादिति**। ब्रह्मणः कारणत्वं तृतीयस्कन्धे। तृणस्तम्बान्तानां सत्तारूपाणां कारणत्वमवयवत्वात्। **तदभिध्यानादिति**। अयं न्यायः द्वितीयाध्यायतृतीयपादे गतः। **पृथिवीति**। तस्य तस्य कार्यस्योत्पादनार्थं तदभिध्यानं ततस्तदात्मकत्वं तत्तत्कार्यकारणात्मकत्वं तेन तत्कारणवाचकत्वमिति 'तदभिध्यानादेव तु तल्लिङ्गात्स' इति सूत्रांशार्थात् पृथिवीरूपतया तदुपकारकत्वात् तस्य 'तस्माद्वा एतस्मा'दिति श्रुतिप्रसिद्धस्योषध्यादेः उपकारकत्वात् कारणत्वात्। तस्यै तस्याः पृथिव्या मधु कार्यम्। चकारेण 'यश्चाय'मिति चकारेण। अधुना 'इयं पृथिवी सर्वेषां भूतानां मध्वस्यै पृथिव्यै सर्वाणि भूतानि मधु यश्चायमस्यां पृथिव्यां तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्म॰शरीरस्तेजोमयोऽमृतमयः पुरुषोयमेव स योयमात्मेदममृतमिदं ब्रह्मेद॰सर्व'मिति पूर्वकण्डिकां पुरुषान्तां व्याकृत्य भाष्य'मयमेव स' इत्यंशविवरणेन विवरिष्यन्त आहुः **यश्चायमिति**। अधिशरीरमित्यव्ययीभावः। आत्मनीत्यध्यात्ममिति। **भूतोपेति**। शरीररूपभूतस्योपकारकत्वात्कारणत्वात्। भूतानां मधु कारणम्। भाष्यं विवृण्वन्तिस्म **अयमेवेति**। **उक्त** इति। विज्ञाता। 'विज्ञातामरे केन विजानीया' दिति श्रुतेः। 'इदममृत'मित्यादित्रयं व्याकुर्वन्तिस्म **इदममृतमिति**। **पूर्वोक्तेति**। एतेन **कार्यकारणेति** भाष्यं व्याकृतम्। कार्यादिरूपमग्रे वक्तव्यम्। **एवमिति**। कार्यकारणरूपप्रकाराणां भेदनिषेध इति बोध्यम्। **एतेषामिति**। कार्यकारणरूपप्रकाराणाम्। **भगवदात्मेति**। इदं निगमनं मधुब्राह्मणसमाप्तौ 'तदेतद्ब्रह्मापूर्वमनपरमनन्तरमबाह्यमयमात्मा ब्रह्म सर्वानुभूरित्यनुशासन'मिति श्रुतौ तच्छब्दान्निगमनेन। यद्यपि यदेतादृशं ब्रह्म तदेवैतत्समस्तं जगदिति व्याख्यानम्, तथाप्यारम्भेऽथर्वैतैर्हेतुभिः साधित'मिदं सर्वं यदयमात्मे'त्यस्यैव पूर्वप्रतिज्ञातस्य निगमनार्थमिदमिति ग्रन्थान्निगमनं बोध्यम्। **प्रतिवाक्यमिति**। चतुर्दशवाक्येषु।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अपिचैवमेके ॥ १३ ॥

भेदाङ्गीकारे बाधकमाह। अपिच एवमेवाभेदमेव भेदनिषेधेनैके शाखिनो वदन्ति। 'मनसैवेदमाप्तव्यम्, नेह नानास्ति किञ्चन, मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यती'ति भेददर्शननिन्दावचनात्। तस्मान्न भेदाङ्गीकारः कर्तुं शक्यः। इवशब्दो 'बहु स्या'मिति व्यावृत्त्यर्थः। तस्मादुपनिषत्सु सर्वप्रकारोऽविरोधः सिद्धः ॥ १३ ॥

इति तृतीयाध्याये द्वितीयपादे चतुर्थमुभयलिङ्गमधिकरणम् ॥ ४ ॥

भाष्यप्रकाशः।

क्यमभेदस्य बोधनात्। तथाच तत्तद्वाक्येषु तत्तद्धर्मश्रावणेपि ब्रह्मण ऐक्यात् सर्वत्र सर्वं कार्यं सर्वं कारणं सर्वाणि रूपाणि सर्वे प्रकाराः सन्तीति विरोधतादवस्थ्यान्न भेदाङ्गीकारेण श्रुतयो योजयितुं शक्या इत्यर्थः ॥ १२ ॥

अपिचैवमेके॥ १३॥ ननु पूर्वसूत्रेणैव भेदे श्रुतिबलेन वारिते, अस्य सूत्रस्य किं प्रयोजनमित्याशङ्कायां तत्प्रयोजनमाहुः भेदेत्यादि। तथाच भेदाङ्गीकारे बाधकप्रदर्शनेन कदाचित् स्मार्ततया नित्यानुमेयवेदमूलत्वं शङ्क्येतेति तन्निवारणार्थमिदं सूत्रमित्यर्थः। तत् व्याकुर्वन्ति अपिचेत्यादिना। श्रुतिस्तु बृहदारण्यके शारीरब्राह्मणेस्ति। अत्र पूर्वं 'प्राणस्य प्राण'मित्यादिना प्राणाद्याधिदैविकं ये विदुः, ते ब्रह्म विदुरित्युक्त्वा, तस्य वेद्यस्यैव प्राप्यत्वं वदँस्तस्य स्वरूपमाह 'नेह नानास्ति किञ्चने'ति। अर्थस्तु, इह मनसावाप्तव्ये ब्रह्मणि न नानास्ति। यत्किञ्चन नियम्यत्वेना-

रश्मिः।

अभेदबोधनं तेजोमयादिरूपस्य 'तदभिध्यानादेवे'तिन्यायेन पृथिव्यादिस्थस्य शारीरेण तेजोमयादिरूपेण 'अयमेव स योय'मिति वाक्येन तस्मात्। **तत्तद्धर्मेति**। पृथिव्यादिधर्माणां शारीरधर्माणां च तेजोमयादीनां तत्तत्पृथिव्यादिशरीरधर्माणां श्रावणेपि 'अयमेव स योय'मिति वाक्येनोभयनिष्ठब्रह्मण ऐक्यात्। **सर्वत्रेति**। चतुर्दशवाक्येषु सर्वं कार्यं 'इयं पृथिवी सर्वेषां भूतानां मध्वि'त्यत्र मधुशब्दार्थः सर्वेषां भूतानां कार्यमपि तत्सर्वमिति कार्यविशेषणं सर्वमिति। **सर्वं कारणमिति**। 'अस्यै पृथिव्यै सर्वाणि भूतानि मध्वि'त्यत्र मधुशब्दार्थः। अत्र सर्वमिति विशेषणं स्पष्टम्। **सर्वाणि रूपाणीति**। 'यश्चाय'मिति प्रथमचकारसमुच्चितानि 'तदभिध्यानादेव तु'इति न्यायेन पृथिव्यादिनिष्ठतेजोमयादिपुरुषाणां पृथिव्यादिरूपतया, तेजोमयादिपृथिवीरूपाणि सर्वाणि चतुर्दशवाक्योक्तानि। **सर्वे प्रकारा इति**। 'यश्चायमध्यात्म'मिति द्वितीयचकारसमुच्चिताः शरीराभिमानाः प्रकाराः। **सर्वे** इति पूर्ववत्। **विरोधेति**। 'यस्यामत'मितिश्रुत्युक्तज्ञाताज्ञातविरोधस्य ज्ञाताज्ञातयोर्ब्रह्मण ऐक्यादेकत्र सत्त्वेन तादवस्थ्यात् न भाष्योक्तरीत्यभेदाङ्गीकारेण। **श्रुतयः** 'यस्यामतं तस्य मत'मिति 'सर्वकर्मा सर्वकामः' 'अणोरणीयान्महतो महीयानि'त्यादयः ॥ १२ ॥

अपिचैवमेके ॥ १३ ॥ **स्मार्ततयेति**। स्मार्तं कर्म सर्वमपि स्नानसन्ध्यादिभेदाधीनम्। किञ्च, जीवब्रह्मभेदस्मृतयश्च 'यदधीना यस्य सत्ता तत्तदित्येव भण्यते। विद्यमाने विभेदेपि मिथो नित्यं स्वरूपत' इति, 'ब्राह्मणो मुखमित्येवं मुखाज्जातत्वहेतुतः। यथाऽवदच्छ्रुतिस्तद्वज्जीवो ब्रह्मेति वा भवे'दिति। 'भिन्ना जीवाः परो भिन्नस्तथापि ज्ञानरूपतः। प्रोच्यन्ते ब्रह्मरूपेण वेदवादेषु सर्वशः' इति। **नित्येति**। अपौरुषेयोऽनुमेयवेदस्तन्मूलत्वम्। स्मृतिः वेदमूला, स्मृतित्वात्, याज्ञवल्क्यस्मृतिवत्। पक्षैकदेशस्य दृष्टान्तत्वम्। **वेद्यस्यैवेति**। विदुरितिक्रियाकर्मणः एवकारेणाधिभौतिकप्राणादि-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अरूपवदेव हि तत्प्रधानत्वात् ॥ १४ ॥ (३-२-५.)

एकदेशिमतेन समाधानमाह । कथमत्र सन्देहः, विरोधो वा जडजीवध-

भाष्यप्रकाशः ।

वयवत्वेन वा अतिरिक्ततया वेदनविषयं भवति, तत् ब्रह्मैव, न तु तदतिरिक्तम् । विलक्षणप्रतीतिविषयस्य कथमपृथक्त्वमित्याशङ्कावारणाय अर्थान्तरकल्पनेनास्य भेदपरत्ववारणाय च भेदाङ्गीकारे बाधकमाह मृत्योः स इत्यादि । इवशब्दं विनापि भेददर्शननिन्दासिद्धेस्तद्वैयर्थ्यं स्यादिति तत्प्रयोजनमाहुः इवेत्यादि । तथाच घटपटवत् घटान्तरवत् तरुकुसुमवच्च तत्त्वतो नानेव नाना पश्यति तस्य दोषः, न त्वैच्छिकं विलक्षणप्रतीत्युत्पादकं यः पश्यति, तस्य दोषः । तादृशस्य श्रौतत्वेन वास्तवत्वादिति बोधनं प्रयोजनमित्यर्थः । सिद्धमाहुः तस्मादित्यादि । यस्मादुपनिषत्सु सर्वत्रोभयलिङ्गमुच्यते, भेदश्च सर्वप्रकारेण निषिध्यते, तस्मात् तथेति श्रुतीनामबोधकत्वमेव प्रसक्तमित्यर्थः । एवमत्राधिकरणे आक्षेपसङ्गत्या विरोधः साधितः ॥ १३ ॥ इति चतुर्थमुभयलिङ्गाधिकरणम् ॥ ४ ॥

अरूपवदेव हि तत्प्रधानत्वात् ॥ १४ ॥ सङ्गतिं वदन्तोधिकरणमवतारयन्ति एकदेशीत्यादि । अयं ह्येकदेशी ब्रह्मण एकदेशेन जगत्समवायित्वं तदतिरिक्तस्य जगद्वैलक्षण्यं स्वरूपतः सधर्मकत्वं स्वेच्छया व्यवहार्यत्वं ज्ञानात्मकं ब्रह्मण आकारं च मन्वानो ज्ञानाकारस्य ब्रह्मणः प्रपञ्चे प्रतिबिम्बेन लौकिकधर्मवत्त्वभानं मनुते । तन्मतेन विरोधसमाधानमाहेत्यर्थः । अस्याग्रे किञ्चिदंशेनादरणीयत्वादादावेतन्मतेन कथनम् । तत्रैकदेशी स्वमतं व्युत्पादयितुं पूर्वाधिकरणसन्देहं सिद्धान्तं चाक्षिपन्ननुयुङ्क्ते कथमित्यादि । अत्रोभयलिङ्गवाक्यश्रवणे किमापाततः

रश्मिः ।

व्यवच्छेदः । मनसा मानसीसेवानिविष्टेन । **ब्रह्मैवेति** । 'एकमेवाद्वितीय'मिति श्रुतेर्ब्रह्म, नतु तदतिरिक्तमित्येवकारार्थः । सात्त्विकज्ञानविषयत्वेन तत्स्मृत्युपष्टम्भात् । **विलक्षणेति** । प्रतीतिशब्देन शब्दात्प्राबल्यम् । **अर्थान्तरेति** । अर्थः भेदपक्षे नानेव यत्किञ्चिदभेदद्रष्टुः निन्दाश्रावणात्, किं पुनरभेदद्रष्टुरित्येकः । द्वितीयस्तु 'य इह नानेव पश्यति' भेदमिव पश्यति किं पुनर्भेदमिति । तदुभयादन्योर्थोऽर्थान्तरम् । यथा 'य इह स्वप्ने' नानेव भातं ब्रह्म पश्यति 'अविभक्तं च भूतेषु विभक्तमिव च स्थित'मिति ब्रह्मप्रकरणीयगीतावाक्याद्ब्रह्म तादृक् 'स मृत्योर्मृत्युमाप्नोति' । तथाच स्वप्नाध्याये आत्मदर्शनस्य मृत्युजनकत्वमुक्तम् । एवमर्थान्तरकल्पनेनेत्यर्थः । **भेदाङ्गीकार** इति । 'बहु स्या'मितीच्छातः पूर्वं नानेव भाते भेदाङ्गीकारे । **तत्प्रयोजन**मिति । ब्रह्मस्वरूपे इवार्थसाधनं गीतानुरोधेन फलम् । **तत्त्वत** इत्यादि । इच्छातोपि पूर्वम् । नानेव वर्तमानं नाना तत्र भेदं पश्यति । **विलक्षणेति** । नाना, भेदमिति यावत् । **तादृशस्येति** । ऐच्छिकभेदस्य । अतएव भेदाभेदवादः । **तादृशस्य** नानेव भानस्येति वार्थः । श्रौतत्वं तु मुखपद्माद्विनिःसृतत्वेन वेदत्वाद्गीतायाः । **तथेति** । जीवपरत्वेन प्रतीतानां विरोधादपि तथा । **एवेति** । उभयलिङ्गवत्त्वस्य वक्ष्यमाणत्वेनानिष्पत्तेस्तथा । **आक्षेपेति** । अबोधकत्वमाक्षेप्यमिति विरोधाग्रे तन्निराकरणयोराक्षेपसङ्गत्येत्यर्थः ॥ १३ ॥ **इति चतुर्थमुभयलिङ्गाधिकरणम्** ॥ ४ ॥

अरूपवदेव हि तत्प्रधानत्वात् ॥ १४ ॥ **सङ्गति**मिति । आक्षेपसङ्गतिं समाधानपदेन वदन्तः । आक्षेप्यविरोधसमाधानात् । मुख्यसिद्धान्तं त्यक्त्वैकदेशिमतकथने बीजमाहुः **अस्याग्र** इति । एकदेशिमतस्य । **अनुयुङ्क्त** इति । अत्रैकदेशी जैमिन्यादीनां सौत्राणामन्यतमो नोदयति

१. विरोधे । २. अविरोध आक्षेप्यः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

र्माणां विधिनिषेधयोः। जडजीवयोर्हि जडजीवधर्मा भवन्ति। अन्यत्र तूपदिश्यमाना उपासनार्था भवन्ति। ननूक्तो भेदाभावः। सत्यम्। तथापि कार्यकारणांशभावकृतस्य भगवद्विहारार्थं जातस्य भेदस्य निषेद्धुमशक्यत्वात्। तस्मात् ब्रह्मणि जडजीवधर्माणां निषेधो युक्तः। उपचारात्तु सर्वकर्मादयः।

विपरीतं किं न स्यात्, अत आह। अरूपवदेव। रूप्यते निरूप्यते व्यवह्रियत इति रूपं सर्वव्यवहारविषयत्वम्, तद्युक्तं रूपवत् विश्वम्। ब्रह्म तु

भाष्यप्रकाशः।

सन्देहः, उत ब्रह्मणि जडजीवधर्माणां विधिनिषेधयोर्विरोधनिर्धारात्। विरोधश्च किमुभयलिङ्गश्रवणात्, उतोभयलिङ्गवतोर्भेदनिश्चयादिति। तत्र सन्देहे द्वितीयं हेतुं निरस्यति जडजीवयोरित्यादि। तथाच द्वितीयस्य हेतोरभावात् ततः सन्देहो न युक्त इत्यर्थः। सन्देहे द्वितीयं हेतुं निरस्य स्वमतं साधयितुं विरोधद्वितीयहेतुमुज्जीवयति नन्वित्यादि। तथापीति। उक्तत्वेपि। तथाच तादृशस्यापि निषेधे 'बहु स्या'मित्यादेः 'स वै नैव रेम' इत्यादेश्च पीडया सृष्टिदशायां भेदाभावस्यैवाशक्यवचनत्वात् द्वितीय एव हेतुरवश्यमभ्युपेय इति तादृग्वाक्यश्रवणादापातत एव सन्देहः, उभयलिङ्गवतोर्भेदनिश्चयादेव च विरोध इत्यर्थः। तेन सिद्धं स्वसिद्धान्तमाह तस्मादित्यादि।

एवमेकदेशिसिद्धान्तेन समाधानं सङ्क्षेपतो निरूप्य, तदेव विशेषतो वक्तुं सूत्रमवतारयन्ति **विपरीतमित्यादि**। ब्रह्मण उपादानकारणत्वं पूर्वं सिद्धम्। अतः कारणधर्मा एव सर्वकर्मादयः कार्ये प्रतीयन्ते, सुवर्णरूपादय इव कटकादिषु, अतस्ते युक्त्या श्रुत्या च तत्र सिद्धा इत्यनेकप्रमाणसिद्धत्वात् विधिपक्षोपि युक्त इति स एव कुतो न स्यात्, विरोधपक्ष एव वा कुतो न स्यादित्याशस्येत्यर्थः।

रश्मिः।

स्येत्यर्थः। **अत्रेत्यस्य** व्याख्यान**मुभयेति**। जीवब्रह्मलिङ्गवाक्यश्रवणे। **आपाततो** निर्धारं विना। जीवधर्मा ब्रह्मधर्मा वेति सन्देहः। एवं पूर्वाधिकरणसन्देहमुक्त्वा विरोधमाहुः सिद्धान्तरूपम्। **विरोधश्चेति**। **उभयलिङ्गवतो**र्ब्रह्मजीवयोः। 'न भेदा'दिति सूत्रे भेदस्य निश्चयादाशङ्कांशे। तथाच भाष्यार्थ एवम्। विरोधो वा जडजीवधर्मसम्बन्धिनोः सर्वकर्मादिवाक्यास्थूलादिवाक्यगतविधिनिषेधयोः श्रवणादिति। **निरस्यतीति**। एकदेशी। **तत** इति। हेत्वभावात्सन्देहो न युक्तः। एतेन पूर्वाधिकरणसन्देह आक्षिप्त इत्याक्षेपसङ्गतिरुक्ता। **उज्जीवयतीति**। शङ्कामुखेन प्रतिपादयति। **उक्तत्वेपीति**। 'प्रत्येकमतद्वचना'दिति हेतुनोक्तत्वेपि। **तादृशस्येति**। क्रीडोपयोगिभेदस्येत्यर्थः। तेनैकदेशी जैमिनिः शिष्य इत्युक्तम्। पूर्वतन्त्रे भेदस्य द्वितीयाध्यायार्थत्वात्। **तादृशस्येति**। **एवेति**। भेदव्यवच्छेदकः। **द्वितीय एवेति**। उभयलिङ्गवतोर्भेदरूपः। एवकारः प्रथमहेतुव्यवच्छेदकः। **आपातत एवेति**। एवकारो ब्रह्मणि जडजीवधर्माणां विरोधनिर्धाररूपद्वितीयहेतुव्यवच्छेदकः। **एवेति**। उभयलिङ्गश्रवणरूपहेतुव्यवच्छेदकः। **विरोध इति**। सिद्धान्तः। **तस्मादित्यादीति**। **भाष्ये**। **निषेध इति**। अस्थूलादिश्रुतिषु निषेधः। **उपचारादं**शांशिभावसम्बन्धरूपात्तु सर्वकर्मसर्वकामादयो ब्रह्मणि जीवधर्मा इत्यर्थः। **प्रकृते**। **तदेवेति**। अन्ययोगव्यवच्छेदक एवकारः। **पूर्वमिति**। द्वितीयाध्याये समन्वयाधिकरणोक्तं उपादानकारणत्वं मतान्तरनिरासेन सिद्धम्। **एवेति**। कार्यधर्मयोगव्यवच्छेदक एवकारः। **तत्रेति**। ब्रह्मणि सिद्धाः। अतो नोपचार इति भावः। **विरोधेति**। पूर्वाधिकरणसि-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तद्विलक्षणम् । कार्यकारणांशांशिनोर्वैलक्षण्यस्य युक्तत्वात् । नन्ववैलक्षण्यमपि युक्तम्, कारणत्वात्, अत आह । तत्प्रधानत्वात् । तस्य ब्रह्मणः प्रधानत्वान्मुख्यत्वात् । यत्र हि यत् प्रतिपाद्यते, तत्र तस्य मुख्यत्वम् । ब्रह्मप्रतिपादने ब्रह्मधर्माणामेव मुख्यत्वम्, नान्यधर्माणाम् । यथा प्रशासनस्य मुख्यत्वम्, तथा 'सर्वकर्मे'ति लौकिककर्मानुवादेन भगवत्सम्बन्धे स्पष्टमेवामुख्यत्वम् । विशि-

भाष्यप्रकाशः ।

ङ्कायामेकदेशिमतेन समाधिं वक्तुं ब्रह्मणः प्रपञ्चवैलक्षण्यं तत्समवायित्वादिकं चाहेत्यर्थः । तेन सर्वकर्मत्वादयो धर्माः पाणिपादादयश्च ब्रह्मणि सन्ति न वेति सन्देहः । उभयविधवाक्यश्रवणं सन्देहबीजम् । सन्तीति पूर्वः पक्षः । न सन्तीति तन्मते समाधानमिति बोधितम् । समाधानव्युत्पादनाय सूत्रं व्याकुर्वन्ति रूप्यत इत्यादि । हेतुं व्युत्पादयन्ति यथेत्यादि । तथेति । वैधर्म्ये दृष्टान्तः । भगवत्सम्बन्ध इति । विधीयमान इति शेषः । तथाच तत्र 'ह्येतद्वै तदक्षर'मिति ब्रह्मैवोपक्रम्य प्रशासनस्योक्तत्वात् तस्य मुख्यत्वम्, अत्र तु 'मनोमयः प्राणशरीर' इति शरीरविशिष्टमुपक्रम्य पठितत्वात् तथेत्यर्थः । नन्वत्र न केवलोनुवादः, किन्तु लौकिकधर्मतुल्य-

रश्मिः ।

द्धान्तपक्षः । एवकार एकदेशिमतयोगव्यवच्छेदकः । उभयेति । सर्वकर्मास्थूलादिरूपविधिनिषेध(द्वि)-विधवाक्यश्रवणम् । समाधीति । पूर्वपक्षस्तु सर्वकर्मत्वादयो धर्मा ब्रह्मणि सन्तीति सिद्धान्तेन सेत्स्यति । भाष्ये । युक्तमिति । घटकपालद्वययोर्मृत्त्वेनावैलक्षण्यमपि युक्तम् । तस्येति । घट इत्युक्ते घटस्य मुख्यत्वं यथा । ब्रह्मणोऽधोक्षजत्वाद्ब्रह्मेत्यनुक्त्वा धर्मपर्यन्तानुधावनम् । ब्रह्मधर्मा अस्थूलादयस्तेषाम् । अन्यधर्मा जीवधर्मत्वेन प्रतीताः सर्वकर्मादयस्तेषाम् । एवकारव्यवच्छेद्यमाहुः नान्येति । एवकारेण न ब्रह्म व्यवच्छेद्यमधोक्षजत्वात् । प्रकृते । व्युत्पादयन्तीति । दृष्टान्तेन स्पष्टयन्ति । यथेत्यादीति । प्रशासनस्येत्यादि । मधुब्राह्मणान्त उक्तस्य । 'तदेतद्ब्रह्मापूर्वमनपरमनन्तरमबाह्यमयमात्मा ब्रह्म सर्वानुभूरित्यनुशासन'मिति श्रुतिः । यद्वा । प्रशासनं 'अथ ह वाचक्नव्युवाचे'त्यारम्भकेऽक्षरब्राह्मणोक्तं प्रशासनं तस्येत्यर्थः । 'एतस्य वा अक्षरस्य प्रशासने गार्गि द्यावापृथिवी विधृते तिष्ठत' इति श्रुतिः । भाष्ये । लौकिकेति । जीवधर्मत्वेन प्रतीतकर्मणामनुवादेन सिद्धकथनेन । स्पष्टमेवेति । एवकार आरोपापवादसङ्गतेरपि । अमुख्यत्वमौपचारिकत्वम् । जीवधर्मत्वेन प्रतीतधर्मविरोधपरिहारोत्र निरूप्यत इति सर्वत्वविशिष्टकर्मणामजीवधर्मत्वेन निरूपणविरोधमाशङ्क्य समादधुः विशिष्टेति । सर्वत्वविशिष्टकर्मबोधनेपि । प्रसिद्धसिद्धकथकत्वात् । प्रसिद्धातिरिक्तकर्मकल्पनायाम् । प्रमाणेति । 'सर्वे ब्राह्मणा भोजयितव्या' इति दृष्टान्तसहितशब्दप्रमाणवद्विलक्षणप्रमाणाभावात् । ननु सर्वकर्मणां सर्वकामानां प्रारब्धसञ्चितादिरूपत्वात्पशुपुत्रादिविषयत्वाच्च कथमविरोध ईश्वरपरत्वेनेत्यत आरोपेणेत्याह यथाकथञ्चिदिति । उपासनायां बोध्यम् । एतेन पादार्थो जीवस्य मुक्तियोग्यता सापि स्मारिता । एवकारो 'वाचं धेनुमुपासीते'त्यादौ तथा दर्शनात् । एवेति । ननु सर्वकर्मत्वादीन् छान्दसाननूद्य । निषेधार्थं सर्वकर्मत्वादिवैशिष्ट्यबोधनमुचितम् । प्रक्षालनपङ्कन्यायेन प्रतिपादनवैयर्थ्यापातात् । तथेति । वैधर्म्य इति । दृष्टान्ते मुख्यत्वपदम्, दार्ष्टान्तिकेऽमुख्यत्वपदमिति साधर्म्ये दृष्टान्तवैषम्यमाशङ्क्योक्तम् । उक्तार्थसिद्धमाहुः तथाचेति । 'अथ ह वाचक्नव्युवाचे'त्यारम्भकेऽ-

१. समाधि । २. नानुवाद इति मूले पाठः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ष्टबोधनेपि सर्वशब्दस्य प्रसिद्धानुवादकत्वादतिरिक्तकल्पनायां गौरवात् प्रमाणाभावाच्च यथाकथञ्चित्तद्धर्मवत्त्वेन[1] ज्ञानस्यैवोपयोगाल्लोकधर्मानेवानूद्य विशिष्टबोधनमुचितम्[2]। अरूपमिति वक्तव्ये अरूपवदिति वचनम्, भिन्नधर्माणामेवैवं निर्णयः, न तु प्रशासनवद्भगवद्धर्माणाम्। तस्मात् कार्यवत् तद्धर्माणामपि कार्यत्वात् भगवत्त्वम्, न भगवद्धर्मत्वमिति सिद्धम् ॥ १४ ॥

भाष्यप्रकाशः।

धर्मवत्ता ब्रह्मणो बोध्यत इत्यवयुत्यानुवादान्नैतेषामप्यमुख्यत्वम्, अत आहुः **विशिष्टेत्यादि**। मास्तु सर्वकर्मादिशब्दानामनुवादकत्वम्, तथापि के सर्वे इत्याकाङ्क्षायां ये लोकप्रसिद्धास्तानेव सर्वपदेनानूद्य, 'कुन्त्या हि सदृशौ पादौ दृष्ट्वा कर्णस्य धीमत' इतिवत् सर्वेषामिव कर्माणि यस्येति तत्तुल्यानामतिरिक्तानां विधानं समासेऽङ्गीकार्यम्, तथा सति गौरवात्, सर्वकर्मादिश्रुतेर्वादकवलितत्वात् तदतिरिक्तस्यैतद्धर्मविधायकप्रमाणस्याभावाच्चातिरिक्तकल्पनामकृत्वा यथाकथञ्चित् तद्धर्मवत्त्वेन ज्ञानस्यैवोपासनायामुपयोगाल्लोकधर्मानेवानूद्योपचारेण शरीरधर्मविशिष्टबोधनं युक्तमित्यर्थः। ननु यदि सर्वकर्माद्यभावेन सर्वव्यवहारातीततया जगद्वैलक्षण्यं सूत्रकृतोभिप्रेतं स्यात्, तदा अरूपमित्येव वदेत्, नत्वरूपवदिति, वदति त्वेवम्, अतोतिरिक्तधर्मकल्पनैव युक्तेत्यत आहुः **अरूपमित्यादि**। **एवं निर्णय इति**। औपचारिकत्वनिर्णयः। तथाच लोकवैलक्षण्येन लौकिकव्यवहारातीतत्वमेवाभिप्रेतम्, न तु यावद्व्यवहारातीतत्वम्, अस्थूलादिवाक्य एव प्रशासनश्रावणेन तथा निश्चयादिति बोधनाय तथा कथनम्, अतो नानेनातिरिक्तधर्मकल्पनसिद्धिरि-

रश्मिः।

क्षरब्राह्मणे श्रुतिरियम्। **मुख्यत्वमिति**। ब्रह्मरूपत्वान्निन्दितस्यापि मुख्यत्वं प्रकाशाश्रयन्यायेन। **अत्र त्विति**। छान्दोग्यीयपञ्चमप्रपाठके तु। **पठितत्वादिति**। 'सर्वकर्मा सर्वकाम' इत्यादेः पठितत्वात्। **तथेति**। अमुख्यत्वमौपचारिकत्वम्। **अनुवाद इति**। जीवधर्माणां सिद्धानां कथनम्। **अवयुत्येति**। लौकिकधर्मान् तुल्यत्वेन रूपेणालौकिकधर्मेषु मिश्रीकृत्य। **एतेषामिति**। सर्वकर्मत्वादीनाम्। **अमुख्यत्वमिति**। औपचारिकत्वम्। ननु शक्यस्य तौल्यसम्बन्धरूपा लक्षणा कुतो नेति चेत्। न। तथा सति लौकिकधर्मपदप्रयोगः स्यात्, अलौकिकधर्मेषु, तीरे गङ्गापदप्रयोगवत्। अतो नौपचारिकत्वमिति। **अनुवादकत्वमिति**। जीवे सिद्धानां कथकत्वमीश्वरे। **मास्त्विति**। पूर्वोक्तावयुत्यानुवादकत्वमस्तु। यथाकथञ्चिदिति भाष्यं विवृण्वन्ति स्म **यथाकथञ्चिदिति**। **उपचारेणेति**। तेषामुपचारेणालौकिकान् हित्वा लौकिकानेवारोप्यापवादार्थं तैर्धर्मैः शरीरविशिष्टबोधनमित्यर्थः। **अतिरिक्तेति**। आरोप्यातिरिक्तनित्यधर्मकल्पना। एवकार आरोप्यधर्मयोगं व्यवच्छिनत्ति। **अरूपमित्यादीति**। रूपं सर्वव्यवहारविषयत्वम्, अरूपं सर्वलौकिकव्यवहारातीतत्वम्। **इति वक्तव्ये** रूपवद्विश्ववैलक्षण्यायारूपवदितिवचनम्, **भिन्नधर्माणां** विश्वगतानामेव, नतु भगवद्गतानामिति वक्ष्यन्ति। एवं आरोप्यत्वेन निर्णयः। एवकारव्यवच्छेद्यमाहुः **नत्विति**। **तद्धर्माणामिति**। कार्यधर्माणाम्। **नेति**। नञा भेदोक्तेर्नेति। भेद एव विलक्षणशब्देनोच्यते, ब्रह्म तु तद्विलक्षणमिति भाष्ये। तदेतदाहुः **तथाचेति**। पूर्वोक्तविश्ववैलक्षण्येन। **एवेति**। अरूपवदित्यत्र नञा भेदप्रत्यायनाद्विलक्षणं न भेदातिरिक्तमिति भेदातिरिक्तविलक्षणयोगव्यवच्छेदकैवकारः। अन्यमप्येवकारव्यावर्त्यमाहुः **नत्विति**। एको वाच्यः, एकस्तात्पर्यविषयः। अत्र हेतुमाहुः **अस्थूलादीति**। **तथेति**। लौकिकव्यवहारातीतत्वम्, नतु सर्वव्यवहारातीतत्वमिति निश्चयात्। **तथेति**। मतुबन्तारूपवत्पदकथनम्। **अनेनेति**। अरू-

१. धर्मवत्त्वेन। २. वैशिष्ट्यबोधनम्।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रकाशवच्चावैयर्थ्यात् ॥ १५ ॥

नन्‍ु सर्वव्यवहारातीते शास्त्रवैफल्यम्, 'मनसैवैतदाप्तव्य'मिति विरोधश्च न परिहृतः, 'तं त्वौपनिषदं पुरुषं पृच्छामि' 'यतो वाचो निवर्तन्त' इति चेत्यत आह । प्रकाशवत् । यथा सौरः प्रकाशो व्यवहार्योऽव्यवहार्यश्च, न हि स्वतः सम्पादयितुं शक्यते, स्थापयितुं वा, आगते तु सूर्ये मेघाद्यभावे च सान्निध्यमात्रेण व्यवहारः कर्तुं शक्यते, तथा लौकिकवाङ्मनोभिर्न शक्यते व्यवहर्तुम्, ईश्वरसन्निधाने तु शक्यत इति द्वयमाह श्रुतिः । कुत एतदवगम्यते । तत्राह । अवैयर्थ्यात् । अन्यथा शास्त्रं व्यर्थं स्यात् । चकाराद्धर्माणां तथात्वविरोधः परिहृतः । 'आसीनो दूरं व्रजति' 'अपाणिपादो जवनो ग्रहीता पश्यत्यचक्षुः स शृणो-

---

भाष्यप्रकाशः ।

त्यर्थः । तेन सिद्धमाह तस्मादित्यादि । कार्यवदिति । प्रपञ्चवत् । न भगवद्धर्मत्वमिति । न नित्यभगवद्धर्मत्वम् ॥ १४ ॥

प्रकाशवच्चावैयर्थ्यात् ॥१५॥ सूत्रमवतारयन्ति नन्वित्यादि । सर्वकर्मत्वादीनामौपचारिकत्वात् प्रशासितृत्वादीनां चालौकिकत्वेन सम्यग्बुद्धावनारोहात् सर्वव्यवहारातीते ब्रह्मण्यङ्गीकारे कृते ज्ञेयत्वेनापि व्यवहारस्यासम्भवाज्ज्ञानार्थस्य विचारशास्त्रस्य वैफल्यम् । 'मनसैवैतदाप्तव्य'मिति विरोध इति । सर्वव्यवहारातीतस्य मनोविषयत्वाभावेन, तथा एतस्याः श्रुतेः 'अप्राप्य मनसा सहे'त्यनेन च सह विरोधो न परिहृत इत्यर्थः । अस्मिन् सूत्रे प्रकाशवदिति न मतुप्, किन्तु तृतीयान्ताद्वतिः । पूर्वसूत्रादेकदेशभूतमपि तत्पदमनुवर्तते । तत् ब्रह्म प्रकाशेन तुल्यम् । तत्र कथं तुल्यमित्याकाङ्क्षायां सूत्रं व्याकुर्वन्ति यथेत्यादि । व्यवहार्यत्वाव्यवहार्यत्वे व्युत्पादयति नहीत्यादि । स्थापयितुमिति । आयातो यथा नापयाति तथा निरोद्धुम् । सन्निधाने तु शक्यत इति । उपासनादिसाधनेनेश्वरसन्निधाने प्रतिबन्धकाभावाच्छक्यते । द्वयमिति । मनसा वाचा चावाप्यमनाप्यं चेति द्वयम् । शास्त्रमिति । मनसैवैतत्, तापनीयरूपम्, ज्ञानफलबोधकं 'तमेवे'त्यादिरूपं चेत्यादिकं उभयबोधकं शास्त्रम् । प्रकाशतुल्यत्वसङ्ग्राहकचकारसूचितं धर्माणां लौकिकत्वादिविरोधपरिहारं व्याकुर्वन्ति आसीन इत्यादि । अलौकिका इति । लोकविरुद्धाः ।

रश्मिः ।

पवत्पदेन । अतिरिक्ताः धर्मा वैदिकाः तेषां कल्पनस्य सिद्धिरारोपार्थम् । नित्येति । साक्षात् । साक्षाद्धर्मा नित्यभगवद्धर्माः ॥ १४ ॥

प्रकाशवच्चावैयर्थ्यात् ॥ १५ ॥ बुद्धाविति । यथा बालस्य शृङ्ग्यमितोयादिभ्यो वारितस्य बुद्धौ वारणादेरनाहस्तद्वत् । मनसेति भाष्यं विवृण्वन्ति स्म मनसैवेति । इति चेति भाष्यीयचकारार्थमाहुः एतस्या इति । सन्निधाने तु शक्यत इति । ईश्वरसन्निधानं हृदि 'प्रविष्टः कर्णरन्ध्रेणे'तिवाक्यात् । फलप्रकरणे प्रसिद्धम् । व्रजभक्तेषु ईश्वरसन्निधानं भगवद्वाक्यपूर्वपक्षीकरणसमये । प्रतिबन्धकेति । अलौकिके तु लौकिकत्वरूपप्रतिबन्धकाभावात् । तापनीयेति । 'तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः । दिवीव चक्षुराततम्' । एवंरूपं शास्त्रम् । अत्र मनश्चक्षुषोः करणत्वविरोधः । तमेवेति । 'तमेव विदित्वातिमृत्युमेती'ति । किञ्चादिना 'यतो वाच' इत्यपि । अत आहुः उभयेति । मनश्चक्षूरूपकरणबोधकम् । मनसा वाचा चावाप्यमनाप्यं चेति बोधकम् । धर्माणा-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

त्यकर्ण' इत्यादावलौकिका भगवद्धर्मा उच्यन्ते । अकारणककार्यवचनात् तद्ध[1]र्माणां चाकार्यत्वं बोधयति । तस्माद्व्यवहार्येपि न शास्त्रवैफल्यम् ॥ १५ ॥

आह च तन्मात्रम् ॥ १६ ॥

किञ्चिदाशङ्क्य परिहरति । नन्वलौकिकानीन्द्रियाणि विरोधाभावाय कथं न कल्प्यन्ते, अन्यथा अकारणककार्यत्वम्, तस्य च नित्यत्वमलौकिकत्वम्, ततश्च 'पश्यत्यचक्षु'रिति विरोध इत्याशङ्क्य परिहरति । आह च श्रुतिः स्वयमेव तन्मात्रं प्रज्ञानघनमात्रम् । 'स यथा सैन्धवघनोऽनन्तरोऽबाह्यः कृत्स्नो रसघन एवं वा अरे अयमात्मानन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एवे'ति स्वरूपातिरिक्तानामिन्द्रियाणामभावात् । नच क्रियाभावोपि । वेदविरोधेन तथा कल्पयितुमशक्यत्वात् । वेदनिःश्वासायनभूतसमुत्थानादेरुक्तत्वाच्च । अतो नेन्द्रियाणां परिक-

भाष्यप्रकाशः ।

अकार्यत्वमिति । नित्यत्वम् । तस्मादिति । अलौकिकधर्मसत्त्वाच्छास्त्रस्य च सन्निधा[2]नार्थत्वात् ॥ १५ ॥

आह च तन्मात्रम् ॥१६॥ सूत्रमवतारयन्ति किञ्चिदित्यादि । एतस्यैव विभागो नन्वित्यादि । विरोध इति । लोकविरोधः । सूत्रं व्याकुर्वन्ति आहेत्यादि । तथाच कृत्स्नस्य प्रज्ञानघनत्वोक्त्या शास्त्रतः प्रतीयमानस्य सर्वस्य केवलज्ञानात्मकताया एव सिद्धेः स्वरूपातिरिक्तानामिन्द्रियाणामभावादतिरिक्तेन्द्रियकल्पना न युक्ता । नचेन्द्रियाभाववत् क्रियाया अभावोपि शङ्क्यः । दूरव्रजनादिबोधकवेदवाक्यविरोधेन तथा कल्पयितुमशक्यत्वात् । नच तत्प्रकरणान्तरत्वाच्छरीरविशिष्टबोधनपरमिति शङ्क्यम् । अत्रापि वेदनिःश्वासायनभूतसमुत्थानादेः श्रावणेन श्वासोच्छ्वासजगत्स्थापनभूतसमुत्थानतदनुविनाशनक्रियाणामुक्तत्वादित्यर्थः । उक्तत्वाच्चेति । चकारः 'प्राण-

रश्मिः ।

मिति । सर्वकर्मत्वादीनाम् । आदिनाऽलौकिकत्वम् । भाष्ये । अकारणेति । दूरं व्रजनस्य आसनमुपवेशनं न कारणम् । 'गतिरिति पादयो'रिति श्रुतेः । अपाणेर्ग्रहीतृत्वमकारणककार्यम् । पाण्यभावस्याकारणत्वात् । तथाऽपादो जवन इत्यादि । तद्धर्माणां चेति । अकारणककार्यधर्माणां अकार्यत्वमलौकिकत्वात् ॥ १५ ॥

आह च तन्मात्रम् ॥ १६ ॥ एतस्यैवेति । अव्याख्यानार्थव्यवच्छेदक एवकारः । विभाग इति । व्याख्यानम् । पूर्वं व्याख्यानात् । एवेति । अश्रुतत्वादन्यव्यवच्छेदकः । क्रियाया इति । 'ज्ञानशक्तिक्रियाशक्ती सन्दिह्येते परस्थिते' इति भाष्योक्तायाः । नचेत्यारभ्य हेत्वन्तं भाष्यं विवृतम् । वेदेत्यादिभाष्यं विवरीतुमाहुः नचेत्यादिना । प्रकरणं जीवपरत्वेन प्रतीतधर्माणाम् । तदन्यत्प्रकरणं शुद्धब्रह्मप्रकरणं प्रकरणान्तरं तत्त्वात् । शरीरेति । आकाशरूपशरीरविशिष्टेत्यर्थः । परब्रह्मणोऽधोक्षजत्वात् । विवृण्वन्ति स्म अत्रापीति । अत्रापि गार्गिब्राह्मणद्वयेपीत्यर्थः । जीवपरत्वधर्माणां द्वाभ्यामेव प्रतीतेः । एकत्र 'विज्ञानघन एवैतेभ्यो भूतेभ्य' इति पठनम्, एकत्र 'प्रज्ञानघन एवैतेभ्यो भूतेभ्य' इति पठनमिति । वेदनिःश्वासायनं च भूतसमुत्थानं च तदादेः । श्रावणेनेति । 'स यथार्द्रैन्धाग्ने'रित्यारभ्य 'निरासितानी'त्यन्तश्रुतौ श्रावणेन । 'प्रज्ञानघन एवे'त्युक्त्वाग्रे पठ्यते 'एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानु

१. धर्माणां च कार्यत्वमिति पाठः । २. अलौकिकधर्मबोधनार्थत्वादिति पाठः मूले ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ल्पना, किन्तु सर्वाकारस्वरूपं वस्त्वेव तादृशमिति मन्तव्यम् । कृत्स्नवचनात् । चकारात् 'सर्वेन्द्रियविवर्जित'मिति स्मृतिरपि । तस्मान्नेन्द्रियकल्पनया अविरोधः ॥ १६ ॥

दर्शयति चाथोपि स्मर्यते ॥ १७ ॥

पुनः प्रकारान्तरेण विरोधमाशङ्क्य परिहरति । ननु ब्रह्म जगत्कारणमिति सिद्धम्, तच्च समवायि निमित्तं चेति च, कारणधर्मा एव हि कार्ये भवन्ति, असम्भावनायां त्वन्यथा कल्पनम्, कामादयो धर्माश्च श्रुतौ विहिताः, ते ब्रह्मण एव भवितुं युक्ताः, निषेधिकापि श्रुतिः, न हि वेदवादिनामणुमात्रमप्यन्यथा कल्पनमुचितमित्याशङ्क्य परिहरति ।

भाष्यप्रकाशः ।

न्नेव प्राणो भवती'त्यादेः समुच्चायकः । विषयवाक्यसिद्धमर्थं निगमयन्ति अत इत्यादि । अकृत्स्नत्वबुद्ध्युत्पादकप्रकारसत्त्व एव तन्निवारकस्य कृत्स्नपदस्य सार्थक्यसिद्धेस्तद्वचनात् तथेत्यर्थः । सिद्धमाहुः तस्मादित्यादि । क्रियाणां केवलज्ञानात्मकेन स्वरूपेणैव सिद्धत्वान्न तदनुरोधेनापि तथेत्यर्थः ॥ १६ ॥

दर्शयति चाथोपि स्मर्यते ॥ १७ ॥ पुनरित्यादिना सूत्रमवतार्य तद्विभजन्ति नन्वित्यादि । असम्भावनायां त्वन्यथा कल्पनमिति । कार्यासाधारणधर्माणां कार्यत्ववत् कारणे असम्भावनायां तु विवर्तवादस्य वा असतः सत्ताया वा आश्रयणेन श्रुतिविरुद्धं कल्पनम् । इत्याशङ्क्येति । एवं प्रकारेण विरोधमाशङ्क्य ।

रश्मिः ।

विनश्यति न प्रेत्य संज्ञास्तीत्यरे ब्रवीमीति होवाच याज्ञवल्क्य' इत्यनया श्रावणेन । पूर्वश्रुतौ श्वासोच्छ्वासः वेदशब्दजन्यजगतः स्थापनम् । 'कार्यवत्तद्धर्माणा'मित्युक्तभाष्ये कार्यप्रसङ्गे तद्धर्माणामुक्तेर्जगत्स्थापनमुक्तम् । द्वितीयायां भूतसमुत्थानादिकं स्पष्टम् । छान्दोग्यीयाष्टमोपदेशानुसारेण सर्वभूतसमुत्थानम्, नतु ताम्बूलपूगीफलादिजन्यमदशक्तिवदित्याहुः उक्तत्वादिति । तथाच निलीनप्राणादेराविर्भावः, नतु तत्रासत्याया मदशक्तेरित्यर्थः । 'नासतो विद्यते भाव' इति वाक्यात् । विषयेति । विषयवाक्यं 'स यथा सैन्धवे'त्युक्तम् । तत्सिद्धमर्थम् । अत इति शब्देन पञ्चम्यन्तेन घटितं भाष्यमिति निगमयन्तीत्युक्तम् । तस्मात्पर्वतो वह्निमानितिवत् । सर्वाकारत्वसमर्थनायाहुः अकृत्स्नत्वेति । तादृशप्रकारः प्रज्ञानस्य गुणत्वप्रकारः । तद्वचनादिति । कृत्स्नपदवचनात् । तथा प्रज्ञानघनत्वेन गुणगुणिसर्वाकारस्वरूपं वस्त्वेव, न तु मिश्रम् । तादृशमित्यर्थः । क्रियाणामिति । 'प्राणन्नेवे'त्यादौ प्राणेन्द्रियानुकूलक्रियाणाम् । स्वरूपेण स्वसत्तारूपेण । एवकारोऽसतः सताव्यवच्छेदकः । तदन्विति । अलौकिकेन्द्रियकल्पनानुरोधेनापि तथा अविरोध इत्यर्थः ॥ १६ ॥

दर्शयति चाथोपि स्मर्यते ॥ १७ ॥ नन्वित्यादीति । विरोधमिति । कामाकामबोधकश्रुतिविरोधम् । कार्येति । कार्यासाधारणधर्माः अनित्ये जननदास्यसाधनकर्तृत्वानपहतपाप्मत्वानि तेषाम् । कार्यत्वेति । षष्ठ्यन्ताद्वतिः । श्रुतीति । 'यतो वा इमानी'ति श्रुतिविरुद्धम् । भाष्ये । कामादय इति । शारीरकब्राह्मणे 'काममय एवायं पुरुषः यथाक्रतुर्भवति, तत्कर्म कुरुत' इति श्रुतौ तत्कर्म । 'तदभिसम्पद्यत' इति श्रुतौ तत्कर्मसम्पन्नः । एवं विहिताः । अत्र भवतीति लेडन्तं पदमिति । एवेति । न तु जीवस्येत्यर्थः । युक्ता इति । नैयायिका अपि कारणधर्माः कार्यधर्मानारभन्त इत्याहुः निषेधिकेति । 'अथाकामयमानो योऽकामो निष्काम आत्मकाम आप्तकामो भवती'ति । ज्योतिर्ब्राह्मणेपि 'अथ सुप्तो यत्र न कंचन कामं कामयते न

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

दर्शयति श्रुतिरेव जडजीवधर्माणां भगवत्यभाव इति । 'द्वे वा व ब्रह्मणो रूपे' इत्युपक्रम्य, द्वेधा पञ्चभूतान्युक्त्वा, 'अथात आदेशो नेति नेती'त्याह । इतिशब्दः प्रकारवाची । ब्रह्म पञ्चमहाभूतानि भवति, न त्वेवंप्रकारकम्। तत् साधयति। न। न भवत्येव ब्रह्म तादृशम्। हि युक्तोऽयमर्थः। 'एतस्माज्जात'मिति । न हि कार्यकारणयोरेकः प्रकारो भवति । अतो 'नेती'ति प्रकारनिषेधोपसंहारः, न तु समवायित्वमात्रत्वम्, किन्तु 'अन्यत् परमस्ति' इति

भाष्यप्रकाशः ।

परिहारं वदन्तो दर्शयतिपदसूचितं विषयवाक्यमुपन्यस्य व्याकुर्वन्ति द्वे इत्यादि ।

इदं बृहदारण्यके मूर्तामूर्तब्राह्मणे । तत्र 'द्वे वा व ब्रह्मणो रूपे' इत्युपक्रम्य अधिदैवताध्यात्मभेदेन द्वेधा पञ्चभूतान्युक्त्वा, 'अथात आदेशो नेति नेती'तिनिषेधमाह । तत्र किं द्वौ नञौ प्रकृतमर्थं गमयत इति द्वयोः स्थापनमात्रं क्रियते, किं वा वीप्सया पूर्वोक्तं सर्वं निषेधति, उत रूपद्वयमेव निषेधति, अथवा पूर्वप्रतिषेधो भूतराशिं निषेधति, द्वितीयो वासनाराशिमित्यादिशङ्कायां श्रुतिः स्वयमेव विवृणोति । 'न ह्यस्मादिति नेत्यन्यत्परमस्ती'ति । अत्र व्याख्येये वाक्ये अथशब्दः प्रक्रमभेदकः । अत इति हेतौ पञ्चमी, ल्यब्लोपे वा । उक्तं रूपद्वयं हेतूकृत्य आदेशः ताभ्यां कार्याभ्यां रूपाभ्यां ज्ञाप्यस्य ब्रह्मण उपदेशो 'नेति नेती'ति। पूर्व इतिशब्दः प्रकारवाची । तथाच समवायित्वात् ब्रह्म पञ्चभूतानि भवति, न तु इति एवं प्रकारकं पञ्चभूतप्रकारकम् । एषः प्रथमनेत्यर्थः । तदेतद्व्याख्यानेन साधयति । 'न ह्यस्मा'दित्यनेन । न, न भवत्येव ब्रह्म तादृशम् । हि युक्तोयमर्थः । युक्तत्वे हेतुः 'एतस्मा'दिति । यत एतस्माज्जातं तत् । न हि कार्यकारणयोरेकः प्रकारो भवति । अतो व्याख्यानात् प्रथमेन नेतीत्यनेन प्रकारनिषेधोपसंहारः । द्वितीयं नेतीति व्याख्याति 'अन्यत्परमस्ती'ति । भिन्नप्रकारकत्वेपि न तु समवायित्वमात्रत्वम्,

रश्मिः ।

कंचन स्वप्नं पश्यति तद्वा अस्यैतत् आत्मकाममाप्तकाममकाम९रूप'मिति । **श्रुतिरेवेति** । स्मृतिव्यवच्छेदकः । 'जडजीवधर्माणां भगवत्यभाव' इति श्रुतिर्मूर्तामूर्तब्राह्मणस्थैव दर्शयतीत्यन्वयः । **प्रकृते** । **दर्शयतीति**। प्रज्ञानघनविचारात् सदसद्विलक्षणत्वं तस्य मूर्तामूर्तब्राह्मणे दर्शयति इत्येवं सूचितम् । विषयवाक्यशब्दस्तु सूचितशब्दसमभिव्याहारान्नाधिकरणावयवत्वं वक्ति । अधिकरणावयवे विषयवाक्ये सूत्रपदघटितत्वस्य प्रायो दर्शनात् । **इत्यादीति** । आदिना प्रकारैतावत्तयोर्निषेधो वा । **प्रक्रमेति** । मूर्तामूर्तप्रक्रमभेदकः । **इतिशब्द** इति भाष्यं विवृण्वन्ति **पूर्व** इति । **ब्रह्मेति**भाष्यं विवृण्वन्ति स्म **तथाचेति**। **एवमिति** । एवं पूर्वपरामर्शी पूर्वपरामृष्टपञ्चमहाभूतत्वं तत्प्रकारकं पञ्चमहाभूतत्वप्रकारकं नत्वित्यर्थः । भावप्रधानः पञ्चभूतशब्दः । एष प्रथमनेतीत्यस्यार्थः । **तत्साधयतीति** भाष्यविवरणं **तदेत**दित्यादिश्रुतिः । तामाहुः **नह्यस्मादित्यनेनेति** । व्याख्यानेनेत्यनेनान्वेति । **एतस्मादितीति** । अस्मादिति श्रौतपदार्थः । श्रुतेः प्रत्यक्षमिति इदमः प्रयोगः । आचार्यास्तु तत्काले समीपतरं पश्यन्तीत्येतच्छब्दं प्रयुयुजुः । अत एव क्वचित्पुस्तके **नह्येतस्मादिति नेत्यन्यत्वमिति** पठ्यते । न हीतिभाष्यविवरणं **नहीति** । अत इति भाष्यं विवृण्वन्ति स्म **अत** इति । **नेतीत्यनेनेति** । व्याख्यानश्रुतिगतेन नेतीत्यनेन । **नेतीति** । व्याख्येय**नेतीति**शब्दौ व्याख्यातश्रुतिर्व्याख्याति । तदेतद्भाष्यवि-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

रूपं निरूप्य, नाम निरूपयति । 'सत्यस्य सत्य'मिति । तेन प्रपञ्चातिरिक्तब्रह्मणो

भाष्यप्रकाशः ।

किन्त्वन्यत् परमस्तीति । तथाच द्वितीयेन नेतीत्यनेन एतावत्तानिषेधोपसंहारः । तथाचात्र न सर्वनिषेधः, नापि रूपद्वयनिषेधः, नापि भूतवासनाराश्योर्निषेधः, न वा तत्स्थापनमात्रम्, निषेधपक्षेषु व्युत्पादनपूर्वकप्रतिपादनवैयर्थ्यापातात्, स्थापनमात्रपक्षे निषेधस्य प्रक्रमान्तरस्य च वैयर्थ्यप्रसङ्गात्, अतः प्रकारैतावत्तयोरेव निषेध इत्यर्थः ।

एतदेव निगमयितुमाहुः इतीत्यादि । इत्येवं अरूपत्ववारणाय रूपं निरूप्यानामत्ववारणाय नाम निरूपयति 'सत्यस्य सत्य'मिति । तत्र व्याख्येयवाक्य इव व्याख्यानवाक्येपि एवं शङ्का स्यात् । हि निश्चयेन । न एतस्मात् किन्त्वाविद्यकमिति हेतोर्नेति इति, इदं ब्रह्म न भवतीत्युच्यते, किन्त्वन्यत् परं ब्रह्मास्तीति । यद्वा । हि यस्माद्धेतोर्नेति नेतीति वीप्सया मूर्तामूर्ते तद्वासनात्मिकामविद्यां तत्कार्यादि च सर्वं निषिध्य सर्वनिषेधावधित्वेन तत्साक्षित्वेन च ब्रह्मैव निर्दिष्टं इति, कृत्वा, नेति नेतीत्येतस्मात् परं उत्कृष्टं ब्रह्मणो निर्देशनं अन्यन्नास्तीति । अथवा । न ह्येतस्माद्ब्रह्मणो व्यतिरिक्तमस्तीति नेतीत्युच्यते, न पुनः स्वयमेव नास्तीत्यर्थः । तच्च दर्शयति, अन्यत् परमनिषिद्धं ब्रह्मास्तीति त्रिधापि अक्षरयोजना सम्भाव्यते । अतः को वा व्याख्यानवाक्यार्थ इति, तत्सन्देहं निराकर्तुं नाम निर्वक्ति । 'प्राणा वै सत्यं तेषामेष सत्य'मिति । प्राणन्तीति प्राणाः पूर्वोक्ता अपरब्रह्मरूपाः तत्कार्यत्वात् । सत्यम् । नाविद्यकाः ब्रह्मविवर्तभूताः । तत्र

रश्मिः ।

वरणेनैव विवृण्वन्तोऽन्वयमाहुः **भिन्नेति** । **एतावत्तेति** । पञ्चमहाभूतमात्रतानिषेधोपसंहारः । तथाच इति नाम पञ्चमहाभूतप्रकारेण ब्रह्म नेति द्वितीयनेतीत्यस्यार्थः, किन्त्वन्यत्तत्समवायि परमस्ति तत इति भावः । **नवेति** । नन्द्वयेन मूर्तामूर्तस्थापनमात्रम् । **व्युत्पादनेति** । निषेधस्य व्युत्पादनेत्यादिः । व्युत्पादनं व्युत्पत्तिः । सा च नश्यतीति नञ् । नच भावे वा ङञ् डौ । प्रतिपादनं 'किं द्वौ नञा'-वित्यादिनोक्तपक्षाणाम् । मूर्तामूर्ते नेति न, किन्तु इति उक्तप्रकारेण । **नैयायिकानां प्रसिद्धमिति** । निषेधवीप्सया निषेधादरात्सर्वं निषिद्धम् । नो चेदुपसंहारे न भवेत् । किंवा रूपद्वयनिषेधद्वयमिति यथासंख्यमन्वयः । व्याकरणात् । पूर्वप्रतिषेधो भूतराशिं आध्यात्मिकं निषेधति । द्वितीयो वासनाराशिं अधिदैवतम् । **स्वयमेवेति** । एवकारः स्मृत्यादियोगव्यवच्छेदकः । **एवेति** । प्रतिपादनादन्ययोगव्यवच्छेदकैवकारः । **इत्येवमिति** । इतिर्हेतावित्यनुक्त्वेत्येवमिति यदुक्तम्, तेन निगमनमेवं प्रकारेणेत्येवं तृतीयान्तोक्तहेतुघटितमिति बोध्यम् । **तत्रेति** । रूपनिरूपणे । एतस्मादित्यस्मादित्यत्र भाष्यानुरोधात् । **आविद्यकमिति** । मूर्तामूर्तरूपं इति हेतोः नेति । इमौ शब्दौ व्याकुर्वन्ति स्म **इतीति** । इत्येवंप्रकारं इदं मूर्तामूर्तरूपं ब्रह्म न भवत्याविद्यकत्वात् इत्युच्यते । प्रथमं द्वयोः स्थापनमात्रं क्रियत इत्युक्त्वा द्वितीय आहुः **यद्वेति** । तत्कार्यादीत्यादिनाकार्यकार्यग्रहणम् । **सर्वनिषेधेति** । यथा नेदं रजतमिति निषेधे निषेधावधित्वेन शुक्तिस्तद्वत् । **ब्रह्मैवेति** । एवकारेण मूर्तामूर्तयोगव्यवच्छेदः क्रियते । नेतीत्येतस्मादत्यन्तेन ह्यस्मादिति नेतीत्यन्तं व्याख्यानं व्याकृतम् । **परमित्यारभ्यान्यत्परमस्तीति** व्याकृतम् । नहीति नञोत्रास्तिनान्वयः कृतः । उत रूपद्वयमिति तृतीयपक्ष आहुः **अथवेति** । **अत** इति । व्याख्यानवाक्यस्यार्थः । **पूर्वोक्ता** इति । 'प्राणन्नेव प्राणो भवती'ति श्रुत्युपन्यासेन पूर्वसूत्रचकारोक्ताः । यद्वा 'अथामूर्तम् । प्राणश्च यश्चायमन्तरात्मन्नाकाशः । एतदमृतमेतद्यदेतत्त्य'मिति मूर्तामूर्तब्राह्मणस्थाः प्राणाः । **तत्कार्यत्वादिति** । ब्रह्मकार्यत्वात् । **सत्यमिति** । प्राणाः

CC-0. Agamnigam Digital Preseyation Foundation, Chandigarh

विद्यमानत्वात् प्रपञ्चधर्मवचनं तस्मिन्नौपचारिकमेव युक्तम् । श्रुत्यैव तथा प्रतिपादनात् । चकारः पूर्वयुक्त्यनुसन्धानार्थः । अथो इति प्रक्रमभेदोपि । 'अथात आदेश' इति भिन्नप्रक्रमेणाह । श्रुतेरन्यार्थतानिराकरणायाह । अपि स्मर्यते । 'अनादिमत्परं ब्रह्म न सत् तन्नासदुच्यत' इति । सदसतोः क्षेत्रत्वात् । ज्ञेयनिरूपणे निषेधः । प्रपञ्चधर्मा भगवति उच्यन्ते वेदादौ, न तु तद्धर्मा भवन्तीति ज्ञापयति । तस्माच्छ्रुतिस्मृतिभ्यामेव तथा निर्णयः ॥ १७ ॥

भाष्यप्रकाशः ।

हेतुः । तेषां प्राणानां एष परमात्मैव सत्यं स्वरूपभूत इति । यद्वा । सद्रूपत्वात् त्यरूपत्वाच्च सत्यं प्राणास्तेषामेष स्वरूपभूत इति । तथाच व्याख्यानवाक्यमपि न निषेधस्य प्रपञ्चे पर्यवसानं गमयति, न वा ब्रह्मणः सर्वविशेषशून्यत्वे, किन्तु ब्रह्मणः प्रपञ्चप्रकारकत्वे प्रपञ्चसमवायिमात्रत्वे चेत्येतदर्थं रूपनामवत्त्वार्थं च नामनिर्वचनम् । तदेतदुक्तं इतीत्यादिना । तेन यत् सिद्धं तदाहुः तेनेत्यादि । नामव्याख्यानपूर्वकं ब्रह्मणोतिरिक्तत्वस्थापनेन ब्रह्मणस्तथात्वात् तथेत्यर्थः । प्रक्रमभेदोपीति । प्रकारभेदब्रह्मातिरेकयोरुपोद्बलक इत्यर्थः । स्मृतौ ब्रह्मणः सदसत्त्वं निषिध्यते इति कथं तेन विवक्षितव्यतिरिक्तार्थवारणमित्यतो व्याकुर्वन्ति सदसतोरित्यादि ॥ १७ ॥

रश्मिः ।

सत्यमित्यन्वयः । सत्यं नाम नाविद्यकाः, किन्तु ब्रह्मविवर्तभूताः ब्रह्मणो विशेषेण वर्तनभूताः । ब्रह्मावैवर्तपुराणमपि भवति । परमात्मैवेति । तदन्याभावादेवकारोऽन्ययोगव्यवच्छेदकः । अन्यतपरमस्तीत्यत्रान्यत्त्यमिति पुस्तकान्तरपाठात्स्मृतमर्थमाहुः यद्वेति । प्रपञ्च इति । मूर्तामूर्तरूपे । किंवा वीप्सयेत्युक्तद्वितीयपक्षे आहुः न वा ब्रह्मण इति । प्रपञ्चेति । पञ्चमहाभूतप्रकारकत्वे । प्रपञ्चेति । ब्रह्मणोऽभिन्ननिमित्तोपादानत्वादिति भावः । इतीतीति । इति रूपमित्यादिना । अतिरिक्तत्वेति । पञ्चमहाभूतातिरिक्तत्वस्थापनेन । तथेति । प्रपञ्चधर्मस्य पञ्चमहाभूतत्वस्य वचनं तस्मिन् ब्रह्माणि औपचारिकत्वं लाक्षणिकत्वं स्वसमवायिकारणत्वं सम्बन्धः । एवकार आरोपापवादसङ्गतिसत्त्वात् । श्रुत्यैवेति अस्थूलादिश्रुत्यैव । तथेति । औपचारिकत्वम् । स्वभावतो निषेधायोगात् । प्रकारेति । प्रक्रमो मूर्तामूर्तयोः । तस्य भेदं सौत्रोथोशब्द आहेति । निषेधो हि विधिरूपप्रकारस्य भेदेन निषेधरूपप्रकारेण भवति । अतः पूर्वस्मात्प्रकारभेदः । अभावरूपनिषेधे ब्रह्मणोऽतिरेकोऽभावः । नहि खपुष्पे ब्रह्मास्ति । प्रतीत्यभावेन तस्यैवाभावात् । खपुष्पं तु ब्रह्मास्ति । 'यदस्ति यन्नास्ति स एव विष्णु'रिति विष्णुपुराणात् । तयोः सतोः । उपोदिति । नहि घटो नास्तीत्यादिस्थले प्रक्रमभेदेनाभावनिरूपणमस्ति सत्यपि प्रक्रमभेदे । अथो इति शब्दप्रमाणेन तु सतोरुपोद्बलनात्पृथङ्निरूपणमस्ति । 'अथातो ब्रह्मजिज्ञासा' 'अथातो धर्मजिज्ञासे'ति ब्रह्मधर्मयोः ब्रह्मकर्मणोर्वैक्यात् । 'कर्मैके तत्र दर्शना'दिति जैमिनिसूत्रे धर्मस्थले कर्मोक्तेः । भाष्ये । अथो इति विषयवाक्यघटकाथशब्दपर्याय इत्याहुः अथात इति । यतोतः सूत्रेपि भिन्नप्रक्रम इति भावः । मत्परमिति । अहं परो यस्येति मत्परम् । कथं तेनेत्यादि । सदसन्निषेधेन कथं विवक्षितोर्थः अस्थूलादिरूपः तद्व्यतिरिक्तो जडजीवधर्मा औपचारिका ब्रह्मणीति तद्व्यतिरिक्तोर्थः वैदिकधर्मवद्ब्रह्म तस्य वारणमित्यर्थः । सदसतोरित्यादीति । निरूपण इति । गीतायाम् । निषेधः ज्ञापयतीत्यन्वयः । किं ज्ञापयतीत्यत आहुः प्रपञ्चेति । उच्यन्त इति । उपचारेणोच्यन्ते, न तु

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अत एव चोपमा सूर्यकादिवत् ॥ १८ ॥

प्रपञ्चधर्मा भगवत्युपचारादुच्यन्त इत्यत्र निदर्शनान्तरमाह । **अतएव इममेव निर्णयमाश्रित्य, 'समः प्लुषिणा समो नागेन समो मशकेन सम एभिस्त्रिभिर्लोकैः समोऽनेन सर्वेणे'ति निरुपमस्य भगवतो यदुपमानं तत् तद्धर्मसम्बन्धात्।** न चात्र स्वतन्त्रताहृशधर्मवत्त्वं ब्रह्मणो वक्तुं युक्तम् । नन्विदमपि विरुद्धमित्याशङ्क्य दृष्टान्तमाह । **सूर्यकादिवत्** । सूर्येण सहितं जलं सूर्यकम् । 'यथा ह्ययं ज्योतिरात्मा विवस्वान् अपो भिन्ना बहुधैकोऽनुगच्छन्', 'एकधा बहुधा चैव दृश्यते जलचन्द्रव'दिति । यथेतरसंश्लिष्टस्योपमानत्वम्, एवं 'समः प्लुषिणे'त्यपि ।

भाष्यप्रकाशः ।

अत एव चोपमा सूर्यकादिवत् ॥१८॥ सूत्रमवतारयन्ति प्रपञ्चेत्यादि । व्याकुर्वन्ति **अत एवे**त्यादि । **निरुपमस्ये**ति । 'न तत्सम' इति श्रुत्या तथा प्रतिपादितस्य । **तद्धर्मसम्बन्धा**दित्यादि । यदि प्रपञ्चधर्मवत्त्वं ब्रह्मणः स्यात्, तदा 'प्लुषिर्नाग' इत्यादि प्रथमान्तमेव निर्दिशेत्, समपदं च न निर्दिशेत्, अतस्तथा निर्देशाभावात् प्रपञ्चधर्मसम्बन्धादेव तद्धर्मवत्त्वम्, न स्वतस्तथात्वमित्यर्थः । दृष्टान्तोक्तिप्रयोजनमाहुः **नन्वि**त्यादि । इदं निदर्शनमपि समत्वासमत्वयोरुभयोरपि श्रावितत्वेन विरुद्धम्, अथवा तद्धर्मसम्बन्धेन तद्धर्मवत्त्वे ब्रह्मणोऽङ्गीक्रियमाणे दुष्टसम्बन्धे दुष्टत्वमपि स्यात्, अतोपि विरुद्धम्, अतो निर्णायकत्वाभावमाशङ्क्य श्रौतं दृष्टान्तमाहेत्यर्थः । सिद्धमाहुः **यथे**त्यादि । यथा किरणद्वारा जलादिसंश्लिष्टस्य सूर्यादेर्ब्रह्मोपमानत्वम्, 'यथा ह्ययं ज्योतिरात्मा विवस्वानपो भिन्ना बहुधैकोनुगच्छन्, उपाधिना क्रियते भेदरूपो देवः क्षेत्रेष्वेवमजोयमात्मे'त्यादिवाक्येषूच्यते, एवं 'समः प्लुषिणे'तिवाक्येपि प्लुष्यादिसंश्लिष्टस्य तदुपमेयत्वमप्युच्यत

रश्मिः ।

प्रपञ्चधर्मा भगवति भवन्तीति । **एव तथे**ति । प्रसिद्धप्रमाणान्तरव्यवच्छेदकैवकारः । अस्थूलत्वादिप्रकारेणेति तथेत्यस्यार्थः ॥ १७ ॥

अत एव चोपमा सूर्यकादिवत् ॥ १८ ॥ **प्रपञ्चे**त्यादि । **निदर्शने**ति । 'दर्शयति चे'ति निदर्शनमुक्तम्, अन्यन्निदर्शनं 'समः प्लुषिणे'त्यादि, तदाह । निदर्शनं दृष्टान्तः यथा ब्रह्मास्थूलत्वादिश्रुतौ तथात्रारूपवत् यथा सम इत्यादिश्रुतौ तथात्रारूपवत् । प्लुष्यादिविश्वविलक्षणम् । **अतएवेत्या**दीति । अतः ल्यब्लोपे पञ्चमी । इमं निर्णयमाश्रित्यैवेत्यन्वयः । **उपमान**मिति । एतेन भाष्येण सूत्रे उपमाशब्द उपमीयतेऽनेनेत्युपमा । करणे घञन्त इत्युक्तम् । उपमेयधर्मलुप्तम् । उपमानं प्लुष्यादि । समपदं वाचकं श्रुतावस्ति । उपमेयं लुप्तम्, धर्मो लुप्तः । 'हंसीव कृष्ण ते कीर्तिः स्वर्गङ्गामवगाहत' इत्यत्र चतुष्टयमस्ति । **तद्धर्मे**ति । प्रपञ्चधर्माणां उपचारेण सम्बन्धात् । **स्वतन्त्रे**ति । यथा पञ्चमहाभूतत्वं पञ्चमहाभूते स्वातन्त्र्येण घट इत्युक्ते घटवत्त्ववदुच्यते । **युक्त**मिति । ब्रह्मत्वेन ब्रह्मस्वतन्त्रधर्मेण तिरस्कारात् । ब्रह्म पञ्चमहाभूतानीत्येवं सदा पञ्चमहाभूतपदसन्निध्यभावात् । अतो न युक्तमित्यर्थः । **दृष्टान्ते**ति । सौत्रदृष्टान्तेत्यादिः । **इद**मिति । समत्वनिदर्शनम् । असमत्वं 'न तत्समश्चाभ्यधिकश्च दृश्यत' इति श्रुत्युक्तम् । **निर्णायके**ति । निदर्शनान्तरस्य तथा । **सिद्धमाहु**रिति । श्रौतदृष्टान्तसिद्धं निदर्शनान्तरेऽविरोधमाहुरित्यर्थः । **विवस्वा**निति । सूर्यः । **भाष्ये** । दृष्टान्तप्रसङ्गात् दार्ष्टान्तिकेन समं दृष्टान्तवाक्यमप्याहुः **उपाधिने**ति । जलाद्युपाधिना । भेदेन रूप्यते व्यवह्रियत इति भेदरूपः । क्षेत्रेषु योन्यादिषु । **इत्यादी**ति । आदिना सौत्रादिशब्दार्थैकधाबहुधेति भाष्यीयवाक्यम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

चकारस्तु विरोधाभावो वक्तव्यः, अधिकरणं च संपूर्णमेकदेशिन इति सूचयति। तस्माज्जडजीवधर्माणां भगवत्युपचारः, निषेधस्तु मुख्य इति ॥ १८॥

इति तृतीयाध्याये द्वितीयपादे पञ्चममरूपवदेव हीत्यधिकरणम् ॥ ५॥

भाष्यप्रकाशः।

इति विरोधाभावादुपमारूपं निदर्शनमपि निर्णायकमित्यर्थः। सिद्धमाहुः तस्मादिति। ब्रह्मणः प्रपञ्चविलक्षणत्वेन कार्यासाधारणधर्माणां कारणे ब्रह्मण्यभावेन ब्रह्मणस्तत्स्वरूपधर्माणां च लौकिकमनोवागगोचरत्वेन 'कृत्स्नः प्रज्ञानघन' इति श्रुत्या आकारस्य ज्ञानात्मकत्वेन तत्तत्क्रियादीनां धर्माणां च नैसर्गिकत्वेन तेषां च भगवत्प्राकट्ये एव दर्शनादिव्यवहारविषयत्वेन लौकिकवाङ्मनोभिः प्रतीयमानानां स्थानधर्मत्वात् तथेत्येकदेशिमतेन सिद्धमित्यर्थः। तेन ब्रह्मणः स्थानतो जडजीवधर्मवत्त्वम्, स्वतस्तु तद्रहितत्वमित्येकदेशिमतेन सिद्धम्। एतेनास्याधिकरणस्य प्रासङ्गिकत्वं वक्ष्यमाणोपोद्घातत्वं वेति सूचितम्।

विद्वन्मण्डने तु मायावादिमतेन अरूपवत्सूत्रप्रकृतैतावत्सूत्रद्वयाभ्यां निर्विशेषस्यैव मुख्यतया निरूपणं दृश्यते इत्याशङ्कायां 'न स्थानतोपी'त्यादिसूत्रत्रयम्, 'अरूपव'दित्यादिसूत्रचतुष्टयं चोपादेयांशमादायैवं व्याख्यातम्। तथाहि। तत्र जडजीवधर्मा ब्रह्मणि सन्ति न वेति विचारयँस्तन्निरूपकनिषेधकश्रुतीनामन्योन्यविरोधपरिहारं च विचारयन्नुभयोरपि श्रुतिवाक्यत्वेनान्यतरबाधमप्यशक्यं जानन्नौपाधिकं ब्रह्म सविशेषश्रुतिविषयः, निरुपाधिस्वरूपं तन्निर्विशेषश्रुतेरिति मतम्, 'न स्थानतोपि परस्योभयलिङ्गं सर्वत्र ही'ति सूत्रेणौपाधिकत्वे तत्स्वभावत्वं ब्रह्मणो न सम्भवतीति तच्छ्रुतीनामब्रह्मनिरूपकत्वापत्तिरिति निरस्य, पुनरुपहितानुपहितयोर्भेदाङ्गीकारेणोभयरूपत्वं ब्रह्मणि भविष्यतीति तन्मतोपपत्तिमाशङ्क्य, 'न भेदादितिचेन्न प्रत्येकमतद्वचना'दिति सूत्रेण 'अपि चैवमेक' इत्यग्रिमेण चाभेदबोधकश्रुतिविरोधनिरूपणेन निरस्य, पुनराकाराणां प्रपञ्चमध्यपातित्वात् प्रपञ्चस्य जन्यत्वात् तेषामपि तथात्वात् तेषु ब्रह्माभेदबोधनमौपचारिकम्, अतः साकारवादिन्यो न ब्रह्मनिरूपिका इति प्राप्त आह 'अरूपवदेव हि तत्प्रधानत्वा'दिति। स्यादेतदेवम्, यद्याकाराणां प्रापञ्चिकत्वं भवेत्, न त्वेवम्। न हि प्रपञ्चस्थितत्वेनैव प्रापञ्चिकत्वं वक्तुं शक्यम्। त्वदभिमतस्यापि तथात्वापत्तेः। अतो निराकारवादिनीष्विव साकारवादिनीष्वपि श्रुतिष्वरूपवदेव तत् प्रतिपाद्यते। रूप्यते निरूप्यते व्यवह्रियते इति रूपं सर्वव्यवहारविषयत्वम्, तद्युक्तं रूपवद्विश्वम्, ब्रह्म तु तद्विलक्षणमित्यर्थः। यथा चैतत् तथा मृत्स्नाभक्षणादिप्रसङ्गनिरूपणेन निरूपितम्।

रश्मिः।

तद्रूपेति। सूर्याद्युपमेयत्वम्। **विरोधाभावादिति**। असमस्यैव प्लुष्यादिसमत्वमिति तथा। प्लुषिणेत्युपमोपमानं सूर्यादि तद्रूपं निदर्शनम्। **शेषमिति**। अवक्तव्यः उक्तप्रायत्वात्। **सूचयन्तीति**। समुच्चयार्थकत्वात्सूचयति। **जडेति**। सर्वकर्मसर्वकामत्वादीनां लौकिकानाम्। निषेधोऽस्थूलादिश्रुत्या। इति विरोधपरिहारः। एवं शेषं स्फुटमित्यर्थः। **स्थानत इति**। तत्सूत्रे स्पष्टम्। **प्रासङ्गिकत्वमिति**। अविरोधप्रतिपादकेनाधिकरणेन स्मृतस्यैकदेशिमतस्याविरोधप्रतिपादकस्योपेक्षानर्हत्वादिति भावः। **वक्ष्यमाणेति**। मुख्यसिद्धान्तबोधकवक्ष्यमाणाधिकरणस्य किमपेक्षया मुख्यत्वमिति निरूपकसापेक्षस्य प्रकृतस्य सिद्धचर्थैकदेशिमतस्य मुख्यत्वनिरूपकस्य चिन्तात्र कृतेत्युपोद्घातत्वम्।

---

१. मूलपुस्तके ब्रह्मण इत्यारभ्य इत्यर्थ इत्यन्तं सिद्धार्थकथनं नास्ति, किन्तु शेषं स्फुटमित्येव वर्तते, रश्मिकारैश्च तदेव विवृतमिति।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अम्बुवदग्रहणात्तु न तथात्वम् ॥ १९ ॥ (३-२-६.)

मुख्यसिद्धान्तं वक्तुमेकदेशिनं दूषयति । तुशब्दस्तथा सिद्धान्तं व्यावर्तयति । तथात्वं समवाय्यतिरिक्तस्य तद्धर्मयोगात् । जडजीवधर्मयोगात् सर्वकाम-

भाष्यप्रकाशः ।

अथवा । रूप्यते व्यवह्रियते अनेनेति करचरणाद्युच्यते । तथाच यथा लोके करादिकं भिन्नम्, तद्वानभिमानी भिन्नः, तथा ब्रह्म न श्रुतौ करादिभिन्नं तदभिमानित्वेन निरूप्यते, किन्तु करादेरपि ब्रह्मत्वाद्भेदाभावाद्रूपरूपमेव निरूप्यते, न तु रूपवदित्यर्थः । ननु कुत एव तदवगम्यते करादीनामपि ब्रह्मत्वमेव, न तद्भिन्नत्वमित्यत आह तद्विनिगमकम्, 'तत्प्रधानत्वा'दिति । सर्वेषां वेदान्तानां ब्रह्मैव प्राधान्येन प्रतिपाद्यं यतः । अयमर्थः । करादीनामब्रह्मत्वे तन्निरूपकाणां वेदान्तानामब्रह्मपरतया ब्रह्मपरत्वनियमव्याहतिः, अतः करादिनिरूपकाः साक्षाद्ब्रह्मप्रतिपादका एवेति । 'सर्वत्र प्रसिद्धोपदेशात्', 'आमनन्ति चैनमस्मि'न्नित्याद्यधिकरणरूपोपपत्तिर्हिशब्देनोच्यते । 'स यथा सैन्धवघनोऽनन्तरोऽबाह्यः कृत्स्नो रसघन एवं वा अरे अयमात्माऽनन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एवे'ति, 'सत्यं विज्ञानमानन्दं ब्रह्मे'ति, 'आनन्दमात्रकरपादमुखोदरादि'रिति, 'आनन्दमयोऽभ्यासा'दित्यादिश्रुतिस्मृतिन्यायैकवाक्यतया सच्चिदानन्दरूपत्वं करादीनामवधारणीयम् । अत एवाग्रे सूत्रकारोप्याह 'आह च तन्मात्र'मिति । एता एव श्रुतयोऽत्रानुसन्धेयाः । त्वदभिमतव्याख्याने तु 'अरूप'मित्येतावतैव चारितार्थ्यं स्यात् । रूपवत्त्वस्योभयवाद्यसम्मतत्वेनाविवादास्पदत्वात् तन्निषेधानुपपत्तिः । रूपरूपवत्त्वस्य सिद्धान्त्यभिमतत्वात् । एवं सति तथा कथनादसदुक्त एवार्थः सूत्रकाराभिमत इति ज्ञायते इति ॥ १८ ॥ इति पञ्चममरूपवदेव हीत्यधिकरणम् ॥ ५ ॥

अम्बुवदग्रहणात्तु न तथात्वम् ॥ १९ ॥ सूत्रमवतारयन्ति मुख्येत्यादि । एतेनास्मिन्नप्यधिकरणे सर्वकर्मादयो ब्रह्मणि सन्ति, नवेत्येवं सन्देहः । उभयवाक्यश्रवणमेव सन्देहबीजम् । पूर्वपक्षस्त्वौपचारिका इति पूर्वस्माद्विशेष इति बोधितम् । ननूक्तस्य मुख्यत्वाभावे किं गमकमित्यतो गमकं वदन्त एव सूत्रं व्याकुर्वन्ति तुशब्द इत्यादि । व्यावर्तनीयं सिद्धान्तमाहुः तथात्वमित्यादि । तथात्वं नाम एकदेशिनाङ्गीक्रियमाणं त्रिवृत्कृतजलसमवायिव्यतिरिक्तस्य ज्योतिषः सूर्यादेस्तद्धर्मयोगाज्जलधर्मयोगात् कम्पादिकमिव जडादिसमवायिव्यतिरिक्तस्य ब्रह्मणो जडजीवधर्मयोगात् सर्वकामादय इत्येतं सिद्धान्तं नशब्दो[1] व्यावर्तयति । तथाच तुशब्द एव तस्य

रश्मिः ।

'चिन्ता प्रकृतसिद्ध्यर्थामुपोद्घातं विदुर्बुधा' इत्युपोद्घातलक्षणम् ॥ १८ ॥ **इति पञ्चममरूपवदेव हीत्यधिकरणम् ॥ ५ ॥**

अम्बुवदग्रहणात्तु न तथात्वम् ॥ १९ ॥ एवेति । पूर्वाधिकरणेऽवधारितम् । द्वितीयैवकारार्थोऽप्येवम् । **उक्तस्येति** । निषेधस्तु मुख्य इत्युक्तस्य निषेधस्य । **वदन्त एवेति** । सूत्राणां सर्वतोमुखत्वादन्यार्थवदनयोगव्यवच्छेदकैवकारः । **त्रिवृदित्यादि** । 'अग्नेराप' इति श्रुतेर्जलसमवायित्रिवृत्कृततेजो घृतादि । तद्व्यतिरिक्तस्य । **जडादीति** । आदिना जङ्गमः । तत्समवायिकपालतन्तुयोनिगोमयफलपुष्परूपं तद्व्यतिरिक्तस्य ब्रह्मणोऽस्थूलादिरूपस्य उपचारेण जडजीवधर्मा अभिनादस्तब्धत्वसर्वकर्मसर्वकामादयस्तेषां योगात् । **व्यावर्तयतीति** । तथाच तथात्वं नत्विति सूत्रे योजना । **तुशब्द इति** । नशब्दकर्तृकव्यावर्तयतिव्याख्यानकस्तुशब्द इत्यर्थः । एवकारो हेतुयोगव्यवच्छेदकः । **तस्येति** ।

१. नकारः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

त्वादयो न भवन्ति। कुतः। अम्बुवदग्रहणात्। सर्वपरस्य हि प्रतिबिम्बेऽधिकरणधर्मवत्त्वम्। तत्र रूपरहितं तत्र विद्यमानं च न प्रतिबिम्बत इति वक्तव्यम्। तथापि स्वमतविरोधादम्बुवदग्रहणमिति। स्वच्छमम्बु प्रतिबिम्बं गृह्णाति। न हि

भाष्यप्रकाशः।

मुख्यत्वाभावगमक इत्यर्थः। हेतुं व्याकुर्वन्ति सर्वेत्यादि। सर्वस्मात् परस्य ब्रह्मणः प्रतिबिम्बे सति अधिकरणधर्मवत्त्वमेकदेशिना सिद्धान्तितम्। तत्र, तन्मते निराकर्तव्ये, रूपरहितं तत्र विद्यमानं च न प्रतिबिम्बत इति दूषणं वक्तव्यम्। ब्रह्मणो जगद्वैलक्षण्यं वदता एकदेशिना ब्रह्मणि नीरूपत्वस्य व्यापकत्वस्य च तत्राङ्गीकारात्। तथाप्येवमुक्तौ सिद्धान्तिनमपि पर्यनुयुञ्जीत। सिद्धान्तेपि विरुद्धधर्माश्रयत्वाङ्गीकारेण तयोरिवाकाशनैर्मल्यवत् स्वरूपात्मकरूपस्य दूरत्वस्य चाङ्गीकारादाकाशस्येव प्रतिबिम्बः सम्भवति, अतः स्वमतविरोधात् प्रतिबिम्बाधिकरणस्वभावमादाय तन्मतदूषकं हेतुमाह अम्बुवदग्रहणमिति। तत् व्युत्पादयन्ति स्वच्छमित्यादि। अम्बु स्वच्छं तस्मादंशेन संश्लिष्टस्य सूर्यादेः प्रतिबिम्बं गृह्णाति। न हि तथा धर्मा ग्रहीतुं शक्नुवन्ति। हि यतो हेतोर्धर्मा मनोमयादिशब्दैकदेशोक्तानि पृथिव्या घटादय इव ब्रह्मण उपादेयानि मनःप्रभृतीनि कार्याणि अस्वच्छानि। मनो हि शुद्धाशुद्धभेदेन द्विविधम्। तत्र शुद्धं कामविवर्जितमिति। तत्र प्रतिबिम्बिते ब्रह्मणि सर्वकामा एव न भासेरन्। अशुद्धस्य तु कामवत्त्वेपि अस्वच्छत्वादेव प्रतिबिम्बाग्राहकत्वम्। प्राणस्त्वापोमयोपि वायुरूपत्वात् प्रतिबिम्बग्रहणायोग्यः। तथा भारूपं तेजः आकाशश्च। तस्माज्जलादिवत् अंशेन संश्लिष्टस्य ब्रह्मणः प्रतिबिम्बं ग्रहीतुं न शक्नुवन्ति। किञ्च। धर्मत्वात्। समवेतं हि कार्यं कारणस्यावस्थाविशेषरूपत्वात् तद्धर्मभूतं तस्मात्। न हि समवेते कार्ये समवायिनः प्रतिबिम्बः क्वापि दृष्टचरः, नाप्यस्वच्छे कस्यापि। अतः समवायिव्यतिरिक्तस्य समवायिनश्च ब्रह्मणो ग्रहीतुमशक्यत्वबोधनायाम्बुवदग्रहणादित्युक्तमित्यर्थः। ननु

रश्मिः।

अस्थूलादिवाक्योक्तनिषेधस्य। जडजीवधर्मयोगादित्युक्तम्। सच 'पृथिव्यां तिष्ठन्' 'आत्मनि तिष्ठ'न्नित्यादिश्रुतिसानुकूल इति तमाहुः **सर्वस्मादिति**। **सतीति**। पृथिव्यामात्मनि च सति। **अधीति**। आत्मपृथिवीधर्मवत्त्वम्। **तत्र** रूपेतिभाष्यं विवृण्वन्ति स्म **तत्र, तन्मत** इति। **तत्रेति**। अधिकरणे। एवमग्रेपि। तथापीतिभाष्यं विवृण्वन्ति स्म **तथापीति**। **पर्यनुयुञ्जीतेति**। भगवान् व्यासोनेन सूत्रेणैकदेशिमतवत्स्वमतसिद्धान्तिनमपि पर्यनुयुञ्जीत दूषयेत्। **तयोरिति**। ब्रह्मनिरूपणव्यापकत्वयोः। **अत** इति। उक्तरूपात्स्वमतविरोधात्। **प्रतिबिम्बेति**। दर्पणादेः स्वभावम्, स्वच्छत्वादि। **हेतुमाहेति**। भगवान् व्यासः। अम्बुवदग्रहणं हेतुमाहेतीत्यप्यन्वयः। **नहीत्यादिभाष्यम्**। **हि यत** इति विवरणम्। **मनोमयेत्यादि**। छान्दोग्ये पञ्चमप्रपाठके। 'मनोमयः प्राणशरीरो भारूपः सत्यसंकल्प आकाशात्मा सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरसः' इत्यत्र मनोमयादिशब्दैकदेशा मनःप्राणभासत्यादिरूपाः तदुक्तानि मनःप्रभृतीनीत्यन्वयः। तानि पृथिव्या घटादय इव ब्रह्मण उपादेयानि कार्यत्वेनोपादातुं योग्यानि। 'तन्मनोऽकुरुते'ति। बृहदारण्यके 'एतस्माज्जायते प्राण' इति। एवमन्या ज्ञेयाः। **तथेत्यस्यार्थो** जलादिवत्। **धर्मेतिभाष्यं** विवृण्वन्ति स्म **किञ्चेति**। धर्मत्वादिति व्याख्येयम्। **समवायिन** इति। कपालादेः। **समवायीति**। कपालादेः व्यतिरिक्तस्याकाशादिसमवायिनश्च। **अशक्येति**। ब्रह्माधारपृथिव्यादिभिरशक्यत्वबोधनाय। **अम्बुवदिति**। व्यतिरेके दृष्टान्तः। अम्बु यथा स्वच्छत्वात्प्रतिबिम्बं

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

तथा धर्मा ग्रहीतुं शक्नुवन्ति । धर्मत्वाच । सर्वाधारत्वेन तथोच्यमाने वैयर्थ्य-

भाष्यप्रकाशः ।

मास्तु धर्माणामुपाधिभूतानां प्रतिविम्बग्राहकत्वम्, तथापि द्युभ्वाद्यधिकरणविषयवाक्ये ब्रह्मणः सर्वाधारतायाः सिद्धत्वात् ब्रह्मण्येव मनःप्रभृतीनां तद्धर्माणां च प्रतिविम्बोस्तु, तथा सति तेषां धर्माणामौपचारिकत्वमेव सेत्स्यतीत्यत आहुः सर्वेत्यादि । यद्यपि रूपरहितस्य ब्रह्मणो न प्रतिविम्बग्राहकत्वम्, आकाशादितुल्यत्वात्, तथापि भारूपत्वमादाय ग्रहिलतया तथोच्यमाने तेषां धर्माणामुपाधिधर्मत्वेनैव प्रत्ययः । लोके हि स्थिर आधारे प्रतिविम्बचञ्चलतायां तद्धर्मे चलने विम्बीयत्वेनैव भानस्य दृष्टत्वात् । अतस्तद्धर्मत्वेन उपासनाया असिद्धेस्तदनुवादवैयर्थ्यमिति पूर्वं अरूपवत्सूत्रव्याख्याने सर्वशब्दस्य प्रसिद्धानुवादकत्वकथनेनावोचामेति नात्र प्रत्यवस्थानावकाश इत्यर्थः । न च यद्ययोग्यतैवोभयोः, तदा श्रुतौ कुतो जलचन्द्रादिदृष्टान्त उच्यत इति शङ्क्यम् । एकस्यैवोपाधिभेदेन नानात्वबोधनाय तत्कथनात् । 'उपाधिना क्रियते भेदरूप' इति,

रश्मिः ।

गृह्णाति, तथा पृथिव्यादयोरस्वच्छत्वान्न प्रतिविम्बं गृह्णन्तीति । **उपाधीति**। 'पृथिवी शरीर'मित्यादिश्रुतिभिः पृथिव्यादीनाम् । **ब्रह्मण्येवेति** । एवकार उपाधियोगव्यच्छेदकः । **मनःप्रभृतीनामिति** । मनःप्राणभासत्यादिप्रभृतीनाम् । **तद्धर्माणामिति** । मनोधर्माः 'कामः सङ्कल्प' इत्यादिश्रुत्युक्ताः । प्राणधर्मो बाणावष्टम्भः । एवमन्येपि । बाणो देहः । **तेषामिति** । प्रतिबिम्बितानाम् । **औपचारिकत्वमिति** । अन्यधर्माणामन्यत्र भाने उपचारो गौणत्वम् । तत्सम्बन्धित्वम् । शुक्तौ रजतत्ववत् । वेदान्ताद्यविचारसहकृतशब्दजन्यज्ञानविषयत्वं च पित्तकामलादिदोषसहकृतचक्षुर्जन्यज्ञानविषयत्ववत् । इत्येवकारः । **ब्रह्मण इति** । ब्रह्म प्रतिबिम्बं गृह्णातीति ब्रह्मणः प्रतिबिम्बग्राहकत्वं न । आकाशस्य यथा नीरूपत्वात्तत्र विद्यमानत्वान्न प्रतिबिम्ब इति आकाशादितुल्यत्वं तस्मात् । आदिना वायुः । **ग्रहिलतया** आग्रहवादेन । **भारूपेति** । 'भारूप' इति श्रुतेः । **तथेति** । प्रतिबिम्बग्राहकत्वेन । तथा शब्दात्तृतीयाया लुक् । ब्रह्मण्युच्यमाने । मनआदिधर्माणां उपाधिपृथिव्यादिधर्मत्वेन । अधोक्षजत्वादेवकारः । **स्थिर** इति । दर्पणादौ । **प्रतिबिम्बेति** । चलजलादिप्रतिबिम्बचलतायाम् । **तद्धर्मे** इति । प्रतिबिम्बधर्मे । **एवेति** । दृष्टत्वात् । **तद्धर्मत्वेनेति** । उपाधिपृथिव्यादिधर्मत्वेन हेतुना ब्रह्मोपासनायाः । **तदन्विति** । 'सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीते'त्युक्त्वा 'स क्रतुं कुर्वीत मनोमयः प्राणशरीरो भारूप' इत्याद्युक्तम् । **स** पुरुषः । क्रतुमविचलप्रत्ययं कुर्वीत । क्रतुविषयं दर्शयन्ति स्म । मनोमय इत्यादीत्यर्थान्मनोमयात्वाद्यनुवादवैयर्थ्यम् । अन्यधर्मत्वेनानुवादः । **अयोग्यतैवेति** । प्रसिद्धेरेवकारः । **उभयोरिति** । ब्रह्मतदुपाध्योः । ब्रह्मणो नीरूपत्वाद्बिम्बायोग्यता । पृथिव्याद्युपाधीनामस्वच्छत्वात्प्रतिविम्बग्राहकत्वायोग्यता । **जलचन्द्रादीति** । स्वच्छसरूपदृष्टान्तः । आदिना सूर्यकम् । भवेदेतदेवमन्यमते मायाविद्ययोर्ब्रह्मप्रतिबिम्बाङ्गीकारात् । ब्रह्ममाययोश्च नीरूपास्वच्छत्वाभ्याम् । अस्मन्मते तु विश्वमप्रतिबिम्बितमिति 'एकोहं बहु स्या'मिति श्रुत्युक्ते विश्वस्मिन्दृष्टान्त इत्याशयेन हेतुमाहुः **एकस्यैवेति** । 'एकोहं बहु स्या'मिति श्रुतेरेवकारः । **तत्कथनात्** जलचन्द्रदृष्टान्तकथनात् । ननु यथा विश्वमप्रतिबिम्बितम्, तथाऽनित्यत्वात्प्रतिबिम्बितमपि इत्येकस्यैवेत्यादिनिश्चयः कुत इत्यत आहुः **उपाधिनेति**। 'एकधा बहुधे'ति इतिशब्दात्षष्ठ्यालुक् । इति दार्ष्टान्तिकस्य यो जल-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मिति पूर्वमवोचाम। नच भ्रमात् कल्पनं वेदेनोच्यते। अप्रतारकत्वात्। सर्व-

भाष्यप्रकाशः।

'एकधा बहुधा चैव दृश्यत' इति दृष्टान्तप्रयोजनोक्त्यैव तथा निश्चयादिति। नन्वत्र पूर्वं ब्रह्मणः सर्वत्वेनोपासनायाः 'शान्त उपासीते'त्यन्तेन विधानात् 'स क्रतुं कुर्वीते'त्यस्यापि व्यवहितेनो-पासीतेत्यनेनैव सम्बन्धान्मनोमयत्वादिधर्मविशिष्टत्वेन ब्रह्मण एवोपासनं विधीयत इति, तत्र यथा सर्वत्वमारोपितम्, एवमत्र मनोमयत्वादिकमप्यारोपितमेवेत्यम्बुवद्ग्रहणाभावेपि सर्वकाम-त्वादिधर्माणां कल्पितत्वादौपचारिकत्वमेवेत्यत आहुः नचेत्यादि। नात्र मनोमयत्वादिकमा-रोपितम्। उपासनाया एवात्राभावात्। अथेत्यनेन प्रक्रमभेदे बोधिते प्रकृतच्छेदेन व्यवहितसम्ब-न्धस्य वक्तुमशक्यत्वात्। किन्तु पूर्वोपासनया शुद्धान्तःकरणस्य सर्ववेदान्तप्रसिद्धब्रह्मण उपदेशो-यम्। स शान्तोऽन्यत्र रागरहितः, क्रतुं वक्ष्यमाणप्रकारकं निश्चयमध्यवसायात्मकमविचल-प्रत्ययं तथा मननं वा स्वस्य वक्ष्यमाणभगवत्स्वरूपलाभार्थं कुर्वीतेति। एतेन शब्दान्तरेणापि तथा निश्चयात्। उपसंहारे च पूर्वोक्तधर्मविशिष्टस्यात्मनो ब्रह्मत्वं 'एतत् ब्रह्मे'त्यनेन निगमयित्वा 'एतमितः प्रेत्याभिसम्भवितास्मी'ति, 'यस्य स्यादद्धा न विचिकित्सास्ती'त्यत्रेतिशब्देन पूर्वोक्तं सर्वं परामृश्य, 'यस्य स्यादद्धे'त्यनेन सर्वस्य सत्यत्वनिगमनादपि तथा निश्चयात्। आरोपितत्वे

रश्मिः।

चन्द्रवदिति दृष्टान्तस्तस्य प्रयोजनं फलं देवभेदः तस्योक्त्यैव। एवकारो दृष्टान्तप्रयोजनोक्त्यन्यवाक्य-योगव्यवच्छेदकः। 'उपाधिना क्रियते भेदरूपो देव' इति दृष्टान्तेन। इतिशब्दात्तृतीयाया लुक्। तथेति। एकस्यैवोपाधिभेदेन नानात्वबोधनाय दृष्टान्तकथननिश्चयादित्यर्थः। तेनान्वयोयम्। ब्रह्मण एवेति। एवकारोऽन्ययोगव्यवच्छेदकः। तत्रेति। विराजि। अत्रेति। पृथिव्यादिस्थिते। औपचारिकत्व-मिति। गौणत्वम्। एवकारो मुख्यत्वयोगव्यच्छेदकः। भाष्यं विवरीतुमाहुः नात्रेति। एवेति। षष्ठ्या लुक्। अवधारणस्य। अथेति। 'अथ खलु क्रतुमयः पुरुष' इत्यत्र। प्रकृतमुपासनम्। तस्य छेदेन। उपासनाया व्यवहितसम्बन्धस्य। पूर्वोपेति। 'सर्वं खल्वि'त्युक्तया। शुद्धान्तःकरणस्योपास-कस्य। उपासनयान्तःकरणशुद्धिः प्रसिद्धा। अयमिति। वक्ष्यमाणः। तमाहुः स शान्त इति। स क्रत्वधिकारी पुरुषः। अन्यत्र भगवद्व्यतिरिक्ते। क्रतोर्मननार्थकत्वस्य वक्ष्यमाणत्वात्। वक्ष्य-माणेति। 'एतमितः प्रेत्याभिसम्भवितास्मी'ति श्रुत्या वक्ष्यमाणभेदम्। मनसः चलनिश्चयं वारय-न्तिस्म अध्यवेति। मानस्याः सेवायाः अविचलप्रत्ययम्। वक्ष्यमाणेति। 'एतमित' इति श्रुत्युक्त-भगवत्स्वरूपलाभार्थम्। शब्दान्तरेणेति। ब्रह्मशब्दादन्येन क्रतुरूपशब्दान्तरेण। नन्वविचलप्रत्य-यात्मकं साधनम्, ब्रह्मरूपं फलं कुत इतिचेत्। न। अस्य क्रतोर्निरोधलक्षणग्रन्थोक्तार्थविषयत्वेन ब्रह्म-त्वात्। भूमाधिकरणे लिङ्गभूयस्त्वाधिकरणे च 'यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमे'त्यकेविषयत्वात्। तथेति। सर्वकर्मत्वादिधर्माणामनौपचारिकत्वनिश्चयात्। 'एतद्ब्रह्मे'त्यत्र 'एष म आत्मान्तर्हृदय'मत एतद्ब्रह्मेत्यतःशब्दमध्याहृत्यार्थं इत्याहुः निगमयित्वेति। निगमनस्य हेतुघटित-त्वात्। एतमिति। एतच्छब्दार्थम्। अद्धेति। साक्षात्। विचिकित्सा संशयः। सर्वस्येति। विश्व-रूपेण प्रत्यक्षकथनात्सर्वस्य सत्यत्वनिगमनात्। ननु निगमनं हेत्वभावात्कथमितिचेत्। न। साक्षादि-त्यत्र पञ्चम्या लुगङ्गीकारात्। तथेति। सर्वकर्मत्वादिधर्माणामनौपचारिकत्वनिश्चयात्। नहि सत्या धर्मा औपचारिका भवन्ति। भाष्यं विवृण्वन्तिस्म आरोपितत्व इति। भ्रमादतद्वति तत्प्रकारकज्ञानरूपात्

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ज्ञत्वाच्च। विप्लववादिन एवैवं वचनम्, न वैदिकस्य। 'पृथिव्यां तिष्ठ'न्नित्यादिविरोधश्च। तस्मात् ब्रह्मधर्मा एव सर्वकामादयः, न तूपाधिसम्बन्धादौपचारिका इति ॥ १९ ॥

वृद्धिह्रासभाक्त्वमन्तर्भावादुभयसामञ्जस्यादेवम् ॥ २० ॥

सिद्धान्तेन विरोधपरिहारमाह। विरोधो हि परिहरणीयो लोकवेदाभ्यां तद-

भाष्यप्रकाशः।

च भ्रमात् कल्पनम्। तत्तु नात्र वेदेनोच्यते। अप्रतारकत्वात् सर्वज्ञत्वाच्च। यदि ह्येवं सत्यत्वं निगमयन् स्वयं सम्यक् ज्ञात्वा परस्मा आरोप्यान्यथा ब्रूयात्, प्रतारक एव स्यात्। अज्ञात्वारोपितं चेत् ब्रूयात्, सर्वज्ञत्वादेव हीयेत। अतो नात्र तथा वक्तुं शक्यमित्यर्थः। एतेन मध्वादिविद्यास्विवात्र कल्पनोपदेश इत्यपि निरस्तम्। तत्रैवमवचनात्। सांख्यवादिनं प्रति तद्रीतिबोधने तत्र तथा कथनाच्च। तत् तत्रैवोपपादितम्। अतो वेदान्तार्थविप्लववादिन एवैवं वचनम्, न वैदिकस्येति युक्तम्। किञ्च। यदि ग्रहिलतया भ्रमात् कल्पनमत्राङ्गीक्रियेत, तदान्तर्यामिब्राह्मणमपि विरुध्येतेति दोषान्तरमाहुः पृथिव्यामित्यादि। पृथिव्यादिप्रपञ्चस्याविद्याकल्पितत्वाच्छुक्तिरजतकल्पे तस्मिन्निरविद्यस्येश्वरस्य स्थित्ययोगात् तद्बोधकश्रुतिविरोधश्चेत्यर्थः। सिद्धमाहुः तस्मादित्यादि। तस्मादिति। अम्बुनीव मनःप्रभृतिषु ब्रह्मप्रतिबिम्बस्यासम्भवात्। तथाच धर्माणामौपचारिकत्वनिर्णयमाश्रित्य यत् पुष्ट्यादिसाम्यं ब्रह्मण उक्तम्, तदसङ्गतमित्यर्थः ॥ १९॥

वृद्धिह्रासभाक्त्वमन्तर्भावादुभयसामञ्जस्यादेवम् ॥ २० ॥ सूत्रमवतारयन्ति सिद्धान्तेनेत्यादि। विरोधपरिहारकस्यैकदेशिमतस्यानुपपन्नत्वे दर्शिते विरोधस्यैव स्थैर्यात् कथं तत्परिहार इत्याकाङ्क्षायां तथेत्यर्थः। परिहारं व्युत्पादयन्तः सूत्रं व्याकुर्वन्ति विरोधो हीत्यादि। तथाच तन्मते प्रतिबिम्बस्य वक्तुमशक्यतया लोकाननुसरणम्, भ्रमात् कल्पनस्याशक्यवचनतया वेदाननुसरणम्, अतस्तद्विहाय हेत्वन्तरेण परिहरतीत्यर्थः। अनुसारं व्युत्पादयन्ति महानित्यादि,

रश्मिः।

सर्वकामत्वादिधर्माणां कल्पनम्। वेदेनेति। छान्दोग्येन। स्वयमिति। 'यस्य स्यादद्धा न विचिकित्सास्ती'ति वेदः। एवेति। अन्ययोगव्यवच्छेदकः। एवेति। असर्वज्ञत्वव्यवच्छेदक एवेति। नात्रेति। वेदे धर्माणां तथाकल्पितत्वं न वक्तुं शक्यम्। मध्वादीति। 'असौ वा आदित्यो देवमधु तस्य द्यौरेवे'त्यादिना सूर्यस्य देवमधुत्वं प्रतिपादितम्, रश्मीनां वेदत्वं च। आदिशब्देन सर्वा एव देवोपासनविद्या गृहीताः। निरस्तमिति। अप्रतारकत्वात्सर्वज्ञत्वाच्च। ननु तद्वदित्युक्ते न प्रतारकत्वम्, नाप्यज्ञत्वमितिचेत्, तत्र हेतुमाहुः तत्रैवमिति। 'स क्रतुं कुर्वीते'त्यध्यवसायावचनात्। तत्र तथेति। मध्वादिविद्यासु तथाकल्पितत्वकथनात्। तत्रैवेति। प्रथमाध्यायचतुर्थपादे 'कल्पनोपदेशाच्च मध्वादिवदविरोध' इति सूत्रभाष्य एव। एवकारो 'मध्वादिष्वसंभवादनधिकारं जैमिनि'रितिसूत्रभाष्ययोगव्यवच्छेदकः। विप्लवेतिभाष्यं विवृण्वन्तिस्म अतो वेदान्तेति। एवेति। अन्ययोगव्यवच्छेदकः। एवं वचनमिति। धर्माणां कल्पनवचनम्। तस्मादित्यादीति। एवकारो जडजीवधर्मयोगव्यवच्छेदकः। नतूपाधीति। जडजीवसम्बन्धात्कल्पिताः ॥ १९ ॥

वृद्धिह्रासभाक्त्वमन्तर्भावादुभयसामञ्जस्यादेवम् ॥ २० ॥ दर्शित इति। पूर्वसूत्रेण दर्शिते। एवेति। अविरोधयोगव्यवच्छेदकः। तत्परिहारो विरोधपरिहारः। तथेति।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नुसारेण। महानवकाशोऽल्पोऽवकाशः, 'यथावकाशं दश चमसा'निति लौकिकवैदिकव्यवहारो वस्तुधर्मविरुद्धो दृश्यते। व्यापकत्वं वृद्धिह्रासौ च आकाशस्यैव। तत्र यथा करके प्रविष्ट आकाशस्तथा व्यपदिश्यते, तथा सत्युभयसामञ्जस्यं भवति, अन्यथा एकतरबाधो भवति, एवं तत्तदनुप्रवेशात् ब्रह्माप्येवम्। नचौपाधिकत्वम् । जपाकुसुमलौहित्यवदन्यधर्मत्वाभावात् । अन्यानुविधायित्वेपि

भाष्यप्रकाशः।

ब्रह्माप्येवमित्यन्तम् । 'यथावकाशं दश चमसा'नित्यासादनविषये श्रुतिः। एवं चयनेपि 'एतैरग्निं चिन्वीते'ति 'चित्तिः स्रु'गित्यादिमन्त्रैश्चयनं विधाय, प्रकारप्रदर्शनावसरे चतुर्षु दिक्षु तत्तद्धोतृमन्त्रैश्चयनं दर्शयित्वा, 'यथावकाशं ग्रहान् यथावकाशं प्रतिग्रहा'निति 'वाचस्पते विधे नाम'न्नित्यादिमन्त्रोपधेयानां ग्रहसंज्ञकानां 'देवस्य त्वे'त्यादिमन्त्रोपधेयानां प्रतिग्रहसंज्ञकानामिष्टकानां तद्व्मध्ये योऽवकाशस्तदविरोधेनोपधानमाह। अवकाशश्चाकाश एव । तत्र यथापदेन स्वल्पत्वमहत्त्वादिकं सूच्यते। लोकव्यवहारस्तु स्फुट एव। वस्तुधर्मविरुद्ध इति। आकाशीयनैसर्गिकधर्मभूतविभुत्वव्यधिकरणः । उभयसामञ्जस्यमिति । विभुत्वाल्पत्वयोरैकाधिकरण्येन प्रामाणिकादरणीयत्वम्। तथाच यथा आकाशस्योपाध्यन्तर्भावाद्वृद्ध्यादिभाक्त्वम्, एवं ब्रह्मणोऽप्युपाध्यन्तर्भावात् तदभिव्यङ्ग्यसर्वकामादिधर्मवत्त्वमिति सूत्रार्थः। अत्र बीजं तु विषयश्रुतावाकाशात्मेत्युक्तिः। अत आकाशदृष्टान्तस्य प्रकृतश्रुत्यनुसारित्वे तत्तदुपाधिप्रविष्टं ब्रह्मापि तत्तद्धर्मवत् वक्तव्यम्, न त्वेकदेश्युक्तरीत्येत्यर्थः। नन्वेवमपि तेषां धर्माणामौपाधिकत्वेनौपचारिकत्वमेवायातीति को विशेषः सिद्धान्त इत्यत आहुः नचौपाधिकत्वमित्यादि। यदि हि ते श्रुतौ

रश्मिः।

विरोधपरिहारमाह। हेत्वन्तरेणेति। अग्रहणादितिहेतोरन्यो हेतुरन्तर्भावादिति तेनेत्यर्थः। आसादनेति पात्रासादनविषये। चयनयागे। एवेति। 'अवकाशं कुर्वि'तिप्रयोगादेवकारः। सूच्यत इति। सादृश्यं वाच्यम्। लोकेति। महानवकाशोऽल्पोवकाश इति भाष्योक्तः। आकाशीयेति। तादृशविभुत्वं सकलमूर्तिबहिःसंयोगित्वं तदधिकरणमाकाशो महान् लोकदृष्टिगम्यः। तादृशविभुत्वव्यधिकरणस्त्वन्तराकाशः शास्त्रदृष्टिगम्यः। न च 'विशिष्टं शुद्धान्नातिरिच्यत' इति वाच्यम्। प्रायश्चित्तानापत्तेः। दृष्टविरोधाच्च। तथाचेति। सूत्रतद्भाष्यपर्यालोचने चेत्यर्थः। यथाकाशस्येति शब्दद्वयं 'यथा करके प्रविष्ट आकाश' इतिभाष्यात्। भाष्येपि कुत इति चेत्, वृद्धिह्रासभाक्त्वपदान्वयानुरोधेनाक्षेपादिति गृहाण। वृद्धिह्रासभाक्त्वं चाकाशस्यैवेति सावधारणं भाष्यम्। नतु ब्रह्मण इति ब्रह्मयोगव्यवच्छेदकः। अन्तर्भावादित्यपि सापेक्षमुपाधिमाक्षिपति। तदाहुः उपाध्यन्तर्भावादिति। एवमितिसौत्रं शब्दं वृद्धिह्रासभाक्त्वमित्यस्याग्रे प्रयोज्य, ब्रह्मेतिप्रथमसूत्रादनुवर्त्य षष्ठ्यन्तं कृत्वा संस्कृतभेदेपि शब्दं धृत्वोपाध्यन्तर्भावादितिपदमावर्त्याहुः एवं ब्रह्मणोप्युपाध्यन्तर्भावादिति। 'उभयसामञ्जस्या'दित्यत्र विभुत्वसामञ्जस्यं स्पष्टमित्यल्पत्वसामञ्जस्यमाहुः तदभिव्यङ्ग्येति। उपाधिरूपपुरुषाभिव्यङ्ग्याः सर्वकामादिधर्मास्तद्वत्त्वरूपं सामञ्जस्यमिति हेतोः व्यापकत्वं वृद्धिह्रासौ चेतीतिशेषः। अनेन सूत्रार्थ इति पदं योजनीयम्। विषयेति। 'सर्वं खल्विदं ब्रह्मे'त्यादिछान्दोग्यीयायां श्रुतौ। 'आकाशस्यात्मे'ति षष्ठीतत्पुरुषा'दाकाशवत्सर्वगतश्च नित्य' इतिस्मृतिस्मरणादाहुः अत आकाशेत्यादि। प्रकृतेति। विषयश्रुत्यनुसारित्वे। एकदेशीति। 'जडजीवधर्माणां भगवत्युपचारः, निषेधस्तु मुख्य इती'ति भाष्येणोक्तैकदेशिरीत्या। एवमपीति। उपाधिनिवेशेन विरोधपरिहारेपि। नचौ-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

स्वधर्मा एव ते । कारणत्वादिवत् । नचागन्तुकत्वात् तद्धर्मा एव न भवन्तीति वाच्यम् । अन्यधर्मत्वे प्रमाणाभावात् । तद्गतत्वप्रतीतेश्च । दृष्टत्वाच्चाविरोधः । अविरोधप्रकारोऽयम् । यथोभयसामञ्जस्यं भवति, प्रकारोपि तस्यैव तथा

भाष्यप्रकाशः ।

जपाकुसुमलौहित्यवदन्यधर्मत्वेन प्रत्यायिताः स्युः, तदा तेषामौपाधिकत्वं स्यात् । प्रत्यायितास्त्वात्मविशेषणेष्वात्मधर्मत्वेन, अतो न तथात्वमित्यर्थः । ननु यद्यप्येते आत्मविशेषणत्वेनोक्ताः, तथापि मनोमयत्वादिकं पूर्वमुक्त्वा पश्चादुक्ताः, तेन ब्रह्मणो मनआद्यनुविधायित्वमेव स्फुटीकृतम्, तथा सति तेषां तद्धर्मत्वमेव, न ब्रह्मधर्मत्वम्, अन्यानुविधायित्वस्यैव स्फुटीभावादित्यत आहुः **अन्येत्यादि** । तदभिध्यानसूत्रे आकाशादिलिङ्गतया तत्तदनुविधायित्वस्य सिद्धत्वादत्र मनआद्यन्यानुविधायित्वेपि सर्वकामादयो ब्रह्मधर्मा एव । यथा तत्रत्यं कारणत्वम् । आदिपदेन 'विश्लिष्टशक्तिर्बहुधेव भाती'ति स्मृत्युक्तं शक्तिविश्लेषादिकमपि संगृहीतं ज्ञेयम् । तेन स्वल्पकार्यकरणेपि नौपाधिकत्वमित्यर्थः । नन्वेवमन्यानुविधायित्वे तेषामागन्तुकत्वं तु सिद्धम्, तथा सति नैसर्गिकत्वाभावादन्यधर्मा एव भवन्ति, न तु भगवद्धर्मा इत्यत आहुः **नचागन्तुकेत्यादि** । 'कामः सङ्कल्प' इति श्रुतौ 'अशुद्धं कामसङ्कल्प'मिति श्रुतौ च कामसङ्कल्पयोः केवलयोरेव मनोधर्मत्वं श्रूयते, न तु सर्वत्वसत्यत्वविशिष्टयोस्तयोः, अतोऽन्यधर्मत्वे श्रुत्यभावः । लिङ्गवाक्यप्रकरणाभावस्तु स्फुटः । स्थानं त्वन्यानुविधानेनैव व्याख्यातम्, अतः **प्रमाणाभावात्** तथेत्यर्थः । समाख्या तु बहुव्रीहिणा ब्रह्मधर्मत्वमेव स्फुटीकरोतीत्याहुः **तद्गतेत्यादि** । ननु यद्यप्येवम्, तथापि युक्तिभिरनुचिन्तनस्य मननत्वात् तच्छेषत्वेनैतत्पाठेप्युपासनाशेषत्वमेव, न तु स्वतन्त्रब्रह्मधर्मत्वमेषाम्, यथा अस्थूलत्वादीनाम्, अतस्तदपेक्षया निर्बलत्वात् कथमविरोध इत्यत आहुः **दृष्टत्वाच्चाविरोध इति** । 'सोऽकामयत बहु स्या'मित्यत्र सर्वविषयककामस्य ब्रह्मधर्मत्वेन दृष्टत्वादेतेषां स्वाभाविकब्रह्मधर्मत्वेन नैर्बल्याभावादविरोध इत्यर्थः । नन्वेवं सति धर्मविधिनिषेधयोरेकविषयत्वाद्विरोध एवायातीति कथमविरोध इत्यत आहुः **अविरोधेत्यादि** । अयमसदुक्तरीतिकः ।

रश्मिः ।

पाधिकत्वमित्यादीति । जपेति । विलक्षणलौहित्यबोधनाय जपाकुसुमोपादानम् । वैलक्षण्यं त्वन्यधर्मत्वम् । 'तत्सृष्ट्वा तदेवानुप्रविश'दिति श्रुतेः सर्वकामत्वादीनामन्यस्योपाधेर्धर्मत्वाभावात् । **अन्येति** । उपाध्यनुविधायित्वेपि धर्माणां ते धर्माः स्वस्य ब्रह्मण एव, नतूपाधेः, श्रुतावुपाधिसमत्वोक्त्या तथावसायात् । **समत्वं धर्मैरिति** । ननु समत्वेपि विभुत्वविरुद्धा अन्य धर्मा इति चेत्, तत्राहुः **एवेति** । 'यदेकमव्यक्तमनन्तरूप'मिति श्रुत्या निर्धारणादित्यर्थः । एवेत्यस्मात्पञ्चम्या लुक् । ननु स दोषस्तदवस्थ इति चेत्, तत्र दृष्टान्तमाहुः **कारणत्वेत्यादि** । नहि कारणत्वमुपाधिगतमुपाधेयेस्ति । 'कर्ता शास्त्रार्थवत्त्वा'दित्यधिकरणविरोधात् । आदिना सत्यत्वादयः । **तद्वदिति** न स दोषस्तदवस्थ इति भावः । ननु कारणत्वादयो नागन्तुका इति दृष्टान्तवैषम्यमिति प्रतिवादिनं पर्यनुयुञ्जतेस्म **नचागन्तुकेति** । जानाति इच्छति यतत इति प्रवादात् सर्वकामादीनां ज्ञानाधीनत्वेनागन्तुकत्वात्ते तद्धर्माः ब्रह्मधर्मा एव न । एवकारो 'नहि जन्या भगवद्धर्मा भवन्ती'ति तद्योगव्यवच्छेदकः । **श्रुत्यादीति**[1] । आदिना

१. **न चौपाधिकत्व**मित्यादि प्रमाणाभावादिति, श्रुत्यादिरूपतात्पर्यलिङ्गाभावात् । तद्गतत्वेत्यादिना तेषां वास्तवत्वानङ्गीकारे प्रत्यक्षविरोधोपीति बोधितम् । **तस्यैवेति**, विचार्य वस्तुन एव । सिद्धमाहुः तस्मादित्यादि । **एवं ब्रह्मापीति** । तत्तदुपाध्यन्तर्भूतं तथा तथा भवति, तथा च पूर्वमर्भकौकःसूत्रे व्योमवच्चेत्यनेन यदुक्तम्, तदेवात्र स्मारितम् । अत्र ब्रह्मधर्मविचारप्रसङ्गेन जीवधर्मोपि विचारित इत्याशयेनाहुः वृद्धिह्रासपदेनेति मूलपाठः रश्मौ व्याख्यातः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वक्तव्यः । तस्मात् यथा आकाशस्य वृद्धिह्रासभाक्त्वं करकादिष्वन्तर्भावात् तथैवोभयसामञ्जस्यात्, एवं ब्रह्मापि । वृद्धिह्रासपदेन शरीरे आकाशजीवयोरेकमुदाहरणं बोधयति ॥ २० ॥

दर्शनाच्च ॥ २१ ॥

हेत्वन्तरमाह । भगवति सर्वे विरुद्धधर्मा दृश्यन्ते । 'न हि दृष्टेऽनुपपन्नं नाम ।' व्याघातात् । तादृशमेव तद्वस्त्विति त्वध्यवसायः प्रामाणिकः । चकारादुलूखल-

---

भाष्यप्रकाशः ।

यथोभयसामञ्जस्ये श्रुतिद्वयस्य मुख्यार्थप्रतिपादकता भवति । एकदेशिना दृष्टान्तेनैवाविरोधसाधनात् । प्रकारोऽपि दृष्टान्तस्यैव श्रुत्यनुसारेण वक्तव्यः, अन्यथैकदेशी न मन्येत, अतस्तथेत्यर्थः । उक्तं निगमयन्ति तस्मादित्यादि । तथाच यदा भगवान् सत्त्वादिष्ववतरति, किञ्चित्कार्यार्थं जीवे आविशति वा, तथात्र ये कर्मादयः आश्चर्यजनकाः प्रतीयन्ते, यथा परशुरामादिषु निःक्षत्रीकरणादयः, यथा चन्द्रे प्रतर्दनाख्यायिकोक्ता दैत्यवधादयः, यथा च गुर्वादौ भगवद्व्यक्तिव्यञ्जनादयः, ते सर्वे आधाराभिव्यङ्ग्या भगवद्धर्मा एव, न त्वाधारधर्माः । एतदेव ज्ञापयितुमाहुः वृद्धिह्रासपदेनेत्यादि । तथाच जीवन्मुक्तदशायामानन्दाविर्भावेन व्यापकत्वेप्यणुत्वस्य यदबाधः, तत्राप्येषा युक्तिः । शरीरान्तःस्थितौ तेनाभिव्यज्यमानमपि जीवधर्मभूतमेवाणुत्वम्, आनन्दाविर्भावेन चाभिव्यज्यमानं व्यापकत्वम्, ब्रह्म तु ततोप्यधिकम्, अन्यथा व्युच्चरणादिश्रुतिविरोधापत्तेः । एतावान् परं विशेषः । आकाशे विभुत्ववज्जीवेणुत्वं सहजम्, अन्यथा 'क्षुद्रा' इति विशेषणबाधापत्तेरिति । तथाच पूर्वमर्भकौकःसूत्रे 'व्योमवच्चे'त्यनेन यदुक्तम्, तदेवात्र स्मारितम् ॥ २० ॥

दर्शनाच्च ॥ २१ ॥ सूत्रमवतारयन्ति हेत्वन्तरमाहेति । एवमुपाधिसम्बन्धेनाभिव्यज्यमानत्वे तेषां नैमित्तिकत्वेनागन्तुकत्वमेव घृतद्रवत्वादिवत्, नतु स्वाभाविकत्वम् । तथा सति सृष्टेः पूर्वं निर्धर्मकमेव स्यात्, ततश्च 'सोऽकामयते'त्यादिरपि पीड्येतेति तदभावाय हेत्वन्तरमाहेत्यर्थः । अत्र सूत्रे 'उभयसामञ्जस्यादेव'मिति पदद्वयं पूर्वसूत्रादनुवर्तते । चो बुद्धिस्थसमुच्चायकः । तथाच

रश्मिः ।

स्मृतिः । श्रुतिस्तु 'नेति नेति' 'अस्थूलमनण्वि' त्यादिश्च । स्मृतिश्च 'मायामयं वेद स वेद वेद'मिति । एतद्रूपाणां प्रमाणानां तात्पर्यं सर्वकामादिधर्मनिषेधविषये लिङ्गं हेतुस्तदभावात् । तर्हि किंविषये तात्पर्यं लिङ्गमितिचेत्, उच्यते । श्रुतेस्तात्पर्यविषयस्य 'नेति नेती'त्यस्य व्याख्याने पूर्वमुक्तम् । स्मृतेस्तात्पर्यविषयं वैराग्यमिति । पूर्वमिति । प्रथमाध्यायद्वितीयपादे । विचारित इति । आकाशदृष्टान्तेन विचारितः । क्षुद्रा इतीति । 'यथाग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्ती'ति श्रुतौ तथा ॥ २० ॥

दर्शनाच्च ॥ २१ ॥ एवेति । स्वाभाविकत्वयोगव्यवच्छेदकैवकारः । घृतेति । आदिना जतुसुवर्णद्रवत्वम् । तथा सतीति । धर्माणां नैमित्तिकत्वे सति । एवेति । सधर्मकाभिन्नत्वयोगव्यवच्छेदकैवकारः । पीड्येतेति । सृष्टेः पूर्वमिच्छारूपधर्मबोधकं वाक्यं इच्छाया अपि ज्ञाननिमित्तत्वेनागन्तुकत्वसम्भवात्पीड्येत, नित्येच्छाबोधकत्वाभावात्पीडा । इच्छादीनां 'अविनाशी वारे अयमात्मानुच्छित्तिधर्मे'ति श्रुतेर्नित्यत्वात् । सिद्धवचनभाष्यादाहुः अत्र सूत्र इति । अनुवर्तत इति । किञ्च, ब्रह्मप्रतीतेर्न विरोध इति भाष्यात्तत्रत्यात् । प्रथमसूत्राद्ब्रह्मेत्यनुवर्तते । एवमिति । सौत्रपदार्थोयम् । न विरोधशब्दाभ्यां पादार्थोप्युक्तः । तत्रत्यभाष्यादेवाहुः च इति । बुद्धिस्थानां श्रुतिस्मृतिप्रत्यक्षाणां समुच्चायक

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

बन्धनादिषु प्रत्यक्षमेवोभयसाधकं दृष्टमिति। 'अथो अमुष्यैव ममार्भकस्ये'ति च। तस्माच्छ्रुतिस्मृतिप्रत्यक्षैः सर्वविरुद्धधर्माश्रयत्वेन ब्रह्मप्रतीतेर्न विरोधः ॥ २१ ॥

भाष्यप्रकाशः।

केवलब्रह्मबोधकश्रुतिषु तत्तद्धर्मदर्शनात् प्रत्यक्षेणापि भानात् स्मृतावपि सिद्धत्वात् ब्रह्म एवम्, यथा प्रतीयते तादृशम् । तत्र हेतुरुभयसामञ्जस्यमेव । तदेतत् हृदिकृत्य सूत्रोक्तं दर्शनं विवृण्वन्ति भगवतीत्यादि । तथाच वैश्वानरविद्यायां प्रादेशमात्रत्वाभिविमानत्वं द्युमूर्धत्वादिकं पुरुषत्वं पुरुषविधत्वं पुरुषेऽन्तःप्रतिष्ठितत्वम् । तैत्तिरीये 'यदेकमव्यक्तमनन्तरूपं विश्वं पुराणं तमसः परस्ता'दित्येकस्याव्यक्तस्यानन्तरूपत्वम् । एवं श्रुत्यन्तरेऽपि 'आसीनो दूरं व्रजती'त्यादीनि दृश्यन्ते । एवं मिथिलागमने श्रुतदेवजनकयोर्गृह एककालावच्छेदेन प्रवेशादिकं स्मृतिसिद्धं दृश्यते । अवतारदशायां गोवर्धनोद्धरणादिकमवस्थासाधनविरुद्धं कार्यं च दृश्यते । तत्र प्रत्यक्षश्रुतिसिद्धे सर्वजनीनदर्शनसिद्धे तादृक्स्मृतिसिद्धे च ब्रह्मणो विरुद्धधर्माश्रयत्वेऽनुपपत्तेर्वक्तुमशक्यत्वाद्वस्तुस्वभावमेवादाय दर्शनस्येच्छानुग्रहादिहेतुकत्वं चादाय तादृशनिश्चयस्य प्रामाणिकत्वमवगन्तव्यमित्यर्थः । उभयस्साधकमिति । स्वल्पत्वमहत्त्वयोः साधकम् । तत्र बहूनां दाम्नां सन्धानेपि न स्वरूपवेष्टकत्वम्, स्वरूपस्य च न प्रथमपरिमाणादाधिक्यम्, अन्यथा विस्मयानापत्तेः । मृत्स्नाभक्षणव्यादानस्थले च स्पष्टमेव तथात्वम् । 'एवं विदिततत्त्वाया' इति तत्र कथनात् । मायामोहस्य तदुत्तरं कथनाचेति । तेन सिद्धमाहुः तस्मादित्यादि । वैश्वानरेऽर्थ-

रश्मिः।

इत्यर्थः । च दर्शनादिति सूत्रयोजनामाहुः **तथा चेति** । **तत्तद्धर्मेति** । सत्यत्वज्ञानत्वादिधर्मदर्शनात् । **स्मृताविति** । 'अथो अमुष्यैव ममार्भकस्य यः कश्चनौत्पत्तिक आत्मयोग' इतिस्मृतौ । तेन चकारात्सप्तम्या लुक् । एवं चकारार्थेषु मध्ये श्रुतिषु दर्शनादिति सूत्रं व्याख्यातं पञ्चम्यन्तेन । **प्रत्यक्षेणेति**। उलूखलबन्धनादिषु प्रत्यक्षेण । बुद्धिस्थद्वितीयचकारार्थेन समं सूत्रार्थः । बुद्धिस्थतृतीयचकारार्थेन समं सूत्रार्थमाहुः **स्मृतावपीति** । भानेन सिद्धत्वात् भानात् । एवं सूत्रार्थमुक्त्वानुवृत्तपदानामर्थमाहुः **ब्रह्म एवमिति** । एवंशब्दार्थः **यथेत्यादिः** । न विरोधः । **उभयेति** । पञ्चम्यन्तमितिविशेषणं बोध्यम् । **एवेति** । अयं दर्शनादितिहेतुयोगव्यवच्छेदकः । तस्याननुवृत्तपदेन्वयो न सकलसूत्रेऽहेतुत्वात् । नापि पूर्वहेतुसमुच्चयेन हेतुत्वम् । अन्यचकारार्थोक्तेः । **वैश्वानरेति** । इयं प्रथमाध्याये 'वैश्वानरः साधारणशब्दविशेषा'दित्यत्र समर्थिता । **प्रवेशादिकमिति** । आदिशब्देन स्थित्यादिकम् । दशमस्कन्धे स्पष्टम् । **अवस्थेति** । सप्तवार्षिकी । **साधनं** गोवर्धनोद्धरणम् । तदुभयविरुद्धं कार्यं गोष्टरक्षणम् । एतावता दृश्यन्त इति भाष्यार्थ उक्तः । **नहीत्यादिभाष्यार्थमाहुः तत्र प्रत्यक्षेति**। प्रत्यक्षा श्रुतिः प्रत्यक्षश्रुतिः। तत्सिद्धे विषये सति सार्वजनीनप्रत्यक्षसिद्धे विषये सति । **तादृगित्यादावप्येवम्** । अनुपपत्तेर्विरुद्धधर्मरूपानुपपन्नपदार्थनिष्ठाया वक्तुमशक्यत्वाद्दृष्टे दर्शनविषये सति **हि** निश्चयेन नानुपपन्नं विरुद्धधर्मादि नाम । व्याघातात् । चक्षुरादौ प्रामाण्यहिंसनात् । स स्वभाव इव दृश्यते इति तादृशं ब्रह्मरूपनिश्चयरूपवस्तुस्वभावम् । **एवे**त्यन्ययोगव्यवच्छेदकः । **तादृशेति** । 'इति त्वध्यवसायः प्रामाणिक' इति भाष्यार्थः । **भाष्ये** । **चकारादिति** । बुद्धिस्थसमुच्चायकात् । भाष्यप्रकाशोक्तार्थकात् । **आदिशब्देन** मृत्स्नाभक्षणविश्वरूपदर्शने । **प्रत्यक्षमेवेति** । सूत्रोक्तत्वात्प्रत्यक्षम् । एवकारेण श्रुतिस्मृतिरूपान्ययोगव्यवच्छेदकेनोभयसाधकम् । **प्रकृते** । **स्पष्टमेवेति** । अस्पष्टत्वयोगव्यवच्छेदक एवेति । **विरुद्धधर्माश्रयत्वं तथात्वमित्यस्यार्थः** । विरुद्धधर्माश्रयत्वं तत्त्वमिति वाक्येनाहुः **एवं विदितेति** । तत्र प्रमाणमाहुरित्यप्याभासः । **कथनादिति** । 'वैष्णवीं व्यतनोन्माया'मित्येवम् । प्रत्यक्षमेवेति **भाष्येण**

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः ॥ २२ ॥

परमार्थतो विरोधं परिहृत्य युक्त्यापि प्रतिषेधति। ननु सर्वविशेषधर्माणामस्थूलादिवाक्यैर्निषेधात् कथमविरोधः प्रत्येतव्य इति चेत्। तत्राह। प्रकृतैतावत्त्वं हि प्रतिषेधति। प्रकृते यदेतावत् परिदृश्यमाना यावन्तः पदार्था लौकिकाः,

---

भाष्यप्रकाशः।

क्रमस्य बलीयस्त्वमुपगम्य विरोधस्य परिहर्तुं शक्यत्वेपि काठके तथा वक्तुमशक्यत्वात्। उलूखलबन्धने स्वल्पस्य यत्तावत्सु दामस्वमानं तस्य स्वरूपधर्मत्वे, मतान्तरेण शरीरधर्मत्वे वा तदाधारस्य विरुद्धधर्माश्रयतायाः प्रत्यक्षसिद्धतया स्मृतिसिद्धतया चापह्नोतुमशक्यत्वेन अभिन्ननिमित्तोपादानत्वोपगमेन च विरुद्धधर्माश्रयत्वस्य प्रामाणिकत्वाच्छ्रुत्यादिभिस्तथात्वेन ब्रह्मप्रतीतेर्न विरोध इति प्रकृतानां सर्वकामत्वादीनामप्यौपचारिकत्वकल्पनं नैमित्तिकत्वेनानित्यत्वोद्भावनं चाप्रयोजकमित्यर्थः। एवमेताभ्यां सूत्राभ्यां 'अत एव चोपमे'तिसूत्रोक्तं सर्वं प्रत्युक्तं ज्ञेयम् ॥२१॥

प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः ॥ २२ ॥ सूत्रमवतारयन्ति **परमार्थत** इत्यादि। **परमार्थत** इति। वस्तुविचारात्। एवं सर्वैः प्रकारैः परिहृतेपि विरोधे पुनर्युक्त्या परिहारस्य किं प्रयोजनमित्याकाङ्क्षायां वस्तुनस्तादृक्स्वभावत्वममन्वानं प्रति युक्तिरवश्यं वक्तव्येत्यतः सूत्रांशमवतारयन्ति **नन्वि**त्यादि। तथाच[1] पूर्वसूत्रोक्तदर्शनस्य अवतीर्णे स्वेच्छया

रश्मिः।

सौत्रदर्शनस्य मुख्यत्वं श्रुतिस्मृत्योर्व्यवच्छेदेनोक्तं तयोरन्वयमत्र भाष्य उक्तं तत्स्पष्टयन्तिस्म **वैश्वानर** इति। प्रादेशमात्रेभिविमाने औपाधिकेऽभिविमानत्वासंभवादार्थक्रमेणाभिविमाने इति वक्तव्ये अर्थक्रमस्य बलीयस्त्वमुपगम्येत्यर्थः। **काठक** इति। 'आश्चर्यो वक्ता कुशलोऽस्य लब्धा, आश्चर्योस्य ज्ञाता कुशलोऽनुशिष्ट' इत्यत्राश्चर्ये वक्तव्ये औपाधिकोप्यभिविमान इत्यर्थक्रमेण तथा नामविरोधपरिहारस्य वक्तुमशक्यत्वात्। **तस्येति**। अमानस्य। **मतान्तरेणेति**। पुराणमतेन मायारूपशरीरधर्मत्वे वा। स्मृतेर्मुख्ये दर्शने उपष्टम्भकतयान्वयमाहुः **स्मृतिसिद्धेति**। प्रत्यक्षमुपष्टब्धमिति सप्रमाणम्, न तु शुक्तिरजतप्रत्यक्षवदप्रमाणमित्युक्तम्। **अभिन्नेति**। समन्वयाधिकरणेयमुपगमः। अत्र श्रुतेरन्वयमाहुः **श्रुत्यादिभिरिति**। श्रुतिस्मृतिप्रत्यक्षैः। **तथात्वेन** विरुद्धधर्माधारत्वेन। **ब्रह्मप्रतीतेरिति**। ब्रह्मदर्शनात्। अत्र **श्रुत्यादिभिरि**त्यन्तेन श्रुतिस्मृतिप्रत्यक्षैरितिचकारार्थभाष्यार्थ उक्तः। **तथात्वेने**त्यनेनानुवृत्तोभयसामञ्जस्यं पञ्चम्यन्तं तस्यार्थः सर्वविरुद्धधर्माश्रयत्वेनेति शक्यतावच्छेदक उक्तः। **ब्रह्मप्रतीते**रित्यनेनावृत्तब्रह्मपदार्थः सौत्रदर्शनादितिपदार्थ उक्तः। **न विरोध** इत्यनेनावृत्तैवंशब्दार्थ उक्तः। **नैमित्तिकत्वेनेति**। जानातीच्छति यतत इति प्रवादात् निमित्तं ज्ञानं तत्सम्बन्धिविशेषत्वे च। **अत एव चोपमेति**। 'तस्माज्जडजीवधर्माणां भगवत्युपचारः, निषेधस्तु मुख्य' इति भाष्येण संगृहीतम्। **प्रत्युक्तमिति**। सर्वकामत्वादीनामौपचारिकत्वकल्पनस्यानित्यत्वोद्भावनस्य चाप्रयोजकत्वोक्त्या प्रत्युक्तमित्यर्थः ॥ २१ ॥

प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः ॥ २२ ॥ निश्चिते इति। स्वाभाविकानां निषेधायोगात्। **कथमिति**। कथमविरोधः प्रत्येतव्य इत्यर्थः। **भाष्ये। प्रतीतस्यै-**

---

१. तथा च सर्वविशेषनिषेधेन तादृक्स्वभावाभावे निश्चिते कथं तथेत्यर्थः इति मूले पाठः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तेषामेव धर्मान् निषेधति । प्रतीतस्यैव हि निषेधात् । अतो जगद्वैलक्षण्यमेवा-स्थूलादिवाक्यैः प्रतिपाद्यते, न तु वेदोक्ता ब्रह्मधर्मा निषेद्धुं शक्यन्ते । कुत एत-दवगम्यते । तत्राह । ततो ब्रवीति च भूयः । यत्रैव वाक्ये पूर्वं निषेधति, तस्मिन्नेव वाक्ये पुनस्तमेव विधत्ते । 'यतो वाचो निवर्तन्ते अप्राप्य मनसा सह, आनन्दं ब्रह्मणो विद्वा'निति । तथा अस्थूलवाक्येपि 'एतस्यैव प्रशासने' 'एतद्वि-दित्वा' 'आकाश ओतश्च प्रोतश्चे'ति । चकारादेकवाक्योपाख्यानभेदौ संगृ-

भाष्यप्रकाशः ।

व्यवहार्ये प्रपञ्चसलक्षण एव प्रतीयमानैकविशेषविरुद्धविशेषान्तरविषयत्वान्न तेन प्रपञ्चविलक्षणे सर्वविशेषशून्ये ज्ञानाकारे तद्विरुद्धविशेषवत्त्वसिद्धिरिति तत्र धर्मविधिनिषेधयोरविरोधः कथं प्रत्येतव्य इत्याकाङ्क्षायामविरोधप्रत्ययप्रकारमाहेत्यर्थः । व्याकुर्वन्ति प्रकृते यदित्यादि शक्यन्त इत्यन्तम् । प्रकृते इति । गार्ग्युपक्रान्ते प्रपञ्चे, गार्गीप्रश्ने वा । तथाच जगद्वैलक्षण्यबोधनेन तत्प्रकारका धर्मा निषिध्यन्ते, न तु तत्सदृशाः स्वरूपधर्मा अपि । अतो न ते औपचारिका इत्ययं तत्तदभावयोरविरोधप्रत्ययप्रकारः । तेन निषेधमात्रदर्शनात् सर्वकामत्वादीनामौपचारि-कत्वकल्पनं यत् दर्शयतिसूत्रे कृतम्, तदनया युक्त्या परिहृतमित्यर्थः । अत्र प्रमाणाकाङ्क्षायां सूत्रशेषमवतारयन्ति कुत इत्यादि । उदाहरणमाहुः यत इत्यादि । अत्र ज्ञानकारणाप्राप्तिकथन-मुखेन पूर्वार्धे ज्ञानं निषिध्य, उत्तरार्धे तद्विधत्ते । अस्थूलवाक्येपि 'अवागमनः अमुख'मिति प्रशासनकारणनिषेधमुखेन प्रशासनं निषिध्य, 'एतस्यैवे'त्यादिना तद्विधत्ते । एवं सर्वधर्मनि-षेधमुखेन वेद्यत्वं निषिध्य, 'एतद्विदित्वे'त्यादिना तद्विधत्ते । तथा 'न तदश्नोति कश्चने'ति व्याप्तिं निषिध्य, 'आकाश ओतश्च प्रोतश्चे'त्यनेन तां विधत्ते । 'न तदश्नोती'त्यस्य भोजनार्थकत्वपक्षे त्वत्र भगवत्कर्तृकं च भोगं निषेधति, 'सोऽश्नुते सर्वान् कामा'नित्यादौ तद्विधत्ते इति बोधयि-तुमाहुः चकारादित्यादि । तथाच यथा श्वेताश्वतरे 'अनन्तश्चात्मा विश्वरूपो ह्यकर्ते'ति कर्तृत्वं निषेधति, तथा मुण्डके 'कर्तारमीश'मिति विधत्ते । एवमन्यत्रापि बोध्यम् । तथाच कर्मणि साध्ये

रश्मिः ।

वेति । अप्रतीतयोगव्यवच्छेदक एवकारः । जगद्वैलक्षण्यमेवेति । नन्वस्थूलादिवाक्ये वैलक्षण्यं न नञर्थः, षड्स्वनुक्तेरितिचेत् । न । पर्युदासार्थकनञर्थेन सुखेन वैलक्षण्योपलब्धेः । तद्भिन्नस्त-त्सदृशो विलक्षणो भवतीति । चन्द्रवन्मुखमित्यत्र चन्द्रभिन्नं चन्द्रसदृशं मुखं भवति । तद्विलक्षणमि-त्येवकारः । यत्रैवेति । आरोपापवादस्यासङ्गतत्वबोधनायैवकारत्रयम् । अन्यथैवकारत्रयं व्यर्थं स्यात् । तथाच यद्यारोपापवादो भाष्ये विवक्षितः स्यात्, एवकारत्रयघटितं भाष्यं न स्यादिति । तेनैतादृशस्थले नारोपापवादः । यत्र क्वचिद्धर्मा विहिताः, अन्यत्र निषिद्धाः, तत्रैवारोपापवादसन्देहः कर्तव्य इति भाष्येण द्योत्यते । उदाहरणमिति । उक्तार्थस्य उत् अधिकमाहरणं यस्मिन् तद्वाक्यमाहुः । एकत्वम-विवक्षितम् । ज्ञानेति । ज्ञानं शाब्दं तत्कारणं वाचस्ताभिरप्राप्तिकथनमुखेनेत्यर्थः । अवागिति । अवाक् अमन इति छेदः । प्रशासनेति । प्रशासनकारणानि वाङ्मनोमुखानि । तन्निषेधमुखेन । एतस्येति । 'एतस्य वा अक्षरस्य प्रशासने गार्गि द्यावापृथिवी विधृते तिष्ठत' इति श्रुत्या । सर्वधर्मेति । अस्थूल-श्रुत्यैव सर्वधर्मनिषेधमुखेन । एतद्विदित्वेत्यादीति । 'अथ य एतदक्षरं गार्गि विदित्वास्माल्लोका-त्प्रैति स ब्राह्मण' इत्यादिना । अन्यत्रापीति । मूर्तामूर्तब्राह्मणे 'अथात आदेशो ने'ति मूर्तामूर्ते निषिध्य तद्विधत्ते 'नह्येतस्मादिति नेत्यन्यत्परमस्तीति प्राणा वै सत्यं तेषामेष सत्य'मिति श्रुत्या । चकारादित्या-दिभाष्यस्य चकारादनुक्तसमुच्चयार्थकात् एकं ब्रह्मवाक्येन षोडशिग्रहणाग्रहणरूपेण यदुपाख्यानं तयोः परस्परं भेदौ तौ संगृहीतावित्यर्थं मन्वाना आहुः तथा चेति । कर्मणीति । अतिरात्राख्ये व्यक्तिभे-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

हीतौ । सर्वत्र लौकिकं प्रतिषेधति, अलौकिकं विधत्ते इति युक्त्या निर्णयः । तस्मात् युक्त्याप्यविरोधः ॥ २२ ॥

इति तृतीयाध्याये द्वितीयपादे षष्ठमम्बुवद्ग्रहणादित्यधिकरणम् ॥ ६ ॥

भाष्यप्रकाशः ।

व्यक्तिभेदेन षोडशिग्रहणाग्रहणवन्नित्य एकस्मिन् ब्रह्मणि ज्ञेयत्वाज्ञेयत्वप्रशासितृत्वाप्रशासितृत्वादीनां विकल्पस्याशक्यवचनतया वाक्यस्याबोधकतायां तन्निवृत्त्यर्थं लौकिकं निषेधति, अलौकिकं तं धर्मं विधत्ते इति व्यवस्था मन्तव्या । स्थूलत्वादीनां लौकिकानामेव निषेधदर्शनात् । ईदृशप्रशासितृत्वादीनामलौकिकानामेव विधानदर्शनात् । अतो ये वस्तुस्वभावतो विरुद्धधर्माश्रयत्वं न मन्वते, तान् प्रत्येवं लौकिकालौकिकविभागरूपया युक्त्या निर्णयः । तेन श्रुत्या बोध्यमाना ये सर्वकामत्वादयः, तेप्यलौकिका एव । मन्दधियामविचारकाणां परं नामतौल्येन भ्रमः । नचानाप्तकामत्वापत्तिः । अभिध्यारूपत्वेन, स्वयमेव तत्पूर्तिकरणेन चादोषात् । एतेन जीवतुल्यतापत्तिरपि परिहृता बोध्या । तस्माच्छ्रुत्यक्षराण्यननुसन्दधानानां बोधार्थं युक्त्याप्यविरोध आचार्येणोक्त इत्यर्थः । एतेनैव यावद्धर्मशून्यत्वं ब्रह्मणो वदन्तोपि प्रत्युक्ता वेदितव्याः ।

अन्ये त्वस्मिन् सूत्रे 'द्वे वा व ब्रह्मण' इति वाक्यं विषयत्वेनाहुः । तदर्थं विद्वन्मण्डने एतद्वाक्यार्थोपि विचारितः । तथाहि । 'नेति नेती'त्यत्र इतिशब्दः प्रकारवाची । तथाच पूर्वं मूर्तामूर्तब्रह्मणो विभूतिरूपं 'य एवं वेदे'त्यन्तेन निरूप्य यस्यैतद्रूपद्वयं पूर्वमेव षष्ठ्यन्तेन पदेन निरूपितभेदस्य तस्मिन्निरूप्यमाणेष्वपि सर्वतःपाणिपादान्तत्वादिष्वेवं लौकिकत्वेन वेदनं मा भूदिति भिन्नप्रक्रमेणैतत्प्रकारकं वेदनं ब्रह्मणो निषेधति 'अथात' इत्यादिना । अयमर्थः । ब्रह्मण्यपि मूर्तामूर्तरूपे सर्वतःपाणिपादान्तेत्यादिश्रुत्युक्ते वेदितव्ये । परन्त्वित्यनेन प्रकारेण न वेदितव्ये ब्रह्मण एते रूपे इति, किन्तु ब्रह्मैवेति वेदितव्ये इत्यर्थः । अत्र विनिगमकमाह सूत्रकारः 'ततो ब्रवीति च भूय' इति । शेषं स्फुटम् ।

यत्तु प्रकृतशब्देन 'द्वे वा व ब्रह्मण' इत्यादिनोक्तं मूर्तामूर्तलक्षणं रूपद्वयं परामृश्यत इति मतम्, तत्र प्रकृतत्वं प्रतिषेधतीत्येतावतैव चारितार्थ्ये सत्येतावत्पदं व्यर्थम् । नच प्रकृतस्य ब्रह्मणः प्रकृते वा ब्रह्मणि एतावत्त्वं प्रतिषेधतीति व्याख्यानान्न दोष इति वाच्यम् । तथा सति 'ततो ब्रवीति च भूय' इत्यस्य वैयर्थ्यापातात् । प्रकृतपदेनैव ब्रह्मप्रमितौ तदभावशङ्कानुदयेन तत्सत्तायां मानाकाङ्क्षार्थं तत्कथनप्रयोजनाभावात् । तस्मादसदुक्त एवार्थ इति ॥ २२ ॥ इति षष्ठमम्बुवद्ग्रहणादित्यधिकरणम् ॥ ६ ॥

रश्मिः ।

देनैकैकेन । अतिरात्रे षोडशिनं गृह्णाति, नातिरात्रे षोडशिनं गृह्णातीति षोडशिग्रहणाग्रहणयोर्विकल्पस्येव । षष्ठ्यान्ताद्वतिः । अशक्येति । व्यक्तिभेदाभावादितिभावः । अबोधकेति । दृष्टान्ताभावात्तथा । एवेति । प्रक्षालनपङ्कन्यायेनैवकारः । विद्वन्मण्डनेयं विषयः स्पष्टः । सर्वत्रेतिभाष्यं विवृण्वन्ति स्म लौकिकं निषेधती । एवेति । नित्यानां निषेधायोगात् । एवेति । 'लौकिकं नैव मनुत' इत्याचार्यवचसः । नित्यानित्यसंयोगापत्तेश्च । अलौकिका एवेति । एवकारार्थ उक्तः । नामेति । स्थूलसर्वकामादिनाम्नां तौल्येनालौकिकनामवति लौकिकनामवत्त्वेन ज्ञानमितिभ्रमः । तस्मादितिभाष्यं विवृण्वन्तिस्म तस्मादिति । अनन्विति । युक्तीर्विनाननुसन्दधानानाम् । युक्त्यापीति । अपिशब्देन परमार्थतः । आचार्येण व्यासेन ॥ २२ ॥ इति षष्ठमम्बुवद्ग्रहणादित्यधिकरणम् ॥ ६ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तदव्यक्तमाह हि ॥ २३ ॥ (३-२-७.)

शब्दबलविचारेण विरोधं परिहृत्यार्थबलविचारेणाविरोधप्रतिपादनायाधिकरणमारभते । सर्वाणि विरुद्धवाक्यान्युदाहृत्य चिन्त्यन्ते । 'न चक्षुषा गृह्यते' 'कश्चिद्धीरः प्रत्यगात्मानमैक्षत्,' 'नापि वाचा' 'सर्वे वेदा यत् पदमामनन्ति' 'अप्राप्य मनसा सह' 'मनसैवैतदाप्तव्यम्,' 'अस्पर्शमगन्धमरसम्' 'सर्वरूपः सर्वगन्धः सर्वरसः', 'अपाणिपाद' इत्यादि 'विश्वतश्चक्षु'रित्यादि, 'निर्गुणश्च' 'यः सर्वज्ञः सर्वशक्ति'रित्यादिविरुद्धवाक्यानि । न हि वस्तु द्विरूपं सम्भवति । वाक्यद्वयमपि प्रमाणम् । तथा सति प्रमाणान्तरानुरोधेनैकस्य स्वार्थे प्रामाण्यम्, अन्यस्योपचरितार्थत्वमिति युक्तम् । तत्र प्रत्यक्षानुरोधेन निर्णयो विचार्यते ।

तत्र पूर्वपक्षमाह । तदव्यक्तम् । तत् ब्रह्म अव्यक्तमेव भवितुमर्हति ।

भाष्यप्रकाशः ।

तदव्यक्तमाह हि ॥ २३ ॥ अधिकरणप्रयोजनमाहुः शब्दबलेत्यादि । तथाच यद्यपि स्वविचारे तस्यानावश्यकत्वम्, तथाप्यन्यैः ऋषिभिरर्थबलेन विचारस्याङ्गीकृतत्वात् तेनाविचारे तेषां निर्विशेषपक्षपातात् सविशेषश्रुतिः पीड्येत, विचारिते त्वर्थसामर्थ्ये वस्तुस्वभावादेवोभयसम्भवान्न श्रुतिपीडेत्यतस्तन्निवारणार्थं तदारभत इत्यर्थः । ननु विरुद्धवाक्येषु चिन्तितेषु किमवशिष्टं येनार्थबलाद्विरोधोत्थानमित्यत आहुः सर्वाणीत्यादि । सर्वाणीति । प्रमाणाग्राह्यत्वतद्ग्राह्यत्वयोर्धर्मराहित्यतद्वत्तयोराकारराहित्यतद्वत्तयोर्गुणराहित्यतद्वत्तयोर्बोधकानि । 'सर्वरूप' इत्यनेन 'यथामाहारजनं वास' इत्यादिश्रुतिस्तद्विरुद्धा 'अरूपमव्यय'मिति श्रुतिश्च स्मार्यत इति बोध्यम् । सन्देहमाहुः न हीत्यादि । तथाच लौकिकालौकिकभेदेन व्यवस्थायां कृतायां मास्तु शब्दे संशयः, तथाप्यर्थे संशयो दुर्वार इत्यर्थः । सन्देहबीजमाहुः वाक्येत्यादि । तत्र[1] पूर्वपक्षमुत्थापयितुमापाततो निर्णयप्रकारं वदन्ति तथा सतीत्यादि, विचार्यत इत्यन्तम् ।

पूर्वपक्षमाहुः तत्रेत्यादि । यद्यपि पूर्वं सर्वप्रमाणापेक्षया शब्दस्यैव प्राबल्यं निर्णीतम्, तथापि शब्दस्यार्थसापेक्षत्वादर्थबलेनैव विचारो मुख्य इति श्रुत्यर्थनिश्चायनायार्थबले विचार्ये

रश्मिः ।

तदव्यक्तमाह हि ॥ २३ ॥ तस्येति । अर्थबलविचारस्यास्मिन्भगवद्व्यासमते शब्दबलसिद्धेनावश्यकत्वम् । अन्यैरिति । अत्रैव बादरिप्रभृतिभिः । यथेति । आमाहारेण जनं जननम् । वर्णलोपः । वासः शरीरे इत्यनव्ययम् । संशय इति । चक्षुरग्राह्यो ग्राह्यो वेत्यादिः । सन्देहबीजमिति । प्रमाणं विकल्पोत्थापकं बीजमित्यर्थः । 'श्रुत्योर्विरोधे विकल्प' इति मनुस्मरणात् । आपातत इति । अविचार आपातस्तस्मात् । एकदेशिनिर्णयप्रकारम् । पूर्वमिति । प्रथमाध्यायद्वितीयचरणे वैश्वानराधिकरणे । शब्दस्यैवेति । एवकारस्तु 'केवलं शब्दबलविचारका आचार्या' इति 'साक्षादप्यविरोधं जैमिनि' रितिसूत्रभाष्यात् । शब्दस्यार्थेति । घटं दृष्ट्वा घटशब्द इति तथा । यद्यप्यर्थस्य शब्दसापेक्षत्वं 'शब्द इति चे'दितिसूत्रात्, तथापि पूर्वपक्षग्रन्थत्वाद्युक्तम् । एवेति । 'अर्थबलविचारको बादरि'रिति तथा । 'केवलार्थवि-

---

१. तत्रापाततो निर्णयप्रकारं वदन्तः पूर्वपक्षमुत्थापयन्तीति पाठः मूले ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कुतः । आह हि । श्रुतिप्रत्यक्षाभ्याम् । 'नेति नेत्यात्मा अग्राह्यो न हि गृह्यत' इति । 'न हि गृह्यत' इत्यनुभवसाक्षिकं प्रमाणं श्रुतिराह । न हि केनचिदपि चक्षुषा मनसा वा ब्रह्म दृष्टमस्ति । सर्वरूपत्वे तु सर्वैरेव द्रष्टुं शक्येत । तस्मात् सर्वधर्मवत्त्वेन प्रतिपादकान्युपचरितार्थान्येव । अनुभवविरोधादित्येवं प्राप्तम् ॥ २३ ॥

अपि संराधने प्रत्यक्षानुमानाभ्याम् ॥ २४ ॥

अपीति पूर्वपक्षगर्हायाम् । सर्वथा मूर्खः पूर्वपक्षवादी । यतः संराधने सम्यक् सेवायां भगवत्तोषे जाते दृश्यते । 'श्रद्धाभक्तिज्ञानयोगाद्वेहि' 'यमे-

भाष्यप्रकाशः ।

पूर्वपक्षमाहेत्यर्थः । हेतुं व्याकुर्वन्ति आह हीति । हि श्रुतिप्रत्यक्षाभ्यां हेतुभ्यां श्रुतिराह । अतस्तदव्यक्तमिति योजना । श्रुतिप्रत्यक्षाभ्यामिति यदुक्तम्, तत्र का श्रुतिः, किं प्रत्यक्षमित्याकाङ्क्षायां तदेव विभजन्ते नेतीत्यादि । अस्यां श्रुतौ कथं प्रत्यक्षप्राप्तिरित्यत आहुः नहीत्यादि । तदेव विवृण्वन्ति न हि केनचिदित्यादि ॥ २३ ॥

अपि संराधने प्रत्यक्षानुमानाभ्याम् ॥२४॥ सूत्रं व्याकुर्वन्ति अपीत्यादि । अत्र दर्शनसूत्रोक्तो दर्शिर्व्यवहितोऽप्यर्थबलात् परामृश्यते । तथाच केवलस्य प्रत्यक्षादेः प्रमाणस्य लौकिकत्वेन नैर्बल्येपि साधनबलसिद्धस्य तस्यालौकिकत्वेन प्रबलत्वात् केवलानुभवविरोधोऽप्रयोजक इति साधनसिद्धेन प्रत्यक्षेण निर्णय इत्यर्थः । हेतुं व्याकर्तुं श्रुतिस्मृती उपन्यस्यन्ति श्रद्धेत्यादि । इयं

रश्मिः ।

चारको बादरि'रिति उक्तसूत्रभाष्यात् । नहि केनचिदित्यादीति । सर्वैरेवेति । योग्यत्वादेवकारः । उपचरितेति । उपचारो व्याख्यातः । एवकारः सर्वेषां दर्शनाभावात् ॥ २३ ॥

अपि संराधने प्रत्यक्षानुमानाभ्याम् ॥ २४ ॥ केवलस्येति । श्रुतिरहितस्य । पूर्वं 'श्रुतिप्रत्यक्षाभ्या'मित्युक्तत्वात् । प्रत्यक्षादेरित्यत्रादिशब्देनानुमानादि । भाष्ये प्रत्यक्षस्योपलक्षकत्वात् । तथा च 'सर्वैरेव द्रष्टुं शक्येते'तिभाष्याद्वह्निरूपत्वे धूमरूपेणानुमातुं शक्येत । गवयरूपत्वे उपमातुं शक्येत । घटादिरूपत्वे शब्दितुं शक्येतेति बोध्यम् । केवलानुभवेति । केवलस्य धर्मशून्यस्य नीरूपत्वादनुभवो विरुध्यते, तद्विषयको न भवतीत्यर्थः । नीरूपत्वसमानाधिकरणो न भवति । तथाच 'मूर्खो देहाद्यहंबुद्धि'रिति वाक्यात् अग्राह्यत्वेन प्रकारेण प्रत्यक्षशून्यो देहाद्यहंवादी । अग्राह्यत्वस्योपचरितत्वात् । 'कश्चिद्धीरः प्रत्यगात्मानमैक्ष'दित्युक्तप्रकारेण प्रत्यक्षशून्यो देहाद्यहंबुद्धिः । ताम्बूलमदशक्तिवदप्यदर्शनम् । व्यापकत्वेनाप्यदर्शनम् । किञ्च । आत्मोपनिषदुक्तरीत्यात्मत्वेन देहप्रत्यक्षशून्यः आत्मत्वेनान्तरात्मप्रत्यक्षशून्यः । इति भाष्ये सर्वथाशब्दः । एवं देहाद्यध्यासे 'अहं स्थूल' इत्यादौ ह्यस्मच्छब्दः प्रत्यगात्मवाचको व्याख्यातः । अहङ्कारेऽस्मच्छब्दप्रयोगं कृत्वा भाष्यं यत इत्यादि । देहगेहादिष्वहंममेत्यभिमानवता भगवान्न दृश्यते । अभिमानस्य तामसत्वेनाज्ञानकार्यत्वादज्ञानस्य च दर्शनावरकत्वात् । यतो यथाकथञ्चिदप्यमूर्खत्वमवलम्ब्य सम्यक्संराधने । करणल्युडन्तं पदम् । सम्यक्संसिद्धिर्येन पुष्टिसेवनेन मोक्षावान्तरकालनिर्गमाय तत्संराधनं त्वस्मिन्संराधने तदाहुः, सम्यक्सेवायामिति । ननु सिद्धिजनकोऽन्योपि पदार्थोऽस्तीत्यत आहुः भगवत्तोष इति । 'यद्वृत्त्या तुष्यते हरि'रिति वाक्यान्नान्यपदार्थो भगवत्तोषजनक इति सिद्ध्युपस्थापिका सेवैवात्र व्यासाशयीयेति भावः । नन्वधोक्षजत्वात्सेवयाप्यदर्शनमस्त्विति चेत्, तत्राहुः दृश्यत इति । स्वेच्छया दृश्यो भवति । अथवा

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

वैष वृणुते तेन लभ्यः' 'भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन । ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परन्तपे'ति । द्विविधमपि रूपं दृश्यते । 'ततस्तु तं पश्यते निष्कलं ध्यायमानः' 'अनेकबाहूदरवक्त्रनेत्रं पश्यामि त्वां सर्वतोऽनन्तरूप'मिति संराधकस्य स्वानुभवः, ध्रुवादीनामनुमापकत्वं च । तस्मात् प्रत्यक्षानुमानाभ्यां

भाष्यप्रकाशः ।

कैवल्योपनिषत्स्था । परमेष्ठिना आश्वलायनं प्रत्येतेन साधनेन जानीहीत्यत्रोपदिष्टम् । ज्ञानविषयं च ब्रह्म सर्वदेवतादिमयं शिवाकारं निराकारं चोपदिष्टम् । द्वितीया काठके मुण्डके च । तत्राद्ये, 'आसीनो दूरं व्रजती'त्याद्युक्त्वोक्ता । तत्राप्यासीनत्वादिना साकारताया 'अशरीर'मित्यनेनानाकारतायाश्च लाभः । द्वितीयेपि द्वितीयमुण्डके विरुद्धधर्माश्रयं परमात्मानं प्रस्तुत्योक्ता । अत्र 'तनुं स्वा'मिति कथनात् साकारलाभ इति तत्राप्येवम् । गीतावाक्यं तु विश्वरूपं दर्शयित्वा ततः स्वरूपं चतुर्भुजाकारं प्रदर्श्योक्तं भगवता । द्विविधमिति । साकारं निराकारं च । तथाच श्रुतिस्मृत्युक्तसंराधकप्रत्यक्षानुरोधेनार्थबले विचारितेपि निराकारं साकारं चेति सिध्यति, न तु केवलमव्यक्तमग्राह्यमेवेति त्वदुक्तमसङ्गतमित्यर्थः । एवं प्रत्यक्षानुमानशब्दयोः श्रुतिस्मृतिपरत्वमभिप्रेत्य व्याख्यातम् । एवं व्याख्याने शब्दबलमेवायातीत्यपरितोषेणातः परं साक्षात्कारानुमितिपरत्वं प्रत्यक्षानुमानपरत्वं चादाय व्याकुर्वन्ति ततस्त्वित्यादि । लौकिकप्रत्यक्षं शुद्धमनःसंयोगजम्, अलौकिकं दिव्यदृष्टिजम्, विपरीतं वा । तथाचैतयोः श्रुतिस्मृत्योः प्रत्यक्षमात्रबोधकत्वादत्र साधनसिद्धप्रत्यक्षादर्थस्वभावेऽवधारिते, 'तं यथा यथोपासते' इति श्रुत्या अव्यक्तनिष्कलोपासकस्य तथैव प्रत्यक्षं वाङ्मनसेनाप्राप्यं च, वृतस्य तु तत्तद्धर्मवत्त्वेन प्रत्यक्षं वाङ्मनसगम्यं चेति, तादृशतादृशसम्यक्प्रत्यक्षविषयादर्थस्वभावादेवाविरोधनिर्णय इत्यर्थः । प्रत्यक्षस्य प्रामाणिकत्व-

रश्मिः ।

अनिदमित्थतया दृश्यते । ननु ज्ञानकर्मणी विहाय शूद्रधर्मे कुत आशयः, किञ्च, कीर्तनभक्तेः सुबोधिन्यां मुख्यत्वेनोक्तायाः संराधनत्वं कुतो नेति चेत् । न । तोषकामस्यान्यत्रानधिकारात् । एतेन सेवायां प्रकारभेदोपि प्रत्युक्तः । तोषकामस्य स्वधर्माणां परधर्मत्वाभावात् । 'शमो दमस्तपः शौचं सन्तोषः क्षान्तिरार्जवम् । मद्भक्तिश्च दया सत्यं ब्रह्मप्रकृतयस्त्विमा' इत्येकादशस्कन्धात् । किञ्च । भक्तिमार्गप्रवेशानन्तरं ब्राह्मणधर्मा अपि परधर्माः, भक्तिः स्वधर्म इति । कीर्तनभक्तेर्मुख्यत्वेऽप्यशास्त्रार्थत्वात् । 'सेवायां वा कथायां वे'ति विकल्पोक्तेश्च व्यवस्था । शास्त्रार्थत्वं तु क्रिया पूर्वकाण्डार्थ इति । 'ज्ञानं क्रिये'ति पञ्चरात्रशास्त्रात् ज्ञानकाण्डं ज्ञानक्रियार्थकम् । सांख्ययोगसूत्रं 'तपःस्वाध्यायेश्वरप्रणिधानानि क्रियायोग' इति । 'ज्ञानेन भक्त्ये'त्यथर्वशिरआदिना पशुपतिमते भक्तिरिति षट्शास्त्राणि भक्तिप्रतिपादकानि । 'ब्रह्म तर्हि अग्नि'रित्युत्तरार्धसुबोधिनी । 'अग्नये जुष्टं निर्वपामी'ति संहिता । 'जुष प्रीतिसेवनयोः' । प्रणिधानं प्रयत्नः । **आद्य** इति । काठके । **द्वितीय** इति । मुण्डके । **संराधकस्येति** । अर्जुनस्य । **श्रुतिस्मृतीति** । प्रत्यक्षशब्देन श्रुतिबोधस्तु ब्राह्मण आर्षात् । ऋषिर्मन्त्रद्रष्टेति । 'अपश्यत्पुरोडाशं कूर्मभूत५ सर्पन्त'मिति श्रुत्या प्रत्यक्षमूलत्वाल्लाक्षणिकः । अनुमीयन्त उत्सन्नप्रच्छन्नशाखा येनेत्यनुमानं स्मृतिः । **अतः परमिति** । लाक्षणिकत्वापत्तेः परम् । **प्रत्यक्षेति** । चक्षुर्व्याप्तिज्ञानपरत्वम् । **एवेति** । उपचरितत्वयोगव्यवच्छेदकैवकारः । **अविरोधेति** । सर्वधर्मप्रतिपादकानां'अग्राह्यो न हि गृह्यते'इत्यादीनां चाविरोधनिर्णय इत्यर्थः । **प्रत्यक्षस्येति** । दर्शनसूत्रीयानूदितप्रत्यक्षस्य । पुष्टभक्तानां दर्शनसूत्रे प्रत्यक्षं तदप्रामाणिकमपि भवेत्प्रमेयबलस्याधिक्यात् । मर्यादायां तु संराधनसाधनजन्यायां प्रत्यक्षरूपं दर्शनं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

श्रुतिस्मृतिभ्यां वा ब्रह्म साकारमनन्तगुणपरिपूर्णं चेति नाव्यक्तमेवेति निश्चयः। अतो लौकिकालौकिकप्रत्यक्षविषयत्वादुभयवाक्यार्थरूपमपि ब्रह्म ॥ २४ ॥

इति तृतीयाध्याये द्वितीयपादे सप्तमं तदव्यक्तमाह हीत्यधिकरणम् ॥ ७ ॥

प्रकाशादिवच्चावैशेष्यं प्रकाशश्च कर्मण्यभ्यासात् ॥ २५ ॥ (३. २. ८.)

पुनः प्रकारान्तरेण पूर्वोक्तमेव स्थिरीकर्तुमधिकरणान्तरमारभते।

तत्र सूत्रद्वयेन पूर्वपक्षद्वयमाह।

ननु प्रत्यक्षानुरोधेनोभयविधवाक्यसमाधानं नोपपद्यते, वस्तुशक्त्यैव निर्णय उचितः, न तु श्रुतिप्रत्यक्षाभ्याम्, यथा प्रकाशजलसुवर्णादीनामनेकविधत्वं नाङ्गीक्रियते, सूर्यचन्द्रमणिप्रकाशादिषूष्णशीतानुभवरूपस्पर्शाः प्रतीयन्ते, न हि तेजसि तावन्तः स्पर्शा अङ्गीक्रियन्ते, जले च हिमतप्तकुण्डादिषु, तथा सुवर्णे वर्णभेदाः, न हि सर्वे स्वाभाविकाः, तेजस्त्वादिस्वभावहानिप्रसङ्गात्, तथा ब्रह्मणोऽप्यवैशेष्यमङ्गीकर्तव्यम्, निर्विशेषं हि ब्रह्मेति सर्वप्रसिद्धिः। चकारादेवं साधकाः 'अग्राह्यो न हि गृह्यत' इत्येवमादयः।

भाष्यप्रकाशः।

साधनं दर्शनसूत्रादत्राधिकम्। तेन प्रकाशवत्सूत्रोक्तमेव दृढीकृतं ज्ञेयम् ॥ २४ ॥ इति सप्तमं तदव्यक्तमाह हीत्यधिकरणम् ॥ ७ ॥

प्रकाशादिवच्चावैशेष्यं प्रकाशश्च कर्मण्यभ्यासात् ॥२५॥ अधिकरणप्रयोजनमाहुः पुनरित्यादि। ब्रह्मणः श्रुत्येकसमधिगम्यत्वाच्छ्रुत्यवगतस्वरूपस्यैव बलेनोभयरूपत्वं दृढीकर्तुमधिकरणान्तरमुपोद्घातसङ्गत्यारभते। अत्र ब्रह्मस्वभावः संराधकप्रत्यक्षेणावधारयितुं शक्यः, न वेति संशयः। साधनस्य ज्ञानार्थत्वम्, अगृह्यश्रुत्या ब्रह्मणो दुर्ज्ञेयत्वं च सन्देहबीजम्। पूर्वपक्षौ तु तत्र द्वाविति तावाहुः तत्रेत्यादि। पूर्वपक्षद्वयमिति। भक्तप्रत्यक्षेण न निर्णय इत्येकः। श्रुत्यापि नेत्यपरः। स च द्वितीयसूत्रे फलितकथनेन स्फुटो भवतीति तथेत्यर्थः। कुतो वस्तुशक्त्यैवेत्यतो दृष्टान्तं व्याकुर्वन्ति यथेत्यादि। एतस्यैव विवरणं सूर्यचन्द्रेत्यादि। एवं साधका इति।

रश्मिः।

प्रामाणिकमेव प्रमेयबलाभावादिति तथा। भाष्ये। ध्रुवादीनामिति। 'स्वरूपं द्विविधं चैव सगुणं निर्गुणं तथे'ति गोपालतापिनीयादुभयाविरोधपश्यकानाम्। द्वितीयस्कन्धनवमाध्यायोक्तब्रह्मादिशब्देन। गोपालतापिनीयोक्तब्रह्मणश्च तादृशोभयधर्मवत्त्वानुमापकत्वम्। ब्रह्म तादृशोभयधर्मवत्। ध्रुवादीनां चक्षुर्विषयत्वात्। घटादिवत्। चक्षुर्विषयत्वाद्रूपघटत्वोभयधर्मवत्त्वम्। अव्यक्तमेवेति। व्यक्तयोगव्यवच्छेदक एवकारः। उभयेति। सर्वधर्मप्रतिपादकवाक्यानां धर्मनिषेधकवाक्यानां चार्थरूपम् ॥ २४ ॥ **इति सप्तमं तदव्यक्तमाह हीत्यधिकरणम् ॥ ७ ॥**

प्रकाशादिवच्चावैशेष्यं प्रकाशश्च कर्मण्यभ्यासात् ॥ २५ ॥ पूर्वोक्तमित्यादिभाष्यविवरणं उभयरूपत्वं दृढीकर्तुमिति। अत्र भाष्य एवकारोऽग्रिमसूत्रीयोभयव्यपदेशयोगव्यवच्छेदकः। उपोद्घातेति। प्रकृतं 'न स्थानतोपि परस्योभयलिङ्ग'मिति सूत्रादारभ्य यदुभयरूपत्वं तत्सिद्ध्यर्था चिन्ता पूर्वपक्षद्वयचिन्ता। सङ्गत्या। ताविति। पूर्वपक्षौ। वस्तुशक्त्यैवेति। वस्तुशक्त्या निर्दोषत्वरूपया। एवकारस्तु भक्तप्रत्यक्षं चक्षुस्तस्य सदोषत्वायोगस्य व्यवच्छेदकः। भाष्ये। अङ्गीति। अस्माभिरङ्गीक्रियन्ते। जले चेति। विचार्यमाणे। हिमकुण्डः प्रसिद्धः। तप्तकुण्डः

---

१ केवलं तद्बलेनेति मूले पाठः।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

ननूक्तं तस्य तथा साक्षात्कारात् तादृशश्रुतेश्च नैकविधत्वमङ्गीकर्तुं शक्यत इति । नैष दोषः । प्रकाशश्च कर्मणि । तपःप्रणिधानादिकर्मणि भगवतः प्रकाशः । तत्र यथा तेषां कामः, तथा प्रकटीभवति । चकाराद्प्रकाशान्यथाप्रकाशौ । तत्र हेतुः । अभ्यासादावृत्तेः । यद्येकवारं प्रकटः स्यात्, तदा तद्रूपत्वमङ्गीक्रियेतापि । प्रतिभक्तं प्रतिकर्म चाविर्भावः । अतः प्रकाशोपि कृत्रिम एव । दीपप्रकाशवत् । अन्यथा सर्वदा स्यात् । तस्मान्न भक्तप्रत्यक्षेण निर्णयः ॥ २५ ॥

अतोऽनन्तेन तथा हि लिङ्गम् ॥ २६ ॥

फलितमाह । अतः अभ्यासात् । अनन्तेन अनन्तरूपेण आविर्भावः । न ह्येकं वस्तु प्रतिक्षणमन्यादृशं भवति निमित्तभेदव्यतिरेकेण । क्वचित् भक्तकामश्च निमित्तत्वेन प्रतीयते । न हि निमित्तभेदेन जायमानं वस्तु भवति । किन्तु तथा सति लिङ्गं विग्रह एव भवति । युक्तश्चायमर्थः । 'यद्यद्धिया त उरुगाय

भाष्यप्रकाशः ।

निर्विशेषत्वसाधकाः । पूर्वस्मादयं भिन्न एकदेशीति ज्ञापयन्तः सूत्रशेषमवतारयन्ति ननूक्तमित्यादि । अनेन सूत्रेण प्रकाशवत्सूत्रोक्तमप्याक्षिप्तं ज्ञेयम् ॥ २५ ॥

अतोऽनन्तेन तथा हि लिङ्गम् ॥ २६ ॥ न हि निमित्तभेदेन जायमानं वस्तु भवतीति । अत्रावस्तुत्वे हेतुर्जायमानत्वमेव । तत्रापि हेतुः 'यद्यद्धिये'त्यत्र 'प्रयणस' इतिपदोक्तं करणम् । तथाच तेषां धर्माणां शरीरविशिष्टमुपक्रम्य पठितत्वाच्छरीरधर्मत्वं वा, तदभिव्यङ्ग्या-

रश्मिः ।

बदरीनाथे । आदिनानुभयस्पर्शवत्कुण्डः तेजस्तोतिबध्यस्पर्शवत्तेजः भास्वरशुक्लरूपवच्च । आदिना ज्ञानस्पर्शवज्जलं अभास्वरशुक्लरूपवच्च । **तस्य तथेति** । तस्याग्राह्यस्य तथाऽस्वाभाविकधर्मैः । **तादृशेति** । 'तद्धैनान्भूत्वावती'ति श्रुतेः । **तप इति** । आदिना भक्तिः । **प्रणिधानं** प्रयत्नः । **कर्मणीति** । कृत इति शेषः । **तेषामिति** । तपआदिकर्तॄणाम् । **अप्रकाशेति** । अकर्मणि अप्रकाशः । नृसिंहत्वादिनान्यथाप्रकाशः । **कृत्रिम इति** । जन्यत्वात् । स्वोक्तयुक्त्या **एवेति** । **भक्तप्रेति** । अस्वाभाविकधर्मविषयेण ॥ २५ ॥

अतोऽनन्तेन तथा हि लिङ्गम् ॥ २६ ॥ भाष्ये । फलितमिति । 'अग्राह्य' इति श्रुत्या तपः-प्रणिधानानि, कर्म तत्रत्य'कर्मणैव तु संसिद्धिमास्थिता जनकादय' इति श्रुत्या च फलितम् । प्रापणकरणम् । वक्ष्यन्ति च 'उभयव्यपदेशा'दिति सूत्रभाष्यप्रकाशे । **एवेति** । नतु निमित्तभेदः । एवकारो निमित्तभेदयोगव्यवच्छेदक इति । **करणमिति** । प्रणयस इत्यस्य कुरुष इत्यर्थात् । **तेषामिति** । सकर्मत्वादीनाम् । 'प्राणशरीर' इति शरीरविशिष्टमुपक्रम्य । **तदभीति** । शरीराभिव्यङ्ग्येत्यर्थः । **अपागादिति** । 'अपागादग्नेरग्नित्वं वाचारम्भणं विकारो नामधेयं त्रीणि रूपाणीत्येव सत्य'मिति श्रुतावपागादग्नेरग्नित्वमितिवत्कार्यत्वमेव । एवकारेण वस्तुत्वयोगो व्यवच्छिद्यते । **भाष्ये** । अग्राह्यश्रुतिप्रतिपादितस्यानन्तरूपेणाविर्भावः, तत्र सर्वकर्मत्वादयः 'अपागा'दिति श्रुतेरवस्तुभूता इत्युक्तम् । एवं पदद्वयं व्याख्याय, पदत्रयं व्याकुर्वन्ति स्म **किन्त्वित्यादिना** । सौत्रतथेत्यस्य तथा सतीत्यर्थः । **लिङ्गमित्यस्यार्थो** विग्रह इति । देह इत्यर्थः । 'अतएव चोपमे'तिसूत्रादेवकारो मण्डूकप्लुत्यानुवर्तत इत्येवेति । हीत्यस्यार्थमाहुः **युक्तश्चेति** । तेन पञ्चपदमिदं सूत्रमित्युक्तम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विभावयन्ति तत्तद्वपुः प्रणयसे सदनुग्रहाये'ति। अतः श्रुत्या प्रत्यक्षेण वा न तथा निर्णयः कर्तुं शक्यः। तस्मात् सर्वागोचरमेव ब्रह्मेत्येवं प्राप्तम् ॥ २६ ॥

उभयव्यपदेशात् त्वहिकुण्डलवत् ॥ २७ ॥

तुशब्दः पक्षं व्यावर्तयति। नैवं केवलयुक्त्या लोकदृष्टान्तेन निर्णयः शक्यते कर्तुम्। अन्यथेदं शास्त्रं व्यर्थमेव स्यात्। अत्र हि वेदादेव ब्रह्मस्वरूपज्ञानम्।

भाष्यप्रकाशः।

गन्तुकधर्मत्वं वा। तथा सति 'अपागादग्नेरग्नित्व'मितिवत् कार्यत्वमेव, न त्वनागन्तुकानारोपितत्वरूपं वस्तुत्वम्। अत्र 'यद्यद्धिये'ति स्मृत्युपन्यासेन प्रकाशवत्सूत्रोक्तोऽवैयर्थ्यादिति हेतुरपि सदनुग्रहार्थत्वेनान्यथासिद्ध इति ज्ञाप्यते। तस्मादिति। उक्तविधप्रत्यक्षबोधकश्रुतिभिर्भक्तप्रत्यक्षेण चानिर्णयात् ॥ २६ ॥

उभयव्यपदेशात् त्वहिकुण्डलवत् ॥ २७ ॥ सूत्रं व्याकुर्वन्ति तुशब्द इत्यादि, अन्यथेति। युक्त्या लोकदृष्टान्तेन च निर्णये इदं विचारशास्त्रं व्यर्थमेव स्यात्। अत्र हि दर्शनान्तरादयमेव विशेषो यद्वेदादेव ब्रह्मस्वरूपज्ञानं प्रमितिरूपम्, न लौकिकैः प्रमाणैस्तन्न्यायैर्वा। उपचारनिवृत्त्या श्रौततात्पर्यज्ञापनार्थमेवास्य शास्त्रस्य प्रवृत्तेः। तच्च जन्माद्यधिकरण एव 'शास्त्रयोनित्वा'दित्यनेन निर्णीतम्। अतो वेदमन्तरेण स्वरूपस्य तच्छक्तेश्चानवगमात् केन प्रकारेण स्वरूपशक्त्या

रश्मिः।

न तथेति। न 'अपि संराधन' सूत्रोक्त'मुभयवाक्यार्थरूप'मिति निर्णय इत्यर्थः। **प्रकृते**। **उक्तविधेति**। 'अपि संराधन'सूत्रोक्तविधप्रत्यक्षबोधिकाभिः श्रद्धाभक्तिज्ञानेत्यादिभिः। **भाष्ये**। **सर्वागोचरमेवेति**। सर्वैः प्रकारैः सत्यत्वादिभिरपि अगोचरमित्यर्थः। पूर्वपक्षयुक्त्यैवकारोऽवधारणे। अगोचरपदं नपुंसकमपि। न चाधोक्षजत्वापत्त्या नेदं पूर्वपक्षे युक्तमिति वाच्यम्। भाष्यमते इदमित्थतयाऽगोचरत्वम्। इदमेव श्रीभागवतमतेपि। अन्यथाधोक्षजत्वेन रूपेणाप्यधोक्षजं स्यादिति ॥ २६ ॥

उभयव्यपदेशात् त्वहिकुण्डलवत् ॥ २७ ॥ युक्त्यालोकेति। आलोकेति[1]। प्रकाशदृष्टान्तेन। **विचारेति**। मीमांसाशास्त्रम्। **व्यर्थमेवेति**। नहि लौकिकानां दृष्टान्तैरलौकिकं ब्रह्म प्रत्येष्यति। अधोक्षजत्वादित्येवकारः। **अत्र हीति**भाष्यं विवृण्वन्ति स्म **अत्र हीति**। **अयमेवेति**। सिद्धान्तावधारितः। **वेदादेवेति**। वेदवेदान्ताभ्याम्। वेदशब्दस्य वेदान्तेपि शक्तिः 'स्मृतेश्चे'तिसूत्रभाष्येस्ति। एवेत्यन्ययोगव्यवच्छेदकः। अन्यशास्त्राणां प्रत्यक्षादेर्दुर्बलत्वम्, किंपुनर्वेदे ब्रह्मण आर्षम्। वेदान्तेपि 'वेदान्तकृद्वेदविदेव चाह'मिति स्मृतेर्वेदमूलकत्वम्। **तन्न्यायैरिति**। लौकिकयुक्तिभिः। तन्मूलैरन्यैः सांख्यादिचतुःशास्त्रैश्च। **उपचारेति**। तादृशफलेन प्रवर्तकेनास्य शास्त्रस्य प्रवृत्तेरित्यन्वयः। किमर्थमिति चेत्, तत्राहुः **श्रौतेति**। श्रौते शक्तिलक्षणे। तात्पर्यं तु स्वानुपपत्तिद्वारा लक्षणाबीजम्। यद्येवं स्यात्तदा वेदे शक्तिलक्षणाभ्यामर्थावबोधे 'पश्यत्यचक्षुः स शृणोत्यकर्ण' इत्यादिषु लक्षणया निर्वाहे तात्पर्योच्छेदापत्तेः श्रौतानां पदानां स्वारसिकार्थत्यागापत्तेः। अतस्तत्र विरुद्धधर्माश्रयत्वे तात्पर्यवृत्तेर्ज्ञापनार्थमित्यर्थः। श्रौतपदस्वारसिकार्थो व्यर्थः सन् किञ्चिज्ज्ञापयति तात्पर्यवृत्तिरस्तीति। श्रुतित्वादेवकारः। श्रुतिज्ञापितं सर्वथादरणीयमिति। **तच्चेति**। विरुद्धधर्माश्रयत्वम्। **निर्णीतमिति**। शास्त्रे योनिः शास्त्रयोनिः शास्त्रोक्ताभिन्ननिमित्तोपादानत्वादित्येवमर्थान्निर्णीतम्। नन्वज्ञानमन्यथाज्ञानं च निवार्यत इत्यज्ञानादिनिवृत्त्यर्थमस्य शास्त्रस्य प्रवृत्तिः, नतु तात्पर्यवृत्तिज्ञापनार्थमिति

१. रश्मिकारा आलोकेति पदच्छेदं स्वीकुर्वन्ति।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

तत् कथं स्वरूपशक्त्या निर्णयः। ब्रह्म तूभयरूपम्। उभयव्यपदेशात्। उभयरूपेण निर्गुणत्वेनानन्तगुणत्वेन सर्वविरुद्धधर्मेण रूपेण व्यपदेशात्। तर्हि कथमेकं वस्त्वनेकधा भासते। तत्राह। अहिकुण्डलवत्। यथा सर्प ऋजुरनेकाकारः

भाष्यप्रकाशः।

निर्णय इत्यर्थः। एवं तुशब्दं व्याख्याय शेषं व्याकुर्वन्ति ब्रह्मेत्यादि। न केवलं स्वरूपशक्त्या निर्णीयते, किन्तु श्रुत्युपष्टम्भयेत्यतो हेतुं विवृण्वन्ति उभयेत्यादि। उभयोर्विरुद्धधर्मयोर्व्यपदेश उभयव्यपदेशस्तस्मात्। यत्रैवास्थूलादिवाक्ये निर्गुणत्वेन व्यपदिश्यते, तत्रैव 'आकाश ओतश्च प्रोतश्चे'ति कथनात् कार्यगुणजनकानन्तगुणवत्तापि बोध्यते। तथा, यत्र शारीरब्राह्मणे 'स एष नेति नेत्यात्मा, अगृह्यो न हि गृह्यत' इत्युच्यते, तत्रापि 'स वा अयमात्मा सर्वस्य वशी सर्वस्येशान' इत्यादिकं पूर्वमुच्यते। 'स वा एष महानज आत्मा अन्नादो वसुदान' इति चानन्तरम्। एवं श्वेताश्वतरेपि 'साक्षी चेता केवलो निर्गुणश्चे'त्युक्त्वा, 'एको वशी निष्क्रियाणां बहूनामेकं बीजं बहुधा यः करोती'त्यादि। तथा तत्रैव 'ततो यदुत्तरतरं तदरूपमनामय'मित्येतदग्रे, 'सर्वाननशिरोग्रीवः सर्वभूतगुहाशय' इति। एवं तैत्तिरीयेपि 'यदेकमव्यक्तमनन्तरूप'मिति, तथा 'विश्वतश्चक्षुरुत विश्वतोमुख' इत्यादि चोक्तम्। 'कृत्स्नः प्रज्ञानघन एवे'त्यस्यार्थस्तु प्रागेवोक्तः। तथा 'अथात आदेश' इत्यस्यापि। एतेष्वेवंविधेष्वन्येष्वपि उभयरूपेण व्यपदेशात्। तथाचास्थूलादिवाक्यस्य धर्मनिषेधमुखेनेव 'विश्वतश्चक्षु'रित्यादेर्धर्मविधिमुखेनापि ब्रह्मस्वरूपस्यैव निरूप्यतया धर्मविधिद्वारा तन्निषेधद्वारा च निरूपकाणां मध्ये एकस्योपजीव्यत्वमन्तरङ्गत्वम्, अन्यस्योपजीवकत्वं बहिरङ्गत्वमिति निर्णेतुमशक्यत्वेनोभयवाक्ययोस्तुल्यबलत्वादुभयरूपमेव ब्रह्मेत्यर्थः। दृष्टान्तमवतारयन्ति तर्हीत्यादि। यद्युभयलिङ्गं ब्रह्म, तदा संराधनसिद्धानां सर्वेषां तथैव प्रकाशेत, न तु कञ्चित् प्रति कथञ्चित्, अन्यं प्रत्यन्यथा, अत एकं वस्तु कथमनेकधा भासते, तत्र हेतुर्वक्तव्यः,

रश्मिः।

चेत्। न। तात्पर्यवृत्तिविषयस्य विरुद्धधर्माधारत्वस्य तेन प्रकारेणाज्ञानेऽज्ञानरूपत्वादन्यथाज्ञानरूपत्वाच्चाज्ञानान्यथाज्ञानयोरन्तर्भावात्। **तत्कथ**मिति भाष्यं विवृण्वन्ति स **अत** इति। **तच्छक्ते**रिति। वेदपदशक्तेः। **इत्यर्थ** इति। निर्णयशब्दान्तभाष्यार्थः। **स्वरूपे**ति। प्रमेयबलेन। उभयव्यपदेशश्रुत्युपष्टम्भेन। **हेतु**मिति। स्वरूपं न यथाश्रुतिप्रतिपाद्यं सङ्गतेः मूर्तामूर्तब्राह्मणवत्। स्वरूपं यथाश्रुतिप्रतिपाद्यं उभयव्यपदेशात् अहिकुण्डलवदित्यत्र सत्प्रतिपक्षत्वसाधके हेतुम्। **यत्रैवे**त्येवकारो विरुद्धधर्माधारत्वेन प्रतिपादनसूचक इत्युक्तम्। यत्रान्यत्र धर्मनिरूपणमन्यत्र निषेधस्तत्रारोपापवादसङ्गतिसन्देहोपीत्युक्तम्। **कार्ये**ति। 'आकाशशरीरं ब्रह्मे'तिश्रुतेः 'आकाशो वै नामरूपयोर्निर्वहिते'ति तथा। **बोध्यत** इति। व्यञ्जनया बोध्यते। **पूर्व**मिति। स्पष्टम्। **अनन्तर**मिति। 'स एष नेति नेत्यात्मे' त्यस्मा अनन्तरम्। **प्रागे**वेति। 'आह च तन्मात्र'मितिसूत्रभाष्यप्रकाशे 'दर्शयति'चेतिसूत्रभाष्यप्रकाशे च। एवकारश्च पश्चाद्योगव्यवच्छेदकः। **एवंविधे**ष्विति। 'अपाणिपादो जवनो ग्रहीते'त्यादिषु। **धर्मविधिमुखेने**ति। धर्मविधानं तत्कथनं तेनोपादेयेन। **एवे**ति। 'वेदैश्च सर्वैरहमेव वेद्य' इति श्रुतेरेवकारः। **एवे**ति। अवधारणं यथा भवति तथा। एकरूपत्वयोगव्यवच्छेदको वा। **तथैवे**ति। सर्वरूपवत्त्वेन, नत्वेकेन तत्तत्संराधकं

---

१. आरोपापवादरूपायाः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कुण्डलश्च भवति, तथा ब्रह्मस्वरूपं सर्वप्रकारं भक्तेच्छया तथा स्फुरति। कल्पनाशास्त्रे हीदं बाधकम्। अनेककल्पनागौरवं चेति। न तु केवलं श्रुत्येकसमधिगम्ये। न च शास्त्रवैफल्यम्। एवं साधनार्थत्वात्। अत्रैव हि सूरिव्यामोहादन्यशास्त्रोत्पत्तिः। अतः सर्वविरुद्धधर्माणामाश्रयो भगवान्। न हि प्रमाणश्रुतदृष्टे अनुपपत्तिरस्ति, यदर्थं युक्त्यपेक्षा। लोकेपि शरीरान्तःकरणादीनि परस्परविरुद्ध-

भाष्यप्रकाशः।

नो चेद्दर्शनस्याप्रामाण्यं वक्तव्यम्, ततश्च सर्वमेव शिथिलमिति शङ्कायां दृष्टान्तेन समाधिमाहेत्यर्थः। दृष्टान्तं व्याकुर्वन्ति यथेत्यादि। भवतीति। तथा सामर्थ्यस्य विद्यमानत्वात् स्वरूपतस्तथास्ति। इदमिति। एकस्यानेकधा भानम्। यद्यपि सर्पः कालभेदेन स्वेच्छया तथा तथा भवति, ब्रह्म त्वेकस्मिन्नेव काले संराधकभक्तेच्छयेति वैषम्यम्, तथापि संराधकस्य तादृशेच्छोत्पत्तौ तादृशतादृशफलदित्सैव प्रयोजिकेति न वैषम्यलेश इति बोध्यम्। नन्वेवं चेत् सिद्धमेवास्ति, तदा शास्त्रेणैवं साधनस्यापि किं प्रयोजनमित्यतः पूर्वोक्तमेव स्मारयन्ति अत्रैवेत्यादि। तथाच विरुद्धशास्त्रसम्भेदजन्यदोषवारणमेव प्रयोजनमित्यर्थः। प्रमाणश्रुतदृष्ट इति। पूर्वोक्तप्रमाणैः श्रुते, साधनसिद्धप्रमाणैर्दृष्टे। विरुद्धशास्त्रसम्भेदेन व्यामुग्धस्य समाधानाय व्यासपादैरत्र युक्तेरुक्तत्वादत्रापि युक्त्यन्तरमाहुः लोकेपीत्यादि। सूत्रोक्ते दृष्टान्ते ऋजुकुण्डलभावो नैककालावच्छेदेनेत्यत एतत्कथनम्। तथाच यथा शरीरादीनां विषयभेदेन तथात्वम्, एवं ब्रह्मणोपि भक्तभेदेन

रश्मिः।

प्रति प्रकटेन रूपवत्त्वेन। दर्शनस्येति। वेदशास्त्रस्य। ततः सर्वमेवेति। उक्तदर्शनात्सर्वं सर्वरूपवत्त्वसाधकमुभयव्यपदेशैकदेशरूपमङ्गम्। तादृशतादृशेति। एवकारो ज्ञानयोगव्यवच्छेदकः। जानातीच्छति यतत इति। इदं विद्वन्मण्डन उक्तम्। नचेति भाष्यं विवृण्वन्ति नन्वेवं चेदिति। फलदित्सैव प्रयोजिका चेत्। सिद्धमेवेत्येवं साधनार्थत्वादिति भाष्यार्थः। अत्रैवेति। तदा। शास्त्रेणैवमिति। शास्त्रेण फलदित्साविषयेण। एवं ब्रह्मण एकस्यानेकविधभानं विद्वन्मण्डनोक्तरीत्येच्छयैव सिद्धम्। एवेति। विद्वन्मण्डनोक्तात्रत्ययुक्त्यैवकारः। तथाच वेदशास्त्रवैफल्यमिति भावः। फलदित्सया मोचनान्नामरूपयोर्नामवैफल्यमुक्तम्। साधनस्यापीति। ब्रह्मस्वरूपे सर्वप्रकारे भक्तेच्छासाधनस्यापि। अपिना वेदशास्त्रम्। पूर्वोक्तमिति। जिज्ञासाधिकरण उक्तम्। एवं साधनार्थत्वादित्यन्तं पूर्वोक्तम्। एवकारोऽन्यस्यास्य योगव्यवच्छेदकः। एवं फलदित्साविषयत्वेन वेदशास्त्रस्य मोक्षसाधनार्थत्वादित्यादीति। अत्र फलदित्साविषये वेदशास्त्र एव अन्यशास्त्रयोगव्यवच्छेदकः। 'मुह्यन्ति यत्सूरय' इति वाक्यात्सूरिव्यामोहस्तस्मात्। अन्येति। उत्तरमीमांसाशास्त्रोत्पत्तिः। अत इति। 'उभयव्यपदेशा' दित्यादिमीमांसाशास्त्रात्। अन्यत्र पञ्चरात्रशास्त्रोत्पत्तिः। सांख्ययोगपशुपतिशास्त्रोत्पत्तिः। अस्य भाष्यस्य प्रघट्टकार्थमाहुः तथाचेति। विरुद्धेत्यादि। जिज्ञासाधिकरणे व्याख्यातानीमानि पदानि। विरुद्धं शास्त्रं सांख्यादि। अनुपबृंहकत्वात्। तत्र 'असङ्गोयं पुरुष इती' ति सूत्रान्निर्धर्मकोक्तेर्विरुद्धत्वम्। एतन्मिश्रणजन्यो दोष आरोपापवादेन व्याख्यानं तस्य विरुद्धधर्माश्रयत्वे मीमांसया वारणं एवेति। अस्थूलादिश्रुतेस्तत्रैव आकाशोतप्रोतश्रुतेर्विरुद्धधर्माधारत्वबोधिकायाः। पूर्वोक्तेति। अत्रैव पूर्वोक्तप्रमाणैः। अस्थूलादिवाक्याकाशोतप्रोतवाक्यैः। साधनेति। साधनं भक्तिस्तया सिद्धं प्रमाणं भक्तप्रत्यक्षं तेन बहुवचनात्प्रत्यक्षप्रेरकभगवता भक्तशब्दैश्च। अत्रेति। उत्तरमीमांसायाम्। अत्रापीति। विरुद्धधर्माश्रयत्वेपि। दृष्टान्तान्तरे प्रयोजनमाहुः सूत्रोक्ते इति। एतदिति। दृष्टान्तान्तरकथनम्। विषयभेदेनेति। यथा गोशरीरं पुत्रे दयां करोति, सिंहं मारयतीति पुत्रसिंहरूपविषयभेदः। तेन। मनोत्रैवं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यामारकत्वादीनि विषयभेदेनैकस्मिन्नपि क्षणे प्रतीयन्ते । तस्मात् सकलविरुद्धधर्मा भगवत्येव वर्तन्त इति न कापि श्रुतिरुपचरितार्थेति सिद्धम् ॥ २७ ॥

इति तृतीयाध्याये द्वितीयपादेऽष्टमं प्रकाशादिवच्चेत्यधिकरणम् ॥ ८ ॥

प्रकाशाश्रयवद्वा तेजस्त्वात् ॥ २८ ॥ (३. २. ९.)

धर्मस्वरूपविचारेण पूर्वोक्तपक्षद्वयं स्थापयितुमधिकरणारम्भः ।

ननु धर्मा नाम के, ब्रह्मणो भिन्नास्तत्कार्यरूपाः, आहोस्वित् ब्रह्मैवेति संशयः ।

तत्र लोके कार्यस्यैव पटरूपादेस्तद्धर्मत्वात् समवेतत्वात् तन्नित्यतायां प्रमा-

भाष्यप्रकाशः ।

तथात्वम् । एतेन 'तत्तद्वपुः प्रणयस' इत्यत्र प्रणयनं तच्चक्षुर्मनोविषये प्रापणमेव, न तु करणमिति बोधितम् । एतच्च 'श्रुतेस्तु शब्दमूलत्वात्' 'सर्वोपेता च तद्दर्शनात्' 'लोकवत्तु लीलाकैवल्य'मित्यादिषु यदुक्तम्, तस्यैवेह निगमनमिति न कोपि शङ्कालेशः । सिद्धमाहुः **तस्मादित्यादि** । एवञ्च शब्दबलविचारेण विरुद्धसर्वधर्माश्रयो ब्रह्मेति निर्णयः । श्रुत्युक्तयुक्त्या विचारे तु लौकिकधर्मशून्यमलौकिकसर्वधर्मयुक्तमिति निर्णयः । अर्थबलविचारे तु विरुद्धसर्वरूपमिति निर्णय इति बोधनार्थमत्र त्रेधा विचारितम् ॥ २७ ॥ **इत्यष्टमं प्रकाशादिवच्चेत्यधिकरणम् ॥ ८ ॥**

प्रकाशाश्रयवद्वा तेजस्त्वात् ॥ २८ ॥ अधिकरणप्रयोजनमाहुः **धर्मेत्यादि** । **पूर्वोक्तपक्षद्वयमिति** । पूर्वाधिकरणे निर्गुणमनन्तगुणपूर्णं च ब्रह्म सिद्धम् । तत्र ये गुणा धर्मास्तेषां स्वरूपविचारेण पूर्वोक्तपक्षद्वयम् । शब्दबलविचारसिद्धः 'प्रपञ्चविलक्षणविरुद्धसर्वधर्माधारं ब्रह्मे'त्येकः । अर्थबलविचारसिद्धः 'सर्वरूपं ब्रह्म तत्तत्फलदित्सया तत्तत्कार्यार्थं वा तं तं प्रति तथाविर्भवती'त्यपर इत्येतत्पक्षद्वयं स्थापयितुं तथेत्यर्थः । विषयसंशयावाहुः **नन्वित्यादि** । धर्मवत्त्वश्रवणमद्वितीयश्रुतिश्च सन्देहबीजम् । पूर्वपक्षमाहुः **तत्रेत्यादि** । ब्रह्मधर्माणां स्वरूपे विचारणीये लौकिकमेव प्रमाणमनुसर्तव्यम् । श्रुतौ तन्नित्यत्वस्यानुक्तत्वात् । तत्राप्यनुमानमेवाप्रत्यक्षत्वादादर्तव्यम् ।

रश्मिः ।

स्पष्टम् । 'यन्मनसा ध्यायति तद्वाचा वदति यद्वदति तत्करोती'ति श्रुतेः । **तथात्वमिति** । एकस्मिन्क्षणे प्रतीतिविषयत्वम् । प्रतीतिकर्तृत्वं वा । **प्रणयनमिति** । यत्तच्चक्षुर्मनोविषये स्थूलदेहे सृष्टे सूक्ष्मप्रापणं गोविन्दावेश इत्यर्थः । एवेति । 'तत्सृष्ट्वा तदेवानुप्राविश'दिति श्रुतेरेवकारः । पुनरुक्तिं वारयन्ति स्म **एतच्चेति** । **यदुक्तमिति** । द्वितीयाध्याये यदुक्तम् । **तस्यैवेहेति** । एवकारोऽन्ययोगव्यवच्छेदकः । इहास्मिन्सूत्रे निगमनं उभयव्यपदेशादिति हेतुघटितत्वात् । तस्मात्तथेति निगमनवत् । **तस्मादित्यादीति** । **उपचरितार्थेति** । गौणार्था ॥ २७ ॥ **इत्यष्टमं प्रकाशादिवच्चेत्यधिकरणम् ॥ ८ ॥**

प्रकाशाश्रयवद्वा तेजस्त्वात् ॥ २८ ॥ सर्वकल्पनेति । पूर्वपक्षिमतम् । एवकारो विरुद्धधर्मरूपान्ययोगव्यवच्छेदकः । **विरुद्धेति** । सिद्धान्तिमतम् । एवकारः सर्वकल्पनाराहित्यरूपान्ययोगव्यवच्छेदकः । **नन्वित्यादीति** । **ब्रह्मैवेत्ये**वकारो भिन्नरूपान्ययोगव्यवच्छेदकः । **लौकिकमेवेति** । एवकारेण श्रुतिप्रमाणयोगव्यवच्छेदः । अविनाशीतिश्रुतेरन्योर्थ इति । **कार्यस्यैवेति** ।

१. सर्वकल्पनारहितमेव ब्रह्म पश्चाद्धर्मयुक्तं भवतीत्येकः । विरुद्धधर्माधारमेव ब्रह्मैकं तत्तत्फलदित्सया तत्तत्कार्यार्थं वा तं तं प्रति तथा तथाविर्भवतीत्यपर इत्येतत्पक्षद्वयम्–इति मूले पाठः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

णाभावात् स्वाभाविकत्वमात्रेण नित्यत्वकल्पनायां गौरवापत्तेः 'एकमेवाद्वितीय'-मिति श्रुतिविरोधाच्च धर्माः प्रपञ्चवत् कार्याः, तथा सति ब्रह्म सर्वकल्पनारहित-मेव सेत्स्यतीत्येवं प्राप्ते, इदमुच्यते। प्रकाशाश्रयवद्वा। वाशब्दः पक्षं व्यावर्त-यति। यथा प्रकाशाश्रयाः सूर्यादयः प्रकाशेन न भिन्नाः। पृथक्स्थित्यभावात्। समवेतत्वाच्च। मूलाविच्छेदरूपेण तदाधारतया स्थितत्वाच्च। नापि सूर्य एव।

भाष्यप्रकाशः।

लोके च कार्यस्यैव पटरूपादेस्तद्धर्मत्वात् तत्समवेतत्वाच्च धर्मत्वलिङ्गके दृष्टान्ताभावेन, नित्यव-स्तुसमवेतत्वलिङ्गके चानुमाने आकाशत्वस्य दृष्टान्तस्य सत्त्वेपि शब्दादिदृष्टान्तेन हेतोः साधारणतया तन्नित्यतायां प्रमाणाभावात्। स्वाभाविकत्वं हेतूकृत्याकाशत्वं दृष्टान्तीकृत्य तन्मात्रेण साधने यद्यपि तत् सिध्यति, तथापि तत्कल्पनायां नित्यवस्त्वन्तरसिद्ध्या गौरवापत्तेरद्वितीयश्रु-तिविरोधाच्च गौरवस्याप्रामाणिकत्वात् तथेति। 'तदव्यक्तमाह ही'त्यनेनोक्त एव पक्ष आदरणीय इत्यर्थः। समाधिं व्याकुर्वते इदमित्यादि। प्रकाशाश्रयवदिति। प्रकाशस्याश्रयाः प्रकाशा-श्रयास्तैस्तुल्यम्। प्रथमार्थे वतिः। सूत्रं व्याकुर्वन्ति वाशब्द इत्यादि। पूर्वाधिकरणेऽहि-कुण्डलदृष्टान्तेनैकस्य ब्रह्मणः सधर्मकत्वनिर्धर्मकत्वसिद्ध्या धर्माणामपि ब्रह्मरूपत्वमेव सिद्धम्, अत्र तु धर्मधर्मिणोर्भेदाभेदः साध्यते। अन्यथैतत्सूत्रवैयर्थ्यमेव स्यात्। भिन्नाभिन्नत्वं कार्यकारण-भावेन पटतद्रूपयोर्धर्मधर्मिभावेन जातिव्यक्त्योर्दृष्टम्। तत्र वाशब्दः प्रथमं पक्षं व्यावर्तयति। ब्रह्मतद्धर्मौ कार्यकारणभावेनैकरूपौ न भवतः, किन्तु यथा प्रकाशाश्रयाः सूर्यादयः प्रकाशेन सह न भिन्नाः, न विनाभूताः, नित्यसहचारिण इति यावत्। तत्र हेतुः। पृथक्स्थित्यभावात्। एवं प्रकाशोपि न सूर्यादिविनाभूत इत्यर्थबलाज्ज्ञातव्यम्। तदेतत् 'समवेतत्वाच्चे'ति चकारेण समुच्चिन्वन्ति। तत्र हेतुः। समवेतत्वादिति। अयुतसिद्धत्वात्। तज्जन्यधर्मेष्वप्यस्तीति तथा-त्ववारणाय हेत्वन्तरमाहुः मूलाविच्छेदेति। सर्वेपि भगवद्धर्मा भगवदविनाभूता भगवदविभक्ता इत्यर्थः। अत्र यद्यपि पृथक्स्थित्यभावादित्यनेनैव तथात्वसिद्धावपि यद्धेतुद्वयमुक्तम्, तेन प्रपञ्च-स्याक्षरस्य च भिन्नाभिन्नत्वं निबन्धोक्तं स्मारितम्। एवमभेदे मानमुक्त्वा भेदे मानमाहुः नापी-त्यादि। प्रकाश इति शेषः। चकार आधाराधेयभावस्य 'परास्य शक्ति'रित्यादिषष्ठीनिर्देशस्य च

रश्मिः।

एवकारः कारणान्ययोगव्यवच्छेदकः। तद्धर्मत्वादिति। तन्तुमृदादिधर्मत्वात्। तावत्तन्तुकपालादि-समवेतत्वात्। यद्वा। धर्मा नित्याः धर्मत्वादित्यनुमाने दृष्टान्ताभावेन। धर्मा नित्याः नित्यवस्तुसमवेतत्वात् आकाशत्ववदित्यत्र। शब्दादीति। एकदेशिमतेन शब्दादि द्रष्टव्यम्। पक्षभिन्ननिश्चितसाध्यवत्त्वं दृष्टान्तत्वम्। तेन शब्दादिषु पक्षभिन्नेषु निश्चितसाध्यवत्सु। नित्यवस्तुसमवेतत्वरूपहेत्वभावः साध्य-व्यापकत्वसाधकः। तेनादिशब्दार्थवशे साध्याभाववति नित्यवस्तुसमवेतत्वरूपहेत्वभावात्साधारण्यं साध्या-भाववद्वृत्तित्वरूपम्। ननु नाकाशदृष्टान्तः निश्चितसाध्यवत्त्वाभावादिति चेन्न। न शब्दादिदृष्टान्ते हेतोः साधारणता, किन्तु शब्दशब्दस्मारिताकाशहेतोः साधारणता प्रसङ्गः पुरुष इति तथेत्यर्थात्। स्वाभा-विकत्वेति भाष्यं विवृण्वन्ति स्म स्वाभाविकत्वमिति। धर्मा नित्याः स्वाभाविकत्वात् आकाश-त्ववत्। नित्यवस्त्विवति। जातिसिद्ध्या। एतादृशत्वम्। भेदे इति सतिसप्तम्यन्तम्। भेदसामानाधिकरण्य एतादृशत्वं भिन्ननिष्ठम्। तथेत्यग्रेतनभाष्योक्तम्। अत्रैवकारः विरुद्धधर्माधारत्वकल्प-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

भिन्नप्रतीतेर्विद्यमानत्वाच्च । तादृशमेव तद्वस्तूत्पत्तिसिद्धमिति मन्तव्यम् । कल्पनायामपि यथा सूर्यप्रकाशयोः कल्पना, एवं ब्रह्मधर्मयोरपि । न ह्यन्यथा वेदप्रवृत्तिर्निषेधशेषता सत्यज्ञानानन्तानन्दपदानां सामानाधिकरण्यं वा सम्भवति । लक्षणायां तु सुतरामेव धर्मापेक्षा । अतो विशिष्टपदार्थ एव तादृशो वेद-

भाष्यप्रकाशः ।

समुच्चायकः । तेन सिद्धमाहुः तादृशमित्यादि । प्रकाशरूपं वस्तु मूलाद्भिन्नमप्यभिन्नमेवोत्पत्तिसिद्धमिति मन्तव्यम् । युक्तिभिरनुचिन्तनीयम् । यथा अमित्रो न मित्रम्, न मित्राभावः, किन्तु मित्रविरुद्धसम्पत् । यथा चाविद्या न विद्या, न विद्याभावः, किन्तु विद्याविरुद्धं भावरूपमज्ञानम्, एवं प्रकाशतदाश्रययोरभेदोपि न भेदः, न भेदाभावः, किन्तु भेदविरुद्धसम्पदेव भावरूप इति विभावनीयम् । सा च सम्पत्, भावरूपत्वे सति स्वाश्रयाविनाभूतत्वं तद्विहायावर्तमानत्वमिति यावत् । न ह्येतादृशत्वमन्योन्याभावरूपे भेदेस्तीति । तथाच कल्पनायामपि यथा सूर्यप्रकाशयोस्तादात्म्यरूपस्य भेदविरुद्धसम्पदोऽभेदस्य कल्पना, एवं ब्रह्मतद्धर्मयोरपि परबोधनाय कार्येत्यर्थः । नन्वत्र का वा उपपत्तिर्येन धर्माणां सदा सत्तामङ्गीकृत्य तादृशोऽभेदः कल्प्यत इत्यत आहुः न हीत्यादि । यदि हि स्वाभाविकधर्मसत्तामनुपगम्य सर्वविशेषशून्यमेव ब्रह्माङ्गीक्रियते, तदा केवलचिन्मात्रत्वेन प्रतिपिपादयिषितस्य ब्रह्मणः सकाशात् 'अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेद' इत्यादिना श्राविता चेतनधर्मरूपा वेदप्रवृत्तिर्न सम्भवेत् । 'अथात आदेश' इत्यत्र पराभिमता निषेधशेषतापि न सम्भवेत् । तस्या अपि विशेषत्वात् । 'सत्यं ज्ञानमनन्तं ब्रह्मे'ति स्वरूपलक्षणश्रुतौ 'विज्ञानमानन्दं ब्रह्मे'तिश्रुतौ चोक्तं सत्यादिपदानामेकवस्तुवाचकत्वमपि

रश्मिः ।

नायोगव्यवच्छेदकः । **अभिन्नमेवेति** । एवेत्यत्र तृतीयालुक् । अवधारणेनेत्यर्थः । नन्वभिन्नमेव भिन्नमिति कुतो न कल्प्यत इत्यत आहुः **नहीति** । अभेदे सिद्धं ब्रह्म विरुद्धधर्माश्रयमितिग्रहणात्पृथिवीवदित्यनुमानेन एतादृशत्वे खण्डब्रह्मवादापत्त्याऽखण्डब्रह्मवादो हीयेत । एतां पृथिवीमिव तं पश्यन्ति भक्ता जनाः । एषेवान्यस्तु पश्यति इति विगृह्यकार्ये तादृशं तत्त्वम् । 'त्यदादिषु दृशोऽनालोचने कञ्चे'तिसूत्रम् । पूर्वविग्रहास्तु सूत्रस्य सर्वतोमुखत्वाद्यथाकथञ्चिन्नेयाः । अनालोचनेऽविचारे इत्यर्थमादाय । नच वृत्तिविरोधः । श्यालस्वस्रोरित्यत्र 'पुमान् स्त्रिये'त्यस्य वृत्त्यनङ्गीकारात् । तथा मनोरमायां तादृशादयस्तु रूढिशब्दत्वादसतार्थावयवार्थेन व्युत्पाद्यन्ते । अतएवाज्ञानार्थो दृशेरिति सङ्गच्छत इति । न हि स्वमते केवलरूढिरस्ति । महाभाष्योक्तयोगेन रूढिशब्दत्वादिति मनोरमाविरोधः । नन्वस्तु विरोध इति चेत् । न । 'लोके शब्दार्थसम्बन्धो रूपं तेषां च यादृशम्, न विचारस्तत्र कार्य' इति निषेधात् । तर्हि रूढौ यः कोपि योगो न भवेदिति चेत् । न । 'लोकसिद्धं प्रस्तुत्य वैदिको बोध्यते यथा,' वैदिकबोधार्थं रूढौ यथाकथञ्चित् योगोप्यस्तु । आचार्योक्तत्वात् । मा भूच्च महाभाष्योक्तयोग इति रूढ्यभावात् । नच माध्वानां भेदे एतादृशत्वमस्तीति वाच्यम् । उभयव्यपदेशाधिकरणे चतुःसूत्रे आनन्दादिरूपोपि श्रुतिबलादानन्दगुणकोपीति सर्वत्र माहात्म्यमेवोच्यते भक्त्यर्थमित्यर्थात् । कल्पनायामिति भाष्यं विवृण्वन्ति स्म **तथाचेति** । वस्तुनस्तादृशत्वे विरुद्धधर्माश्रयत्वे उत्पत्तिसिद्धे सति । **तादृश** इति । तादात्म्यरूपः । **एवेति** । विरुद्धधर्माश्रयत्वरूपान्ययोगव्यवच्छेदकः । **निषेधेति** । मूर्तामूर्तस्य विवर्तत्वेन तथा । **तस्या** इति । निषेधशेषतायाः । विशेषत्वं विवर्तत्वं तस्मात् । सत्येत्यादिभाष्यं विवृण्वन्ति स्म **सत्यमित्यादिना** । **एकेति** । भिन्नप्रवृत्तिनिमित्तत्वे सत्येकार्थबोधकत्वं सामानाधिकरण्यम् । भाष्ये तस्यार्थः ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

भाष्यप्रकाशः ।

न सम्भवेत् । तेषां सत्यत्वादिविशिष्टवाचकत्वात्, सत्यत्वादीनां च धर्मत्वात् । नच सत्यादिपदानां लक्षकत्वमेव । असत्यजडसान्तदुःखव्यावृत्तमेकरूपमेव ब्रह्म लक्ष्यत इति न तेषां सामानाधिकरण्यभङ्ग इति वाच्यम् । लक्षणायां तु सुतरां धर्मापेक्षा । निर्धर्मकस्य क्वापि लक्ष्यत्वादर्शनात् । लक्षणायाः शक्यसम्बन्धरूपत्वेन ब्रह्मणि सत्यादिपदशक्यसम्बन्धलक्ष्यत्वयोर्धर्मयोरापाताच्च । किञ्च । लक्ष्यत्वे यत्किञ्चिच्छब्दवाच्यत्वमप्यर्थादेवायातम् । लक्ष्यत्वस्य वाच्यत्वव्याप्यत्वात् ।

यत्तु लक्ष्यत्वे सधर्मकत्वस्योपाधित्वान्न व्याप्तिरिति कश्चित् ।

तन्न । लक्ष्यत्वेनैव धर्मेण ब्रह्मणः सधर्मकत्वे सिद्धे सधर्मकत्वस्य साधनव्यापकतयोपाधितानिवृत्तौ व्याप्तेः सुस्थिरत्वात् । नच वाङ्निवृत्तिश्रुत्या अवाच्यत्वे ब्रह्मणः सिद्धे सधर्मकत्वस्य नोपाधितानिवृत्तिरिति वाच्यम् । तस्याः सामस्त्येन वदनासामर्थ्यपरत्वात् । अप्राप्येति प्रशब्देन तथावसायात् । अनाप्येत्युक्त्यापि तन्निवृत्तिसिद्धेः लक्षणया वाचः प्राप्त्यापि निवृत्त्यसिद्धेश्च ।

रश्मिः ।

विशिष्टेति । द्वितीयस्कन्धसुबोधिन्याम् । विशिष्टवाचकत्वम् । प्रस्थानरत्नाकरे तु व्यक्तिमात्रवाचकत्वमुक्तम् । भावार्थपादभाष्येण जातिमात्रवाचकत्वमुक्तप्रायम् । आकृतौ शक्तेः पूर्वमीमांसायामिति । शास्त्रद्वयभेदेन पक्षद्वयम् । व्यक्तिमात्रवाचकत्वपक्षस्तु सूक्ष्मग्रन्थाभिप्रायेण । 'नाहं वेदैर्न तपसा' 'भक्त्या त्वनन्यया' 'आचार्यवान्पुरुषो वेदे'ति 'महतामन्तःकरणं प्रमाण'मिति च । लक्षणायामिति भाष्यं विवरीतुमाहुः **नचेति** । **एवेति** । सविशेषत्वापत्त्या एवकारो वाच्यत्वयोगव्यवच्छेदकः । कुत इत्यत आहुः **असत्येति** । सत्यत्वमसत्यत्वाभावरूपमधिकरणात्मकं सदसत्त्वव्यावृत्तम् । एवं ज्ञानत्वमज्ञानत्वाभावरूपमधिकरणात्मकं सत् जडव्यावृत्तम् । एवमनन्तत्वं अनन्तत्वाभावाभावरूपमधिकरणात्मकं सत् सान्तव्यावृत्तम् । एवं आनन्दत्वमानन्दत्वाभावाभावरूपमधिकरणात्मकं सत् दुःखव्यावृत्तम् । प्रतिकूलवेदनीयं दुःखम्, अनुकूलवेदनीयं सुखम् । आनन्दः सुखम् । **एवेति** । अस्थूलादिश्रुतेरेवकारः । **लक्ष्यत** इति । सत्यत्वादीनां सत्यत्वाद्यभावाभावे लक्षणा । स्वाभावप्रतियोगित्वसम्बन्धः । तेन सम्बन्धेन सम्बद्धं क्रियते ज्ञानविषयीक्रियते । भाष्यं विवृण्वन्ति स्म **लक्षणाया**मिति । **लक्ष्यत्वेति** । लक्ष्यार्थत्वादर्शनात् । **सत्यादीति** । सधर्मकत्वापत्त्या सत्यादिपदशक्यः सत्यत्वादिविशिष्टः सत्यादिः तस्य सम्बन्धः स्वरूपात्मकः । लक्ष्यत्वं च उक्तसम्बन्धरूपलक्षणायोग्यं लक्ष्यं तस्य भावो लक्ष्यत्वम् । लक्षयितुं योग्यं लक्ष्यत्वम् । तयोरित्यर्थः । **यत्किञ्चिदिति** । लक्ष्यादिशब्दवाच्यत्वम् । **एवेति** । अवधारणेनागतम् । **लक्ष्यत्वस्येति** । यथा तीरं वाच्यं लक्ष्यत्वात्, एवं ब्रह्म सत्यादिशब्दवाच्यं लक्ष्यत्वात्, गङ्गातीरवत् । **वाच्यत्वेति** । वाच्यत्वन्यूनदेशवृत्तित्वात् । **लक्ष्यत्व** इति । हेतौ । **उपाधित्वादिति** । यत्र वाच्यत्वम्, तत्र सधर्मकत्वमिति साध्यव्यापकता । ब्रह्मणोपि यत्किञ्चिच्छब्दवाच्यत्वं लक्ष्यत्वेन सधर्मकत्वम् । यत्र लक्ष्यत्वम्, तत्र सधर्मकत्वमिति नास्ति । ब्रह्मणि लक्ष्यत्वातिरिक्तधर्माभाववति सधर्मकत्वाभावात् । साध्यव्यापकत्वे सति साधनाव्यापक उपाधिस्तत्त्वात् । **न व्याप्तिरिति** । यत्र यत्र लक्ष्यत्वम्, तत्र तत्र वाच्यत्वमिति व्याप्तिः सा न । **एवेति** । लक्ष्यत्वेतरधर्मयोगव्यवच्छेदकः । **साधनेति** । यत्र लक्ष्यत्वं तत्र सधर्मकत्वाभावाभावात्तथा । **नोपाधितेति** । वाच्यत्वाभाववति ब्रह्मणि लक्ष्यत्वेन सधर्मकत्वस्य सत्त्वात्साध्यव्यापकत्वाभावात्तथेत्यर्थः । यद्वा । श्रुतिबलेन लक्ष्यत्वेपि लक्ष्यस्यावाच्यत्वे सधर्मकत्वस्य लक्ष्यत्वरूपहेतुमति विरहान्नोपाधितानिवृत्तिः । **तस्या** इति । 'यतो वाच' इति श्रुतेः । ईक्षत्यधिकरणभाष्येण तथा । **अप्राप्येति** । श्रौतेन । **तन्निवृत्तीति** । वाङ्निवृत्तिसिद्धेः । **वाच** इति । ब्रह्म लक्ष्यमिति

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

सिद्ध इति मन्तव्यम् । तत्र हेतुः । तेजस्त्वात् । तेजःशब्दवाच्यत्वात् । बहुदू-

भाष्यप्रकाशः ।

सर्वथा अप्राप्तौ 'यतो वाच' इति यच्छ्रब्दस्यापि ब्रह्माप्राप्त्या तदज्ञाने कुतो निवर्तन्ते वाच इति ज्ञानानुदयेन वाक्यस्याबोधकताप्रसक्तेरनिरुक्तश्रुतिविरोधप्रसक्तेश्च । किञ्च । सत्यादिपदानां ब्रह्मणि शक्त्यभावे ब्रह्मातिरिक्तानां चासत्यजडादिरूपत्वात् तेष्वपि तच्छक्त्यभावे तेषां पदानामनर्थकत्वेन शक्यसम्बन्धरूपा लक्षणा नितरां सिध्येदिति स्वरूपलक्षणमप्यबोधकमेव स्यात् । ततश्च विचार-शास्त्रस्य मोक्षस्य च तिलाञ्जलिरेव दीयेत । अथ व्यावहारिकं सत्यज्ञानादिकं तेषां शक्यमिति तत्सम्बन्धस्य ब्रह्मणि भवनान्न कोपि दोष इति विभाव्यते । तदा तु तस्यैव धर्मत्वान्न ब्रह्मणो यावद्धर्मरहितत्वसिद्धिरिति लक्षणायां सुतरां धर्मापेक्षा । अतो धर्माणामावश्यकत्वादस्य शास्त्रस्य वेदानुरोधित्वात् वेदवाक्यानां च ब्रह्मबोधकतया सर्वेषां तुल्यबलत्वेन धर्मविशिष्ट एव पदार्थो (निर्धर्मको) विरुद्धधर्माश्रयो वेदसिद्ध इति मन्तव्यमित्यर्थः ।

धर्मधर्मिणोरभेदबोधकं रूपं वक्तुं हेतुं व्याकुर्वन्ति तेजःशब्दवाच्यत्वादिति । 'तद्देवा ज्योतिषां ज्योतिः', 'अथ यदतः परो दिवो ज्योतिर्दीप्यते,' 'भारूपः, तस्य भासा सर्वमिदं विभाति,' 'यदादित्यगतं तेज' इत्यादौ ब्रह्मतद्धर्मयोस्तेजोवाचकशब्दवाच्यत्वात् । तथाच प्रकाशकस्वभा-वत्वात् सूर्यतत्प्रकाशयोर्यथा भेदविरुद्धसम्पदभेदः, तथा ब्रह्मतद्धर्मयोरपि प्रकाशकत्वात्तथेत्यर्थः । ननु पूर्वसूत्रेण ब्रह्मण उभयरूपत्वे विरुद्धधर्माश्रयत्वे तं तं प्रति तथा प्रदर्शने च सिद्धे धर्माणां

रश्मिः ।

वाचःप्राप्त्यापि वाङ्निवृत्त्यसिद्धेश्च । **वाक्यस्येति** । अवधिघटितयत इतिवाक्यस्य 'मम माता वन्ध्ये'ति वाक्यवदनर्थकपदघटितत्वादबोधकताप्रसक्तेः । **अनिरुक्तेति** । 'एष ह्येवानन्दयाती'त्युक्त्वाग्रे पठ्यते 'यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयने अभयं प्रतिष्ठां विन्दते, अथ सोऽभयं गतो भवती'ति । न निरुक्ते अनिरुक्ते । अत्र निरुक्तत्वे प्राप्तेऽनिरुक्त इति प्रतिषेधसम्भवात्तथा । यद्यप्यभावज्ञानेन प्रतियोगिज्ञानं सर्वत्र कारणम् । 'अग्निचयनस्य न दिवी'ति श्रुत्या दिवि निषेधात्, तथापि विरुद्धधर्मा-श्रयप्रकरणादियमेवमुक्ता । **अथेति** । भिन्नप्रक्रमेऽनिरुक्ते प्रतिष्ठारूपभक्तिं विन्दते लभते । अथ स उपासको भिन्नमोक्षविषयं गतो भवतीत्यर्थात् । कस्माद्भिन्नमोक्षविषय इति चेत्, साधनविषयाद्भिन्न-विषयोऽधोक्षजः । पुष्टिमार्गीयम् । साधनविषयफलयोर्भेदादिति । तत्त्वायामीत्यत्राप्ययं बोध्यः संध्यायाम् । **अनर्थकत्वेनेति** । तथा शक्यार्थाभावेन शक्यसम्बन्धेत्यादिः । **अपीति** । अपिना कार्यलक्षणम् । उभयलक्षणयोरबोधकत्वादेवकारो बोधकत्वरूपान्ययोगव्यवच्छेदकः । **विचारेति** । उत्तरमीमांसा-शास्त्रस्य । **तिलाञ्जलिरेवेति** । विचारशास्त्रस्य मोक्षस्य च पदजन्यपदार्थोपस्थितिसाध्यत्वादेवकारः । **व्यावहारिकमिति** । ध्वंसप्रतियोगि । **शक्यमिति** । शक्यार्थवस्तु । **लक्षणायामित्यादिभाष्यार्थो-**नुवादपूर्वकमत इत्यादिभाष्यं विवृण्वन्ति स्म **तदा त्विति** । एवमनूद्य अत इत्यादिभाष्यं विवृण्वन्ति स्म **अत** इत्यादि । **एव पदार्थ** इति । धर्मविशिष्टः पदार्थ एवेत्यन्वयः । पदार्थैकदेशेनान्वयानुपपत्तेः । अयमुभयव्यपदेशसूत्रान्निर्धारणेनेत्यर्थक उक्तः । तादृशपदार्थमाहुः **निर्धर्मक** इति । तथाच श्रुतिः 'स्वरूपं द्विविधं चैव सगुणं निर्गुणं तथे'ति गोपालतापिनीयश्रुतेः । अत्र स्वरूपत्वावच्छेदकं सगुणत्वं निर्गुणत्वं चोक्तम् । **तेजोवाचकेति** । 'ज्योतिषां ज्योति'रिति, 'दिवो ज्योति'रिति, 'तस्य भासे'ति च प्रत्येकं षष्ठ्यवधिघटिताभ्यां तेजोवाचकशब्दाभ्यां वाच्यत्वात् । तथाच सूत्रे तेजःपदं तेजस्त्वेन शब्दार्थसाधारणमुक्तं तत्तेजोवाचकमतस्तेजःशब्दवाच्यत्वादयमर्थो भवति । उभयसमावेशात् । **तं त-**

१. अन्तिमावृत्तौ लोपितम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

रव्याप्त्यर्थमेव हेतुरुक्तः। आतपादेर्धर्मत्वेन धर्मित्वेन च प्रतीतेः। अपूर्ववदेव दृष्टत्वाच्छ्रुतत्वाच्च न धर्मेष्वपि युक्त्यपेक्षा। तस्मात् सिद्धं यथाश्रुतमेव ब्रह्मेति ॥ २८ ॥

भाष्यप्रकाशः।

ब्रह्मणा सह भिन्नाभिन्नत्वमात्रं साधनीयम्, तत्तु प्रकृतदृष्टान्तमात्रेणैव सिध्यतीति हेतूक्तेः किं प्रयोजनमित्याकाङ्क्षायां तत्प्रयोजनमाहुः बहुदूरेत्यादि। अवतारदशायां सृष्टिदशायां च ब्रह्मणो व्यापकत्वतिरोभावे धर्माणां स्वभावतो बहुदूरव्याप्त्यर्थमेव तद्व्यापकस्तेजस्स्वरूपो हेतुरुक्त इत्यर्थः। तेजसि तथात्वस्य दृष्टत्वादिति। तथाचोक्तं विष्णुपुराणे प्रथमांशसमाप्तौ 'एकदेशस्थितस्येन्दोर्ज्योत्स्ना विस्तारिणी यथा। परस्य ब्रह्मणः शक्तिस्तथेदमखिलं जगत्। तत्राप्यासन्नदूरत्वबहुत्वस्वल्पतामयः। ज्योत्स्नाभेदोऽस्ति तच्छक्तिस्तद्वन्मैत्रेय वर्तते' इति। एवमभेदबोधकं रूपं व्याख्याय प्रकाशाश्रयपदाभ्यां बोधितं भेदबोधकं रूपं व्याकुर्वन्ति आतपादेरित्यादि। आतपश्च तदादिश्च तयोः समाहार आतपादिः, तस्यातपादेः। तथाचात्रादिपदेन सूर्यादिः। तथाच आतपस्य प्रकाशस्य धर्मत्वेन सूर्यादेर्धर्मित्वेन च प्रतीतेर्यथा भेदः, तथा ब्रह्मतद्धर्मयोरपि। 'सत्यं ज्ञान'मिति स्वरूपलक्षणात् सच्चिदानन्दरूपेणाभेदः, धर्मेषु तत्तद्धर्मत्वेन रूपेण भेदः, ब्रह्मणि तदाश्रयत्वरूपेण भेद इति तयोस्तावविरुद्धावित्यर्थः। ननु प्रकाशतदाश्रययोस्तथात्वं प्रत्यक्षगम्यम्, ब्रह्मतद्धर्मयोस्तु न तथेति तत्र कथं तथात्वसम्प्रत्यय इत्यत आहुः अपूर्ववदित्यादि। एतेन 'दर्शनाच्चे'त्यत्र व्याख्यातं भक्तप्रत्यक्षम्, विष्णुपुराणस्था स्मृतिः, 'प्राणस्य प्राणं' 'नेह नानास्ती'त्यादयः श्रुतयश्च स्मारिताः। तथाचात्रापि प्रमाणद्वयप्रमितत्वान्न युक्त्यपेक्षेति युक्तिकथनमन्यप्रतिपत्त्यर्थमित्यर्थः। एवञ्च ब्रह्मधर्मा ब्रह्मणो भिन्नाभिन्नाः, प्रकाशकधर्मत्वात्, सूर्यादिप्रकाशवदित्यनुमानमपि प्रयोक्तुं शक्यम्। सिद्धं निगमयन्ति तस्मादित्यादि। एवञ्च ब्रह्मणः सच्चिदानन्दरूपेण सर्वेषां ब्रह्माभेदः। ब्रह्मणस्तु कार्यलक्षणेन सर्वस्माद्भेदः। जगतः कार्यत्वाच्चिदानन्दतिरोभावात् तयोः स्वल्पत्वाच्च भेदः। जीवे चानन्दतिरोभावादल्पत्वादंशत्वादिभ्यश्च भेदः। अक्षरे च गणितानन्दत्वादिभ्यो भेदः। जीवस्य तथात्वं तु जीवप्रकरणे द्वितीयाध्याये सिद्धम्। अक्षरस्य चादृश्यत्वाधिकरणे इति बोध्यम् ॥ २८ ॥

रश्मिः।

मिति। भक्तं भक्तम्। स्वल्पत्व इति। जीवपरत्वेन प्रतीतधर्माणां ब्रह्मपरत्वमत्र प्रतिपाद्यत इति। **एवेति**। 'अणोरणीयान्महतो महीया'निति श्रुतेरेवकारः। **तच्छक्तिरिति**। ब्रह्मशक्तिः। **ब्रह्मतद्धर्मयोरिति**। स्वज्ञानद्वारेति बोध्यम्। **ताविति**। भेदाभेदौ। भाष्योक्तं धर्मित्वमधस्तनांशस्य। **एतेनेति**। न पूर्वं पूर्वैर्प्युक्तं सगुणत्वं निर्गुणत्वं वा तत् अपूर्वं विरुद्धधर्माधिकरणत्वं तदस्यास्तीति तद्वत् भवति। कुतः। दृष्टत्वाद्भक्तैः श्रुतत्वाद्वेदान्तिभिः। पूर्वाधिकरणे विरुद्धधर्माधारत्वमुक्तम्, तेन स्मृतौ धर्मधर्म्यभेदाभेदौ, तेन पूर्वाधिकरणेनास्य प्रसङ्गसङ्गतिः प्रदर्शिता। अतो भेदेप्यभेदेन। **स्मारिता इति**। धर्मविषयेपि स्मारिताः। **प्रमाणेति**। श्रुतिप्रत्यक्षरूपं प्रमाणद्वयं तत्प्रमितत्वात्। **नेति**। धर्मिवद्धर्मेष्वपि नेति न धर्मेष्वित्यादिभाष्यार्थः। **निगमयन्तीति**। हेतुघटितत्वान्निगमनम्। तस्मात्तथेति निगमनवत्। **तस्मादित्यादीति**। **यथाश्रुतमेवेति**। पूर्वोपपादनादेवकारः निर्धारणेनेत्यर्थकः। यथाश्रुतं निर्धारणेन ब्रह्मेत्यर्थः ॥ २८ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

पूर्ववद्वा ॥ २९ ॥

एकदेशिमतेनापि सर्वसमाधानमाह । अथवा । 'अरूपवदेव ही'त्यादिपञ्चसूत्र्या यः सिद्धान्तः कथितः, तादृशं वा ब्रह्म प्रतिपत्तव्यम् ।

अयमाशयः । वेदस्थापनार्थं हि प्रवृत्तिः । तत्र यथा अक्षरमात्रस्यापि बाधो न भवति, तथा वक्तव्यम् । यदर्थमुभयरूपता अङ्गीकृता, तत्र धर्माणां

भाष्यप्रकाशः ।

पूर्ववद्वा ॥२९॥ सूत्रमवतारयन्ति व्याकुर्वन्ति च एकेत्यादि । अथवेत्यादि च । वाशब्दः पक्षान्तरे । पूर्ववत् । 'अरूपवदेव ही'ति पञ्चसूत्र्या यः सिद्धान्तः कथितः, प्रपञ्चविलक्षणं तत्समवायित्वेपि न तत्प्रकारकम्, नापि समवायिमात्रम्, किन्तु ततोप्यतिरिक्तं कृत्स्नं चिन्मात्रस्वरूपं यदा आविर्भवति, तदा व्यवहार्यं भवति । तत्र जडजीवधर्मा औपचारिका इत्येवंरूपः । तादृशं कारणरूपं ब्रह्म प्रतिपत्तव्यमित्यर्थः । एतन्मताभ्युपगमे बीजं व्युत्पादयन्ति अयमित्यादि । तथाच यत् पूर्वोपगमे बीजम्, तदेवात्रापीत्यर्थः । बीजमुक्त्वा पञ्चसूत्रीसिद्धस्य प्रकृते यथा विवक्षितत्वम्, तथोपपादयन्ति तत्र धर्माणामित्यादि । तस्मिन् पक्ष एकदेशिप्रतिपन्नमौपचारिकत्वं दूषयित्वा नित्यब्राह्मत्वेन स्थापितानां धर्माणां स्वरूपस्य वृत्तिमत्त्वस्य निर्वाहार्थं सविशेषनिर्विशेषभेदेन ब्रह्मवैलक्षण्यमङ्गीकर्तव्यम् । ततो वैलक्षण्येन भेदे सत्यद्वितीयत्वश्रुतिर्बाध्येत । तथाच तदभावायोत्पत्त्या विचारः कर्तव्यः । यो यथा यथा परिणमते, स तत्तद्वानपि पूर्वमव्यक्तः घटपटदध्यादिरूपेण परिणममाणमृत्तन्तुदुग्धादिवदिति । एवमुत्पत्त्या विचारे कारणभूतं निर्धर्मकमेव ब्रह्म सेत्स्यतीति पूर्वं तादृशमेव प्रतिपत्तव्यम् । ततश्च ब्रह्माहिकुण्डलवदुभयरूपम्, तद्धर्माः प्रकाशाश्रयवद्भिन्नाभिन्ना इत्युपपत्त्या विचारोपि कारणस्वरूपानुरोधेनैव कर्तव्यः । तत्र कथं कर्तव्य इत्याकाङ्क्षायां कारणविचारे श्रुतावेकविज्ञानेन सर्वविज्ञानस्य प्रतिज्ञातत्वाद्धर्माणामपि ब्रह्मरूपत्वं वक्तव्यम् । तदैव तदुपपद्यते, न तु धर्माणां नित्यभिन्नत्व आविद्यकत्वे वा । आद्ये भिन्नत्वेन, द्वितीये मिथ्यात्वेन च तत्प्रतिबन्धात् । नचाविद्यकत्वेप्यसत्यव्यावृत्तत्वेन सत्यरूपब्रह्मज्ञाने

रश्मिः ।

पूर्ववद्वा ॥ २९ ॥ तदेवेति । अन्ययोगव्यवच्छेदक एवकारः । **दूषयित्वेति** । 'तत्र धर्माणा'मित्यादिना दूषयित्वा । **सविशेषेति** । ब्रह्मस्वरूपस्य निर्विशेषे लक्ष्यत्वादिवृत्तिमत्त्वस्येति विवेकः । विपरीतं वा । **तथा सतीति** भाष्यं विवृण्वन्ति स्म **तत इति** । **बाध्येतेति** । **भिन्नस्य** द्वितीयत्वात्तथा । तथा चेति भाष्यं विवृण्वन्ति स्म **तथा चेति** । उत्पत्त्या विचारं घटयन्ति स्म **यो यथेति** । **परीति** । हैमधातुपाठे तु परस्मैपदी । **तत्तद्वान्** तत्तत्परिणामवान् । **त्विति** । अनृतं शुक्त्यादिवत् । आदिना गोमयादि । परिणामो वृश्चिकः । निर्धर्मकमेवेति निर्गुणब्रह्मवादिसम्मतत्वादेवकारः । **एवेति** पूर्ववत् । उपपत्त्येतिभाष्यं विवृण्वन्ति स्म **ततश्चेति** । **एवेति** । वृत्तिमत्त्वानुरोधव्यवच्छेदक एवकारः । विपरीतं तु न । भाष्यानुक्तत्वात् । तत्रेति भाष्यं विवरीतुं न चेत्यादिशङ्कोत्पादनार्थं पीठिकां कुर्वन्ति स्म **तत्र कथमित्यादिना** । **श्रुताविति** । 'उत तमादेशमप्राक्ष'मित्यादिछान्दोग्यश्रुतौ । **तदैवेति** । ब्रह्मरूपत्ववचनकाले । एवकारो धर्माणां नित्यभिन्नत्वाविद्यकत्वकालौ व्यवच्छिनत्ति । नान्यथेत्यंशं स्फोरयन्ति स्म **न तु धर्माणामिति** । **आविद्यकत्व इति** । रजतवदसत्त्वात् । **तत्प्रतीति** । एकविज्ञानेन सर्वविज्ञानप्रतिबन्धात् । भाष्यं विवरीतुमाशङ्कामाहुः **न चेति** ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

रव्याप्त्यर्थमेव हेतुरुक्तः। आतपादेर्धर्मत्वेन धर्मित्वेन च प्रतीतेः। अपूर्ववदेव दृष्टत्वाच्छ्रुतत्वाच न धर्मेष्वपि युक्त्यपेक्षा। तस्मात् सिद्धं यथाश्रुतमेव ब्रह्मेति ॥ २८ ॥

भाष्यप्रकाशः।

ब्रह्मणा सह भिन्नाभिन्नत्वमात्रं साधनीयम्, तत्तु प्रकृतदृष्टान्तमात्रेणैव सिध्यतीति हेतूक्तेः किं प्रयोजनमित्याकाङ्क्षायां तत्प्रयोजनमाहुः बहुदूरेत्यादि। अवतारदशायां सृष्टिदशायां च ब्रह्मणो व्यापकत्वतिरोभावे धर्माणां स्वभावतो बहुदूरव्याप्त्यर्थमेव तद्व्यापकस्तेजस्स्वरूपो हेतुरुक्त इत्यर्थः। तेजसि तथात्वस्य दृष्टत्वादिति। तथाचोक्तं विष्णुपुराणे प्रथमांशसमाप्तौ 'एकदेशस्थितस्येन्दोर्ज्योत्स्ना विस्तारिणी यथा। परस्य ब्रह्मणः शक्तिस्तथेदमखिलं जगत्। तत्राप्यासन्नदूरत्वबहुत्वस्वल्पतामयः। ज्योत्स्नाभेदोऽस्ति तच्छक्तिस्तद्वन्मैत्रेय वर्तते' इति। एवमभेदबोधकं रूपं व्याख्याय प्रकाशाश्रयपदाभ्यां बोधितं भेदबोधकं रूपं व्याकुर्वन्ति आतपादेरित्यादि। आतपश्च तदादिश्च तयोः समाहार आतपादिः, तस्यातपादेः। तथाचात्रादिपदेन सूर्यादिः। तथाच आतपस्य प्रकाशस्य धर्मत्वेन सूर्यादेर्धर्मित्वेन च प्रतीतेर्यथा भेदः, तथा ब्रह्मतद्धर्मयोरपि। 'सत्यं ज्ञान'मिति स्वरूपलक्षणात् सच्चिदानन्दरूपेणाभेदः, धर्मेषु तत्तद्धर्मत्वेन रूपेण भेदः, ब्रह्मणि तदाश्रयत्वरूपेण भेद इति तयोस्तावविरुद्धावित्यर्थः। ननु प्रकाशतदाश्रययोस्तथात्वं प्रत्यक्षगम्यम्, ब्रह्मतद्धर्मयोस्तु न तथेति तत्र कथं तथात्वसम्प्रत्यय इत्यत आहुः अपूर्ववदित्यादि। एतेन 'दर्शनाच्चे'त्यत्र व्याख्यातं भक्तप्रत्यक्षम्, विष्णुपुराणस्था स्मृतिः, 'प्राणस्य प्राणं' 'नेह नानास्ती'त्यादयः श्रुतयश्च स्मारिताः। तथाचात्रापि प्रमाणद्वयप्रमितत्वान्न युक्त्यपेक्षेति युक्तिकथनमन्यप्रतिपत्त्यर्थमित्यर्थः। एवञ्च ब्रह्मधर्मा ब्रह्मणो भिन्नाभिन्नाः, प्रकाशकधर्मत्वात्, सूर्यादिप्रकाशवदित्यनुमानमपि प्रयोक्तुं शक्यम्। सिद्धं निगमयन्ति तस्मादित्यादि। एवञ्च ब्रह्मणः सच्चिदानन्दरूपेण सर्वेषां ब्रह्माभेदः। ब्रह्मणस्तु कार्यलक्षणेन सर्वस्माद्भेदः। जगतः कार्यत्वाच्चिदानन्दतिरोभावात् तयोः स्वल्पत्वाच्च भेदः। जीवे चानन्दतिरोभावादल्पत्वादंशत्वादिभ्यश्च भेदः। अक्षरे च गणितानन्दत्वादिभ्यो भेदः। जीवस्य तथात्वं तु जीवप्रकरणे द्वितीयाध्याये सिद्धम्। अक्षरस्य चादृश्यत्वाधिकरणे इति बोध्यम् ॥ २८ ॥

रश्मिः।

मिति। भक्तं भक्तम्। स्वल्पत्व इति। जीवपरत्वेन प्रतीतधर्माणां ब्रह्मपरत्वमत्र प्रतिपाद्यत इति। एवेति। 'अणोरणीयान्महतो महीया'निति श्रुतेरेवकारः। तच्छक्तिरिति। ब्रह्मशक्तिः। **ब्रह्मतद्धर्मयोरिति**। स्वज्ञानद्वारेति बोध्यम्। ताविति। भेदाभेदौ। भाष्योक्तं धर्मित्वमधस्तनांशस्य। **एतेनेति**। न पूर्वं पूर्वेष्युक्तं सगुणत्वं निर्गुणत्वं वा तत् अपूर्वं विरुद्धधर्माधिकरणत्वं तदस्यास्तीति तद्वत् भवति। कुतः। दृष्टत्वाद्भक्तैः श्रुतत्वाद्वेदान्तिभिः। पूर्वाधिकरणे विरुद्धधर्माधारत्वमुक्तम्, तेन स्मृतौ धर्मधर्म्यभेदाभेदौ, तेन पूर्वाधिकरणेनास्य प्रसङ्गसङ्गतिः प्रदर्शिता। अतो भेदेप्यभेदेन। **स्मारिता इति**। धर्मविषयेपि स्मारिताः। **प्रमाणेति**। श्रुतिप्रत्यक्षरूपं प्रमाणद्वयं तत्प्रमितत्वात्। **नेति**। धर्मिवद्धर्मेष्वपि नेति न धर्मेष्वित्यादिभाष्यार्थः। **निगमयन्तीति**। हेतुघटितत्वान्निगमनम्। तस्मात्तथेति निगमनवत्। **तस्मादित्यादीति**। **यथाश्रुतमेवेति**। पूर्वोपपादनादेवकारः निर्धारणेनेत्यर्थकः। यथाश्रुतं निर्धारणेन ब्रह्मेत्यर्थः॥ २८ ॥

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

पूर्ववद्वा ॥ २९ ॥

एकदेशिमतेनापि सर्वसमाधानमाह । अथवा । 'अरूपवदेव ही'त्यादिपञ्च-सूत्र्या यः सिद्धान्तः कथितः, तादृशं वा ब्रह्म प्रतिपत्तव्यम् ।

अयमाशयः । वेदस्थापनार्थं हि प्रवृत्तिः । तत्र यथा अक्षरमात्रस्यापि बाधो न भवति, तथा वक्तव्यम् । यदर्थमुभयरूपता अङ्गीकृता, तत्र धर्माणां

भाष्यप्रकाशः ।

पूर्ववद्वा ॥२९॥ सूत्रमवतारयन्ति व्याकुर्वन्ति च एकेत्यादि । अथवेत्यादि च । वाश-ब्दः पक्षान्तरे । पूर्ववत् । 'अरूपवदेव ही'ति पञ्चसूत्र्या यः सिद्धान्तः कथितः, प्रपञ्चविलक्षणं तत्समवायित्वेपि न तत्प्रकारकम्, नापि समवायिमात्रम्, किन्तु ततोप्यतिरिक्तं कृत्स्नं चिन्मात्र-स्वरूपं यदा आविर्भवति, तदा व्यवहार्यं भवति । तत्र जडजीवधर्मा औपचारिका इत्येवंरूपः । तादृशं कारणरूपं ब्रह्म प्रतिपत्तव्यमित्यर्थः । एतन्मताभ्युपगमे बीजं व्युत्पादयन्ति अयमित्यादि । तथाच यत् पूर्वोपगमे बीजम्, तदेवात्रापीत्यर्थः । बीजमुक्त्वा पञ्चसूत्रीसिद्धस्य प्रकृते यथा विवक्षितत्वम्, तथोपपादयन्ति तत्र धर्माणामित्यादि । तस्मिन् पक्ष एकदेशिप्रतिपन्नमौप-चारिकत्वं दूषयित्वा नित्यब्राह्मत्वेन स्थापितानां धर्माणां स्वरूपस्य वृत्तिमत्त्वस्य निर्वाहार्थं सविशे-षनिर्विशेषभेदेन ब्रह्मवैलक्षण्यमङ्गीकर्तव्यम् । ततो वैलक्षण्येन भेदे सत्यद्वितीयत्वश्रुतिर्बाध्येत । तथाच तदभावायोत्पत्त्या विचारः कर्तव्यः । यो यथा यथा परिणमते, स तत्तद्वानपि पूर्वमव्यक्तः घटपटदध्यादिरूपेण परिणममाणमृत्तन्तुदुग्धादिवदिति । एवमुत्पत्त्या विचारे कारणभूतं निर्धर्म-कमेव ब्रह्म सेत्स्यतीति पूर्वं तादृशमेव प्रतिपत्तव्यम् । ततश्च ब्रह्माहिकुण्डलवदुभयरूपम्, तद्धर्माः प्रकाशाश्रयवद्भिन्नाभिन्ना इत्युपपत्त्या विचारोपि कारणस्वरूपानुरोधेनैव कर्तव्यः । तत्र कथं कर्तव्य इत्याकाङ्क्षायां कारणविचारे श्रुतावेकविज्ञानेन सर्वविज्ञानस्य प्रतिज्ञातत्वाद्धर्माणामपि ब्रह्म-रूपत्वं वक्तव्यम् । तदैव तदुपपद्यते, न तु धर्माणां नित्यभिन्नत्व आविद्यकत्वे वा । आद्ये भिन्न-त्वेन, द्वितीये मिथ्यात्वेन च तत्प्रतिबन्धात् । नचाविद्यकत्वेप्यसत्यव्यावृत्तत्वेन सत्यरूपब्रह्मज्ञाने

रश्मिः ।

पूर्ववद्वा ॥ २९ ॥ तदेवेति । अन्ययोगव्यवच्छेदक एवकारः । दूषयित्वेति । 'तत्र धर्माणा'मित्यादिना दूषयित्वा । सविशेषेति । ब्रह्मस्वरूपस्य निर्विशेषे लक्ष्यत्वादिवृत्तिमत्त्वस्येति विवेकः । विपरीतं वा । तथा सतीति भाष्यं विवृण्वन्ति स्म तत इति । बाध्येतेति । भिन्नस्य द्वितीयत्वात्तथा । तथा चेति भाष्यं विवृण्वन्ति स्म तथा चेति । उत्पत्त्या विचारं घटयन्ति स्म यो यथेति । परीति । हैमधातुपाठे तु परस्मैपदी । तत्तद्वान् तत्तत्परिणामवान् । त्विति । अनृतं शुक्त्यादिवत् । आदिना गोमयादि । परिणामो वृश्चिकः । निर्धर्मकमेवेति निर्गुणब्रह्मवादिसम्मतत्वा-देवकारः । एवेति पूर्ववत् । उपपत्त्येतिभाष्यं विवृण्वन्ति स्म ततश्चेति । एवेति । वृत्तिमत्त्वानुरोध-व्यवच्छेदक एवकारः । विपरीतं तु न । भाष्यानुक्तत्वात् । तत्रेति भाष्यं विवरीतुं न चेत्यादिशङ्को-त्पादनार्थं पीठिकां कुर्वन्ति स्म तत्र कथमित्यादिना । श्रुताविति । 'उत तमादेशमप्राक्ष्य'मित्यादि-छान्दोग्यश्रुतौ । तदैवेति । ब्रह्मरूपत्ववचनकाले । एवकारो धर्माणां नित्यभिन्नत्वाविद्यकत्वकालौ व्यवच्छिनत्ति । नान्यथेत्यंशं स्फोरयन्ति स्म न तु धर्माणामिति । आविद्यकत्व इति । रजतव-दसत्त्वात् । तत्प्रतीति । एकविज्ञानेन सर्वविज्ञानप्रतिबन्धात् । भाष्यं विवरीतुमाशङ्कामाहुः न चेति ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्वरूपनिर्वाहार्थमवश्यं ब्रह्मवैलक्षण्यमङ्गीकर्तव्यम्। तथा सति 'एकमेवाद्वितीय'-मिति बाधः प्रसज्येत। तथाचोत्पत्त्या विचारे निर्धर्मकमेव पूर्वं ब्रह्मेति प्रतिपत्तव्यम्। उपपत्त्यापि विचारः पूर्वानुरोधेनैव कर्तव्यः। तत्र धर्माणामपि ब्रह्मत्वे एकविज्ञानेन सर्वविज्ञानमुपपद्यते, नान्यथा। ततश्च प्रथमं ब्रह्म स्वधर्मरूपेण भवति। तदनु क्रियादिरूपेण प्रपञ्चरूपेण च। तावतैव सर्ववेदार्थसिद्धेः। नच लौकिकी युक्तिस्तत्रापेक्ष्यते, येन तादृशस्य कथं सर्वभाव इति पर्यनुयोगो भवेत्। धर्मकल्पनायामपि 'नैषा तर्केण मतिरापनेये'ति

भाष्यप्रकाशः।

एकविज्ञानेन सर्वविज्ञानं भवत्येवेति शङ्क्यम्। मृत्पिण्डादिदृष्टान्तोपरोधेन जायमानस्य तस्याप्रयोजकत्वात्। अतो धर्माणां ब्रह्मत्व एवैकविज्ञानेन सर्वविज्ञानोपपत्तिः, नान्यथा। तस्मात् ततश्चेत्याद्युक्तप्रकारेण धर्माणां ब्रह्मकार्यत्वात् ब्रह्मरूपत्वमङ्गीकर्तव्यम्। तावतैव सर्ववेदार्थाविरोधसिद्धेः। नच पूर्वमव्यक्तस्य पश्चात् व्यक्तत्वं लोके हेत्वन्तरसमवधानादेव दृष्टमितीतरासद्भावे निर्धर्मकस्य कथं धर्मरूपेण भवनमिति शङ्क्यम्। ब्रह्मणो वेदैकसमधिगम्यतया तत्र लौकिकयुक्त्यपेक्षाया अभावेन तादृशशङ्काया एव तत्र कर्तुमयुक्तत्वात्। तथाच पञ्चसूत्रीसिद्धस्थानेन प्रकारेण विवक्षितत्वमित्यर्थः। नन्वेवं सति लौकिकयुक्त्यनपेक्षत्वाच्छ्रौतत्वाच्चेदमेव मतमादर्तव्यम्, किं पूर्वेणेत्यत आहुः धर्मेत्यादि। धर्मकल्पनायामिति। विरुद्धधर्माश्रयत्वरूपधर्मकल्पनायाम्। तथाच द्वयोस्तौल्यात् तस्याप्यादरणमित्यर्थः। ननु द्वयोस्तौल्येप्ययं पक्षश्चेत् व्यासचरणैः पश्चाद्विचार्योक्तः, तदा न पूर्वत्र व्यासाशय इति शङ्कायां द्वयोः कथनस्य तात्पर्यमाहुः उत्पत्त्येत्यादि। उत्पत्त्या एतत्स्व-

रश्मिः।

असत्येति। सत्यत्वाभावाभावरूपेणासत्यव्यावृत्तत्वेन। भवत्येवेति। एकविज्ञानेन सर्वविज्ञानायोगव्यवच्छेदक एवेति। नीलं सरोजं भवत्येवेत्यत्रेव। मृत्पिण्डेति। आविद्यकमृत्पिण्डलोहनिकृन्तनदृष्टान्तोपरोधेन। तस्येति। एकविज्ञानेन सर्वविज्ञानस्य। अप्रयोजकत्वादिति। ब्रह्मज्ञानरूपविशेषदर्शने सर्वस्य प्रविलाप्यत्वात्सर्वविज्ञानानुत्पत्त्या तथा। विवृण्वन्ति स्म अत इति। मृत्पिण्डादिदृष्टान्तोपरोधेन जायमानस्य तस्याप्रयोजकत्वात्। ब्रह्मत्व एवेति। एवकारस्तु नित्यभिन्नाविद्यकत्वयोर्व्यवच्छेदकः। नान्यथेति व्याख्यातप्रायं पीठिकाग्रन्थे। ततश्चेति भाष्यं विवृण्वन्ति स्म तस्मात्ततश्चेति। तावतेति भाष्यं विवृण्वन्ति स्म तावतेति। लघुना। एवकारः सर्ववेदार्थाविरोधाय गुरुप्रकारव्यवच्छेदकः। एतावता येन तादृशस्येत्यादिभाष्यार्थ उक्तः। न च लौकिकी युक्तिस्तत्रापेक्ष्यत इति भाष्यार्थमाहुः ब्रह्मण इत्यादि। न चेत्यादि भवेदित्यन्तभाष्यस्य प्रघट्टकार्थमाहुः नचेत्यारभ्येत्यर्थ इत्यन्तेन। हेत्वन्तरेति। यथा वायोर्हेतुराकाशः हेत्वन्तरं व्यजनादि, तस्य समवधानात्। दृष्टत्वादेवकारः प्रणयति। तृतीयाया लुक्। अनेनेति। नच पूर्वमित्यादिनोक्तेन प्रकारेण। इदमेवेति। निर्गुणवादिसम्मतत्वादेवकारः। पूर्वेणेति। पूर्वाधिकरणोक्तेन विरुद्धधर्माश्रयत्वेन। द्वयोरिति पक्षयोः। अयमर्थः। 'श्रवणायापि बहुभिर्यो न लभ्यः शृण्वन्तोपि बहवो यं न विद्युः। आश्चर्यो वक्ता कुशलोस्य लब्धा आश्चर्यो ज्ञाता कुशलोनुशिष्टः। न नरेणावरप्रोक्त एष सुविज्ञेयो बहुधा चिन्त्यमानः। अनन्यप्रोक्ते गतिरन्यत्र नास्त्यणीयान्ह्यतर्क्यमणु प्रमाणात्। नैषा तर्केण मतिरापनेया प्रोक्तान्येनैव सुज्ञानाय प्रेष्ठ। यां त्वमापः सत्यधृतिर्बतासि। त्वादृङ्नो भूयान्नचिकेतः प्रष्टा। जानाम्यहं शेवधिरित्यनित्यं नह्यध्रुवैः प्राप्यते हि ध्रुवं तत्। ततो मया नाचिकेतश्चितोग्निरनित्यैर्द्रव्यैः प्राप्तवानस्मि नित्य'मित्यत्र सिद्धान्तपक्षैकदेशिपक्षयोरर्थे

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

समानम् । उत्पत्त्या चोपपत्त्या च विचारद्वयम् । उपपत्त्या पूर्वनयनं स्वसिद्धान्तः ।

भाष्यप्रकाशः ।

त्र्याख्योक्तप्रकारिकया उत्पत्त्या, पूर्वसूत्रव्याख्योक्तप्रकारिकया उपपत्त्या च अस्मिन्नधिकरणे विचारद्वयम् । तयोर्मध्य उपपत्त्या पूर्वनयनम् । मैत्रेयीब्राह्मणे 'स यथा सैन्धवघन' इत्यादिना चिन्मात्रत्वेन प्रतिपादितस्यैवात्मनः 'अविनाशी वा अरे अयमात्मा अनुच्छित्तिधर्मे'त्यनेन स्वरूपाविनाशधर्मानुच्छित्त्योः कथनेन स्वरूपधर्मयोर्नित्यत्वबोधनात् । 'सत्यं ज्ञानमनन्तं ब्रह्मे'ति स्वरूपलक्षणस्थे सत्यपदेपि 'सत्यस्य सत्य'मिति नामधेयतन्निर्वचनयोरनुरोधेन मूलसद्रूपत्वमूलत्यरूपत्वयोरपि बोधनात् । नृसिंहोत्तरतापनीये तुरीयनिरूपणे तुरीयस्य प्रपञ्चोपशमत्वमुक्त्वा, 'ईश्वरग्रासः स्वराट् स्वयमीश्वर' इति ईश्वरत्वश्रावणात् । तैत्तिरीये 'यदेकमव्यक्तमनन्तरूपं विश्वं पुराणं तमसः परस्ता'दिति प्रपञ्चात् परस्य कारणस्य एकत्वादिपञ्चधर्मवत्त्वश्रावणात्[1], द्वितीयस्कन्धे भगवता 'पश्चादह'मिति, तृतीयस्कन्धे मैत्रेयेण 'यथेदानीं तथाचाग्रे पश्चादप्येतदीदृश'मिति, विष्णुपुराणे प्रथमेंशे 'तदेतदक्षयं नित्यं जगन्मुनिवराखिलम् । आविर्भावतिरोभावजन्मनाशविकल्पव'दिति

रश्मिः ।

तौल्यात् । यथा विरुद्धधर्मकल्पनायां 'नैषा तर्केणे'ति श्रुतिः, तथास्मन्मतेपीति तौल्यात् । एकदेशिमतेऽरूपवत उत्पत्तिर्नैयायिकयुक्तिविरुद्धेति 'नैषा तर्केणे'ति श्रुतेर्विरुद्धधर्माश्रयत्व इव प्रवृत्तेः तस्यैकदेशिमतस्याप्यादरणम् । श्रुत्यर्थस्तु । बहुभिरन्याचार्यग्रन्थैरपि । **आश्चर्य** इति । आश्चर्ये सति वक्तेति वचनप्रयोजक आश्चर्य एव वक्ता आश्चर्यरसो वा ब्रह्मरूपः तत्र प्रविष्टः । अर्शआद्यजन्तो वा । अनुशिष्टः दत्तात्रेयवद्गुर्वनुशिष्टः । अवरः जगद्रूपः न सुविज्ञेयः, किन्तु भगवान् सुविज्ञेयः । जगत्तु तज्जलान्त्वेन । **अनन्येति** । अपृथग्दर्शनेनाचार्येण प्रोक्ते आत्मगतिरन्यत्र परब्रह्मणि नास्ति । यतोऽणीयान् 'अणुः पन्था विततः पुराणः' इति द्वितीयाध्याये चिन्तितम् । नहि अतर्क्यम् । 'अलौकिको हि वेदार्थो न युक्त्या प्रतिपद्यते । तपसा वेदयुक्त्या तु प्रसादात्परमात्मनः' इति श्रुतेर्नहि अतर्क्यम् । अणु ब्रह्म प्रमाणं प्रमाणप्रेरकत्वेन मुख्यत्वात् । **अन्येनेति** । आगमाभिज्ञेनाचार्येण गतिम् । **त्वादिति** । त्वत्सदृशः । **शं** कल्याणम् । सोः शेः । इतिहेतोः । **अध्रुवैः साधनैरिति** । **अयमिति** । विरुद्धधर्माश्रयपक्षः । **पश्चात्** एकदेशिमतात्पश्चात् । **पूर्वत्रेति** । एकदेशिमते । **उत्पत्त्येति** । विरुद्धधर्मोत्पत्त्या । **पूर्वसूत्रे** प्रकाशाश्रयवत्सूत्रे । **व्याख्योक्तेति** । कल्पनायामपीत्यादिव्याख्योक्तप्रकारिकया । उपपत्त्येतिभाष्यं विवृण्वन्ति स्म **तयोरिति** । **पूर्वनयनमिति** । पूर्वस्य पक्षस्य नयनम् । **एवेति** । अन्ययोगव्यवच्छेदकः । **कथनेनेति** । अनुच्छित्तिर्धर्मो यस्येति विग्रहे पुनरुक्तिरतो न उच्छित्तिर्नाशो येषां तेऽनुच्छित्तयः अनुच्छित्तयो धर्मा यस्येति विग्रहात्तथा । **स्वरूपेति** । स्वरूपं च धर्मश्च तयोः । एतदादयो हेतवः । **स्वसिद्धान्त** इति भाष्यविवरणस्य व्यासचरणानां सिद्धान्त इति ग्रन्थस्य । **सत्यपदेपीति** । अपिना मूर्तामूर्तब्राह्मणीय-'प्राणा वै सत्यं तेषामेष सत्य' मित्युक्तसत्यपदे । 'सत्यस्य सत्य' मिति ब्रह्मस्तुतौ । नामधेयं स्वरूपलक्षणस्थम्, निर्वचनं ब्रह्मस्तुतिरूपम् । यद्यपि नामधेयं त्रैकालिकाबाधविषयम्, तथापि विरुद्धधर्माधारत्वायाहुः **मूलेति** । मूलसद्रूपपदत्वं मूलत्यरूपपदत्वं तयोः । सन्मूर्तं त्यममूर्तं मूर्तामूर्तब्राह्मणे स्फुटं । **ईश्वरत्वेति** । श्रुत्यर्थस्तु प्रपञ्चस्योपशमो यत्रेति निर्धर्मकम् । पूर्वोक्तं प्राज्ञं ईश्वरं ग्रसतीतीश्वरग्रासः कर्मण्यण् । ओतत्वेनेश्वरग्रासत्वमनुज्ञातृत्वेन स्वराट्त्वमनुज्ञात्वेन स्वयमीश्वरत्वमिति सधर्मकम् । **अनन्तरूपमिति** । व्यक्तम् । श्रुतीरुक्त्वोपबृंहणमाहुः **द्वितीयस्कन्ध** इति । **भगवदिति** । आदिनैकरूपत्वाक्षयत्वाविर्भावतिरोभा-

१. आदर्शेषु एतत्त्वादिपञ्चधर्मेति पाठः, काशीपुस्तके प्रपञ्चधर्मेति पाठः, मूलपुस्तके इदं नास्ति, अतोपेक्षितपाठो रक्षितः । मूलेऽभावादस्मौ न विवृत इति ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

एकदेशिनस्तद्विपरीतम् । उभयमपि सूत्रकारस्य संमतमिति ॥ २९ ॥

प्रतिषेधाच्च ॥ ३० ॥

एकदेशिमते उपपत्त्यन्तरमाह । 'एकमेवे'त्युक्त्वा पुनः 'अद्वितीय'मिति

भाष्यप्रकाशः ।

पराशरेण च भगवद्रूपत्वादिनैव तदुपबृंहणाच्च विरुद्धधर्माधारत्वलौकिकयुक्त्यगम्यत्वविदिताविदित-परत्वानिरुक्तत्वरूपाणां श्रुत्युक्तयुक्तीनां अनन्तगुणपूर्णत्वपक्षेपि तुल्यत्वात् युक्त्या कारणरूपस्यैवम-विरोधानुकूल्यप्रापणं व्यासचरणानां सिद्धान्तः । द्वितीयस्कन्धे 'नास्य कर्माणि जन्मादौ परस्या-नुविधीयत' इति मुख्याधिकारिणामर्थे जन्मकर्मनिषेधकथनेन सदैकरूपत्वबोधनात् । एकदेशि-नस्तु पूर्वोक्तरीत्या कालभेदेनाविरोधप्रापणमिति व्यासोक्तपक्षाद्विपरीतम् । तस्य पक्षस्य द्वितीय-स्कन्ध एव 'इत्थं भावेन कथितो भगवान् भगवत्तमः । नेत्थं भावेन हि परं द्रष्टुमर्हन्ति सूरय'इति मध्यमाधिकारिपरतयोक्तत्वेन इतो न्यूनत्वात् । एतावान् परं विशेषः, यत्पुराणे माया-द्वारकं कर्तृत्वादि, श्रौते मते तु तन्नेत्येकदेशिमतं तत उत्तमम् । तथापि 'अनुच्छित्तिधर्मे'त्यादि-श्रुतीनां 'पश्चादह'मित्याद्युपबृंहणानां चाञ्जस्याभावेन न तथोपपन्नम् । एवमपि सत्येकविज्ञानेन सर्वविज्ञानप्रतिज्ञायाः कर्तृत्वादिश्रुतीनां च नासामञ्जस्यमित्यल्पदोषदुष्टत्वेन सूत्रकारादृतम् । अत उभयमपि सूत्रकारस्य संमतमित्यर्थः ॥ २९ ॥

प्रतिषेधाच्च ॥ ३० ॥ सूत्रमवतारयन्ति एकदेशीत्यादि । भगवन्माहात्म्यबोधकत्वेपि किञ्चिद्दोषादनादरो मा भूदित्यत एकदेशिमते उपपत्त्यन्तरमाहेत्यर्थः । व्याकुर्वन्ति एकमेवे-

रश्मिः ।

वजन्मनाशविकल्पवत्त्वानि । अत्र उपपत्त्यापि विचारः पूर्वानुरोधेनैव कर्तव्य इति भाष्यानुरोधात्पूर्वानय-नमाहुः **विरुद्धधर्मे**त्यादि । विरुद्धधर्माधारत्वं उभयव्यपदेशसूत्रस्थात् 'सकलविरुद्धधर्मा भगवत्येव व-र्तन्त' इति भाष्यात् । लौकिकयुक्त्यगम्यत्वं 'तादृशमेव तद्वस्तूत्पत्तिसिद्ध'मिति भाष्यात् 'न धर्मेष्वपि युक्त्य-पेक्षे'ति भाष्याच्च । **विदिते**त्यादि । विदितं वर्तमानं अविदितं भूतं भविष्यच्च तयोः परत्वम् । 'अन्य-देव तद्विदितादथोऽविदितादधी'ति श्रुतेः । अनिरुक्तत्वं तैत्तिरीये । अभिधेयानामित्युक्ते एकदेशिमतवा-दकवलितता स्यादत आहुः **श्रुत्युक्तयुक्तीना**मिति । विरुद्धधर्माधारत्वं नित्यं न भवेन्नित्यानित्यसंयोग-भिया श्रुत्यभिधेयं न भवेत् । लौकिकयुक्त्यगम्यत्वं नित्यं न भवेत्, श्रुत्यभिधेयं न भवेत् । 'आसीनो दूरं व्रजति शयानो याति सर्वतः' । 'अपाणिपादो जवनो ग्रहीते'ति श्रुत्यभिधेयं नित्यानित्यसंयोगभिया न भवेत् । विदिताविदितपरत्वं नित्यं न भवेत् । नित्यानित्यसंयोगभिया श्रुतिरभिधेयं न वदेत् । अनि-रुक्तत्वं नित्यं न भवेत् । नित्यानित्यसंयोगभिया श्रुत्यभिधेयं न भवेदित्येवं युक्तीनाम् । **नास्येति** । अस्य परस्य आदौ कर्माणि जन्म नानुविधीयते इति । **मुख्याधिकारिणा**मिति । एकदेशिन इति भाष्यं विवृण्वन्ति स **एकदेशिन** इति । **पूर्वोक्ते**ति । अत्रैव पूर्वोक्तरीत्या सृष्टिकालस्य भेदेन । सिद्धान्ते तु सृष्टिकालात्पूर्वकालेपि धर्माः । **मायाद्वारक**मिति । 'बुभूषुरुपाददे' इति वाक्यात् । **तत** इति । पुराणमतात् । **आञ्जस्ये**ति । सिद्धान्तरीत्या नयनाभावेन । स्वार्थे ष्यञ् । **न तथे**ति । सिद्धान्तत्वेन नोपपन्नम् । **अल्पदोषे**ति । अपसिद्धान्तत्वदोषदुष्टत्वेन । सूत्रकारादृतं अत इति पदच्छेदः ॥ २९ ॥

प्रतिषेधाच्च ॥ ३० ॥ किञ्चिदिति । अपसिद्धान्तत्वदोषात् । **प्रती**ति । धर्मप्रतिषेधयुक्ता

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

द्वितीयं प्रतिषेधति । स एवकारेणैव सिद्धो व्यर्थः सन् धर्मनिषेधमपि सूचयति । 'ऐक्षते'ति वचनात् तदुत्पत्तिः । चकारादेकविज्ञानेन सर्वविज्ञानोपक्रमः परिगृहीतः । तस्मान्न ब्रह्मणि कश्चिद्विरोध इति सिद्धम् ॥ ३० ॥

इति तृतीयाध्याये द्वितीयपादे नवमं प्रकाशाश्रयवद्धेत्यधिकरणम् ॥ ९ ॥

भाष्यप्रकाशः ।

त्यादि । स इति । द्वितीयनिषेधः । नन्वनुच्छित्तिधर्मेत्यादिना तन्नित्यत्वे कुतो निषेध इत्यत आहुः ऐक्षतेत्यादि । तथाचोक्तश्रुत्यनुरोधेन धर्मनित्यताबोधकश्रुतिरनुच्छित्तिधर्मो यस्येतिसमासेनाविनाशिपदव्याख्यानपरतया नेयेत्यर्थः । स्फुटमन्यत् ।

नचैकदेशिमतस्य युक्त्यन्तरेणोपष्टम्भात् पूर्वमततुल्यत्वमस्य सूत्रकाराभिप्रेतमिति शङ्क्यम् । प्रतिषेधश्रुतेर्द्वित्वसंख्यापूरकनिषेधपरतायाः प्रागुपपादितत्वेन, 'सूर्य एकाकी चरती'तिश्रुतौ सपरिकरे एव सूर्ये एकाकित्ववत् 'गेहे देवदत्त एवास्ति, न द्वितीय' इति लौकिकप्रयोगे करचरणादियुक्तदेवदत्ताद्वितीयत्ववचापि निषेधगतेः शक्यवचनत्वेन, अनुच्छित्तिधर्मपदस्याविनाशिपदव्याख्यानताया अपि मानान्तरविरहादगतिकगतित्वेन च तस्य शैथिल्यात् । अत एकविज्ञानेन सर्वविज्ञानप्रतिज्ञानुरोध एवैतत्संग्रहे बीजम् । एतस्योपष्टम्भकं च नैतस्मादन्यदिति बोधनायैवैतद्युक्तिकथनमिति बोध्यम् । तस्मान्न कोपि शङ्कालेशः ।

(ननु मतद्वयस्यापि सूत्रकारसम्मतत्वे स्वसिद्धान्त इति भाष्यस्थस्य स्वशब्दस्य सूत्रकारपरत्वेन व्याख्यानमनुचितम् । एकदेशिपदे च व्यासैकदेशित्वव्याख्यानमपि तथा । व्यासैस्तन्नामानुल्लेखादिति चेत् ।

मैवम् । एकदेशिपदेत्र व्यासस्यैवैकदेशी ग्राह्यः । अन्यथाम्बुवत्सूत्रेण 'अत एवे'तिसूत्रसिद्धं दृष्टान्तं न दूषयेत् । वृद्धिह्रासादिसूत्रद्वये युक्त्यन्तरं च न वदेत् । एकदेशिनामानुल्लेखस्तु जैमिन्यादिवदप्रसिद्धत्वात् । 'जीवमुख्यप्राणलिङ्गा'दित्यादिपूर्वपक्षिनामवत् । अस्मिन् सूत्रे जघन्यानामर्थेऽस्य सङ्ग्राह्यत्वाद्वा । अथवा । जीवप्रसङ्गे 'अवस्थितेरिति काशकृत्स्न' इति काशकृत्स्नेन जीवस्य ब्रह्मावस्थाविशेषत्वेनाङ्गीकारात् तस्य न्यायस्यापि तुल्यत्वात् स एवैकदेशी ग्राह्यः । अत एव द्वितीयस्कन्धपञ्चमाध्याये सृष्टिप्रकरणे 'सत्त्वं रजस्तम' इत्यस्य सुबोधिन्यां 'काशकृत्स्नमतमत्र सिद्धं भविष्यती'त्याचार्यैरपि तथाङ्गीकारः कृत उत्पत्त्या विमर्शविचारे इति नात्र शङ्कालेशः । एवमेकदेशिनि निश्चिते स्वशब्दो व्यासपर एव युक्त इत्यत्राप्यदोषः । नचास्य पश्चात् कथनेनास्यैव मुख्यत्वमिति शङ्क्यम् । द्वितीयस्कन्धे 'इत्थंभावेन कथितो भगवान् भगवत्तमः । नेत्थं भावेन हि परं द्रष्टुमर्हन्ति सूरय' इत्यादिभिरेतदमुख्यतायाः शुकवाक्ये व्यासचरणैरेवोक्तत्वात् । एतस्य

रश्मिः ।

श्रुतिरद्वितीयमितिश्रुतिस्तस्याः । **द्वित्वेति** । द्वितीयमित्यत्र पूरणार्थकप्रत्यय इति भावः । **प्रागिति** । **सपरीति** । चरणादिः परिकरः । श्रौतत्वादेवकारः । **एवेति** । अन्ययोगव्यवच्छेदकः । **निषेधगतेरिति** । अद्वितीयश्रुत्युक्तायाः । **तस्येति** । एकदेशिमतस्य । **एवेति** । अन्ययोगव्यवच्छेदकः । **एतत्संग्रहे** एकदेशिमतसंग्रहे । **एतस्मादिति** । प्रतिषेधसूत्रा[1]दित्यर्थः । एवकारोऽन्ययोगव्यवच्छेदकः । (ए)**तद्युक्तीति** । एकदेशिमतयुक्तिकथनमनेन सूत्रेणेत्यर्थः । **शङ्केति** । एकदेशिमतोपपत्त्यनावश्यकत्वशङ्का तस्या लेशः ।

---

१. अधिकरणादित्यर्थः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भाष्यप्रकाशः।

सम्मतत्वं तु जघन्याधिकारिणामर्थे एतस्यैव सुबोधत्वेनोपयोगात्। अत एवेदं मतं पूर्वमुक्तम्। यथा द्वितीयस्कन्धे राजार्थम्। किञ्च, भाववृत्तसूक्ते 'नासदासी'दित्यादिभिः सृष्टिं पूर्वमुक्त्वा, समाप्तौ 'इयं विसृष्टिर्यत आबभूव यदि वा दधे यदि वा न योऽस्या अध्यक्षः परमे व्योमन् सोऽङ्ग वेद यदि वा न वेदे'ति सृष्ट्याधानानाधानात्मकं पक्षद्वयमुक्त्वा तस्य ज्ञानाज्ञाने आह। तेन विसृष्टिं कदाचिदाधत्ते, कदाचित् स्वतःसिद्धामेव प्रकटयति। अथवा सामान्यां करोति। लीलासृष्टिं तु स्वतःसिद्धामेवाविष्करोतीति ज्ञानाज्ञाने उभये अपि युक्ते। एतज्ज्ञापनाय सन्देहवचनम्। अन्यथा वेदस्य ब्रह्मणश्च सन्देहाभावादेवं न वदेत्। अतो लीलासृष्टिमनुसन्धाय व्यासः स्वमतं वक्ति। एकदेशिनस्तु तन्न जानन्तीति ब्रह्मणो निर्विशेषादुत्पत्तिं वदन्ति। तस्मादुपपत्तिपक्ष एव व्यासाशयगोचरः, इतर इतरस्येति दिक्।)

शङ्कराचार्यास्तु। 'न स्थानतोपी'त्यारभ्यैकादशसूत्रमेकमधिकरणं कल्पयन्ति। 'प्रकृतैतावत्त्वे'त्यारभ्य नवसूत्रमपरम्।

तत्र प्रथमे, सुषुप्तादिषूपाध्युपशमाज्जीवो यत् सम्पद्यते तत् ब्रह्म। 'सर्वकर्मे'त्यादिभिः सविशेषत्वश्रावणादस्थूलमित्यादिभिर्निर्विशेषत्वश्रावणाच्च किमुभयलिङ्गं ब्रह्म प्रतिपत्तव्यम्, उतान्यतरलिङ्गम्। यद्यन्यतरलिङ्गम्, तदापि किं सविशेषम्, उत निर्विशेषमिति सन्देहे, उभयलिङ्गश्रुत्यनुग्रहादुभयलिङ्गं ब्रह्मेति प्राप्ते, अभिधीयते। न स्थानत इत्यादि। परस्य ब्रह्मण उभयचिह्नत्वं स्वत उपाधितश्च न। कुतः। सर्वत्र हि। ब्रह्मस्वरूपप्रतिपादनपरेषु 'अशब्दमस्पर्शमरूपमव्यय'मित्यादिषु निर्विशेषस्यैवोपदेशादिति। 'न भेदा'दिति द्वितीये च प्रतिविद्यं ब्रह्मण आकारभेदश्रावणान्निर्विशेषाङ्गीकारे च तस्य शास्त्रस्य निर्विषयत्वापत्तेरौपाधिक आकार आदर्तव्य इत्याशङ्क्य, मधुविद्यायां प्रत्युपाधिभेदं ब्रह्मणोऽभेदश्रावणान्न भिन्नाकारयोगो ब्रह्मणः शास्त्रीय इति। 'अपिचैवमेक' इति तृतीये च, 'मनसैवेदमाप्तव्यम्' 'नेह नानास्ति किञ्चने'ति भेददर्शननिन्दापूर्वकमभेदमेके, तथान्ये भोक्तृभोग्यादिप्रपञ्चस्य 'त्रिविधं ब्रह्ममेत'दिति ब्रह्मैकस्वभावत्वमामनन्तीति व्याख्याय, ननूभयलिङ्गासु श्रुतिषु सतीषु कथमनाकारमेव ब्रह्मावधार्यते, न पुनः साकारमिति शङ्कायाम्, चतुर्थस्यारूपवत्सूत्रस्य प्रवृत्तिमुक्त्वा, अरूपवदेव ब्रह्मावधारयितव्यम्, न रूपादिमत्। कुतः। तत्प्रधानत्वात्। 'अस्थूलमनणु,' 'अशब्दमस्पर्शमरूपमव्ययम्,' 'आकाशो ह वै नामरूपयोर्निर्वहिता ते यदन्तरा तत् ब्रह्म,' 'दिव्यो ह्यमूर्तः पुरुषः सबाह्याभ्यन्तरो ह्यजः,' 'तदेतत् ब्रह्मापूर्वमनपरमनन्तरमबाह्यमयमात्मा ब्रह्म सर्वानुभू'रित्यादीनां निर्विशेषब्रह्मप्रधानत्वात्, आकारलिङ्गानां चोपासनाप्रधान-

रश्मिः।

सुषुप्त्यादिष्विति[1]। आदिना सम्पत्तिसमाधी। **एवेति**। सविशेषव्यवच्छेदक एवकारः। **आकारेति**। 'चतुष्पाद्ब्रह्म' 'षोडशकलं ब्रह्म', वामनीत्वभामनीत्वलक्षणं ब्रह्म, त्रैलोक्यशरीरं वैश्वानरशब्दोदितं ब्रह्म, 'सर्वं खल्विदं ब्रह्मे'ति, चतुर्दशभुवनात्मकं ब्रह्मेत्येवमाकारभेदश्रावणात्। **मधुविद्यायामिति**। 'यश्चायमस्यां पृथिव्यां तेजोमयोऽमृतमयः पुरुषो यश्चायमध्यात्मं शारीरस्तेजोमयोऽमृतमयः पुरुषोऽयमेव स योऽयमात्मे'त्यादिरूपायाम्। **अभेदेति**। पृथिव्यादीनामुपाधित्वाच्चेति भावः। **भोक्तृभोग्यादीति**। आदिना प्रेरिता। 'भोक्ता भोग्यं प्रेरितारं च मत्वे'ति श्रुतेः। **अनाकारमेवेति**। साकारयोगव्यवच्छेदक एवकारः। **ते यदिति**। ते नामरूपे यस्यान्तरा मध्ये व्यवधायके वर्तेते तद्ब्रह्मेत्यर्थः।

१. प्रकाशमूलपुस्तके सुषुप्तादिषु, रश्मौ च सुषुप्त्यादिषु। २. स्वाप्यय।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

भाष्यप्रकाशः ।

त्वेन ततो निर्बलत्वादिति व्याख्यातवन्तः । ततो, ननु तर्हि आकारवद्विषयाणां का गतिरित्याशङ्कायां पञ्चमं 'प्रकाशवच्चावैयर्थ्या'दिति सूत्रमवतार्य, यथा सौर्यश्चान्द्रो वा प्रकाशो वियद् व्याप्यावतिष्ठमानोऽङ्गुल्याद्युपाधिसंसर्गादृजुवक्रादिभावं प्रतिपद्यमानेषु संसर्गिषु तदाकारतामिव प्रतिपद्यते, तथा ब्रह्मापि पृथिव्याद्युपाधिसम्बन्धात् तदाकारतामिव प्रतिपद्यते, तदालम्बनो ब्रह्मण आकारविशेषोपदेश उपासनार्थो न विरुध्यते, एवमाकारवद्ब्रह्मविषयाणामवैयर्थ्यात् । नच नोपाधियोगादप्युभयलिङ्गमिति प्रतिज्ञाहानिः । उपाधिनिमित्तस्य वस्तुधर्मत्वानुपपत्तेः । उपाधीनामाविद्यकत्वाच्चेति व्याख्याय, 'आह च तन्मात्र'मिति सूत्रं च यथावद्व्याख्याय, 'दर्शयति' सूत्रे च 'अथात आदेशो नेति नेति', 'अन्यदेव तद्विदितादथो अविदितात्,' 'यतो वाचो निवर्तन्ते, 'अवचनेनैवोवाचे'ति श्रुतीः,' 'ज्ञेयं यत् तत् प्रवक्ष्यामि यज्ज्ञात्वामृतमश्नुते । अनादिमत्परं ब्रह्म' न सत्तन्नासदुच्यत' इति गीतावाक्यम्, 'माया ह्येषा मया सृष्टा यन्मां पश्यसि नारद । सर्वभूतगुणैर्युक्तं नैवं मां द्रष्टुमर्हसी'ति स्मृती उपन्यस्य परप्रतिषेधेनैव निर्विशेषं ब्रह्म प्रतिपाद्यत इत्युक्त्वा, 'अत एवे' 'त्यम्बुव'दिति सूत्रद्वयं च यथावद्व्याख्याय, 'वृद्धिह्रास'सूत्रे जलसूर्यकादिदृष्टान्तं साधितुं जलगतं सूर्यप्रतिबिम्बं जलवृद्धौ वर्धते, तद्ह्रासे ह्रसति, तच्चलने चलति, तद्भेदे भिद्यत इत्येवं जलधर्मानुविधायि भवति, न तु सूर्यस्य तथात्वमस्ति, एवं परमार्थतोऽविकृतमेकरूपमपि सद्ब्रह्म देहाद्युपाध्यन्तर्भावाद्वृद्धिह्रासादीनुपाधिधर्मान् भजत इत्येवमुक्त्वा, 'दर्शनाच्चे'ति सूत्रे, 'पुरश्चक्रे द्विपदः,' 'अनेन जीवेनात्मनानुप्रविश्ये'ति श्रुतिभ्यामुपाधिप्रवेशं ब्रह्मणो दर्शयित्वा, युक्त एवातः सूर्यकादिदृष्टान्त इत्युक्त्वा, तस्मान्निर्विकल्पैकलिङ्गमेव ब्रह्म,नोभयलिङ्गम्, न विपरीतलिङ्गं चेति सिद्धान्तमाहुः।

तत्र प्रथमसूत्रव्याख्यानमयुक्तम् । 'सर्वत्र ही'ति हेतुबोधके पदे निर्विशेषस्यैवोपदेशादित्यस्यार्थस्यासौत्रत्वेन तृतीयाध्याये वा शास्त्रे वा ईदृशस्य शब्दस्यार्थस्य च काप्यनुक्ततया अनुवृत्तेरपि कर्तुमशक्यत्वेनाभ्युपगमैकशरणत्वात् । 'अशब्दमस्पर्श'मिति विषयवाक्योत्तरार्धेऽपि, 'अनाद्यनन्तं महतः परं ध्रुवं निचाय्य त'मित्यनेन 'महतः पर'मित्यादिना पूर्वोक्तस्य ध्रुवस्य पुरुषस्य परामर्शेन प्राप्तायाः सविशेषताया अनादरणेन तद्विरुद्धत्वात् । निर्विशेषमेव ब्रह्मेति सिद्धान्तस्यात्रैव सिद्धाव-

रश्मिः ।

निर्बलत्वादिति । उपासनायाः कल्पिताकारपरत्वादिति भावः । **संसर्गिषु** प्रकाशेषु । **इति प्रतिज्ञेति** । 'न स्थानत उभयलिङ्ग'मितिसूत्रभाष्ये इति प्रतिज्ञा । **यथावदिति** । निराकारपरत्वेपि सिद्धान्तानुसारित्वाद्यथावत् । तेषां सिद्धान्ते यथावदिति वा । **परप्रतीति** । चिन्मात्रात्परप्रतिषेधेन । नेतिनेतीत्यादिना । 'मत् परं ब्रह्मे'त्यत्र मत् मत्तः ब्रह्म परमित्यर्थयोगव्यवच्छेदक एवकारः । **यथावदिति** । व्याख्यातम् । **वृद्धिह्रासादीनिति** । आदिनोक्तचलनादयः । एवकारव्यावर्त्यमाहुः **नोभयेति** । **विपरीतेति** । साकारलिङ्गमेव, न तु निराकारमित्येवम् । **निर्विशेषस्यैवेति** । परस्योभयलिङ्गमिति प्रतियोगिनिर्वचनेन सर्वत्र प्रतियोगिस्फूर्तेर्नेतिनेतीत्यादौ नञा निषेध इति तथा । **ईदृशस्येति** । निर्विशेषमात्रस्य । **अनुक्ततयेति** । किन्तु 'अस्थूलमनण्वि'त्यादिवाक्यैः प्रापञ्चिकसर्वधर्मवैलक्षण्यस्य सर्वत्र कारणत्वाद्भगवानस्तीत्यर्थस्य चोक्ततया । **निचाय्य तमिति** । तं पुरुषं निचाय्य ज्ञानकाण्डत्वाज्ज्ञात्वा । अत्र परामर्शमाहुः **महतः परमिति** । काठके 'महतः परमव्यक्तमव्यक्तात्पुरुषः परः । पुरुषान्न परं किञ्चित्सा काष्ठा सा परा गति'रित्यनेन पूर्वोक्तस्य । ध्रुवपदसामानाधिकरण्यायाहुः **ध्रुवस्येति** । 'सा काष्ठा सा परा गति'रित्यस्यार्थः । **तद्वीति** । उत्तरार्धविरुद्धत्वात् । **अत्रैवेति** । अस्मिन्सूत्र एव

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भाष्यप्रकाशः ।

ग्रिमस्यारूपवत्सूत्रस्य वैयर्थ्यप्रसक्तेः । तत्र साध्यमानस्यात्र सिद्धवन्निर्देशाङ्गीकार इत्यस्याप्ययुक्तत्वाच्च । तथा, अरूपवत्सूत्रे 'तत्प्रधानत्वा'दित्यस्य निर्विशेषप्रधानत्वादिति व्याख्यानमप्ययुक्तम् । तदुपन्यस्तानां विषयवाक्यानामुपक्रमादिविचारे तथात्वस्यालाभात् । तथाहि । प्रथमं तत्रास्थूलवाक्यम् । तच्च 'कस्मिन् वा आकाश ओतश्चे'ति गार्गीप्रश्नात् प्रवृत्तम्, स्थूलत्वादीन् लौकिकान् धर्मान्निषेधत् प्रशासितृत्वाम्बरान्तधारकत्वद्रष्टृत्वादीनाकाशोपादानत्वान्तानलौकिकान् दर्शयति । अशब्दवाक्यं तु प्राग्व्याख्यातम् । आकाशवाक्यं च नामरूपनिर्वाहकत्वम् । 'दिव्यो ह्यमूर्त' इति वाक्यं चेयत्तावच्छिन्नं परिमाणं निषेधत् पुरुषं बाह्याभ्यन्तरसाहित्यं बाह्याभ्यन्तररूपत्वं वा दर्शयदक्षरात् परत्वमग्रे श्रावयति । 'तदेतद् ब्रह्मे'ति मधुविद्योपसंहारस्थमपि मधुविद्यायामुपक्रमे, 'अयमेव स योऽयमात्मेदममृतमिदं ब्रह्मेदं सर्व'मित्येवं चतुर्दशपर्यायैरभ्यस्तं सर्वत्वं मध्य उक्तं सर्वभूताधिपतित्वादिकं 'रूपं रूप'मिति मन्त्रव्याख्यानोक्तं 'अयं हरयोऽयं वै दश च सहस्राणि च बहूनि चानन्तानि चे'त्यनन्तरूपतां श्रावयतीति निर्विशेषब्रह्मप्रधानताया वक्तुमयुक्तत्वात् । नच 'तदेतद् ब्रह्मे'ति भिन्नं वाक्यं पूर्वेभ्य इति वाच्यम् । तच्छब्दात् पूर्वपरामर्शाद्विभागे साकाङ्क्षतया तदभावात् । नचेदं तच्छब्देन पूर्वोक्तरूपत्वं परामृशदप्यपूर्वमित्यनेन तन्निषेधतीति न दोष इति वाच्यम् । एवं तर्ह्यनपरमित्यनेनानन्तरत्वादीनग्रिमानपि निषेधच्छून्यवादमेव प्रसञ्जयेत् । अतोत्र पूर्वत्वादीनां धर्माणामेव निषेध इत्येवाङ्गीकार्यम् । तथा सति 'न शुष्केण न चार्द्रेण

रश्मिः ।

निर्धारणेनेत्येवकारार्थः । इत्यस्यापीति । इति हेतोः सूत्रस्यापि । **अशब्दवाक्यमिति** । काठकेऽस्ति । **प्राक्** । अत्रैव पूर्वम् । **नामरूपेति** । दर्शयदित्यनेनान्वेति । **पुरुषत्वमिति** । दर्शयदित्यनेनान्वेति । 'दिव्यो ह्यमूर्तः पुरुषः सबाह्याभ्यन्तरो ह्यजः' इत्यत्र बाह्याभ्यन्तराभ्यां समानः सह वेति विग्रहे आहुः **बाह्याभ्यन्तरेति** । सः बाह्याभ्यन्तरः इति पदद्वयेनेत्याहुः **बाह्याभ्यन्तरेति** । **श्रावयतीति** । 'अक्षरात्परतः परः' इति श्रुत्या श्रावयति । **सर्वभूतेति** । आदिना राजत्वसमर्पितत्वे । 'स वा अयमात्मा सर्वेषां भूतानामधिपतिः सर्वेषां भूताना१ राजा तद्यथा रथनाभौ रथनेमौ चाराः सर्वे समर्पिता एवमेवास्मिन्नात्मनि सर्वे प्राणाः सर्वे लोकाः सर्वे देवाः सर्वाणि भूतानि सर्व एत आत्मानः समर्पिता' इति श्रुतिः । **रूपं रूपमिति** । 'रूपं रूपं प्रतिरूपो बभूव तदस्य रूपं प्रतिचक्षणाय । इन्द्रो मायाभिः पुरुरूप ईयते युक्ता ह्यस्य हरयः शता दशेत्ययं वै हरय'इत्यादि । **युक्ता इति** । रथयुक्तवाजिवत् अस्य इन्द्रस्य परमात्मनः रथस्थानीये आकाशे शरीरे युक्ताः गोविन्दं स्वविषयान्प्रति हरन्तीति हरयः इन्द्रियाणि, शता शतानि, नित्यलीलास्थभक्तेन्द्रियाभिप्रायेण दश प्राणाः, प्राणानामिन्द्रियपदवाच्यत्वात् । मन्त्रः समाप्तः । नित्यलीलास्थगोपीजनवल्लभ उक्तः । लीलायां भेदवारणाय मन्त्रव्याख्यानं प्रकाशे । **अयं वा इति** । अयं परमात्मा । अत्र श्रुतिश्छान्दोग्ये 'आत्मत आविर्भावतिरोभावा'विति सर्वात्मभावप्रकरणश्रुतेः । **पूर्वेभ्य इति** । चतुर्दशपर्यायेभ्यः । **तदभावादिति** । 'अर्थैकत्वादेकं वाक्यं साकाङ्क्षं चेद्विभागे स्या'दिति जैमिनिसूत्रेणैकवाक्यत्वे भिन्नवाक्यत्वाभावात् । **पूर्वोक्तेति** । 'अयमेव स योयमात्मे'ति पूर्वोक्तरूपत्वम् । **अपूर्वमिति** । 'तदेतद्ब्रह्म' इत्यस्या अग्रे 'अपूर्वमनपरमनन्तरमबाह्यमयमात्मा ब्रह्म सर्वानुभूरित्यनुशासन'मित्यस्यामपूर्वमित्यनेनेत्यर्थः । **न दोष इति** । सधर्मकत्वदोषो न । **शून्यवादमेवेति** । अन्ययोगव्यवच्छेदक एवकारः । द्वितीयस्कन्धनवमाध्यायेपि कारणत्वाङ्गीकारात् साकारत्वाङ्गीकाराच्च । **एवेति** । पूर्वोक्तरूपत्वानन्तरत्वादियोगव्यवच्छेदकः ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

भाष्यप्रकाशः ।

जहार नमुचेः शिर' इत्यत्र यथोभयात्मकस्य फेनस्याशुष्कत्वमनार्द्रत्वम्, एवमत्राप्येकैकतन्निषेधेन सर्वात्मकमेव बोध्यत इत्येव युक्तम् । अत एव गजेन्द्रस्तुतौ 'स वै न देवासुरमर्त्यतिर्यङ् न स्त्री न षण्ढो न पुमान्न जन्तुः । नायं गुणः कर्म न सन्न चासन्निषेधशेषो जयतादशेष' इत्यशेषत्वमुक्तम् । तथा शुकैरपि 'एवं गजेन्द्रमुपवर्णितनिर्विशेषं ब्रह्मादयो विविधलिङ्गभिदाभिमानाः । नैते यदोपससृपुर्निखिलात्मकत्वात् तत्राखिलामरमयो हरिराविरासी'दिति निर्विशेषस्य निखिलात्मकत्वं बोधितम् । तथात्राप्यन्ते 'सर्वानुभू'रिति श्राव्यते । सर्वसत्त्वे एव सर्वानुभवितृत्वसम्भवादिति । नचेदं प्रलये न सम्भवतीति वाच्यम् । को नाम प्रलयः । ध्वंसो वा, प्रतिसञ्चरो वा । नाद्यः । असत्कार्यवादप्रसङ्गात् । द्वितीयश्चेत्, अस्मदाद्यगोचरत्वेपि सर्वं ब्रह्मगोचरोऽस्त्येवेति नासम्भवः । वस्तुतस्त्वखण्डब्रह्मवादे अस्मदाद्यगोचरत्वमेव प्रलयः, क्रमेण वा युगपद्वा तद्गोचरत्वमेव सृष्टिरितीच्छया समर्थनान्न कश्चिद्दोषः । एवमेवास्थूलादिवाक्योक्तनिषेधस्थलेपि बोध्यम् । अत उपासनाप्रधानानामाकारलिङ्गानामपि श्रुतीनां तत्तदाकारमात्रलिङ्गत्वेन प्रतीकत्वादेव निर्बलत्वं शङ्क्यताम्, न त्वाकारलिङ्गत्वादित्यपि बोध्यम् । यदपि प्रकाशवत्सूत्रे उपाधियोगादपि नोभयलिङ्गमिति प्रतिज्ञोपपत्त्यर्थमुपाधिनिमित्तस्य न वस्तुधर्मत्वमुपाधीनां चाविद्यकत्वमित्युक्तम् । तदपि तथा । नैमित्तिके घृतद्रवत्वादौ व्यभिचारेण उपाध्याविद्यकतायाश्च 'न विलक्षणत्वा'धिकरणे दूषितत्वेन चाप्रयोजकत्वात् । एवं दर्शयतिसूत्रे निर्विशेषब्रह्मप्रतिपादकत्वेन यानि

रश्मिः ।

उभयेति । शुष्कार्द्रोभयरूपस्यापां फेनस्य । **एवेति** । एकैकपूर्वत्वादियोगव्यवच्छेदक **एवेति** । इत्येवेति । न शुष्केणेत्यादिदृष्टान्तोक्तेरेवेति । **अत एवेति**। एकैकनिषेधेन सर्वात्मकत्वबोधकत्वादेव । **अशेष** इति । न विद्यते शेषः एकैकधर्मो यस्य, किन्तु सर्वे धर्माः । **एवेति** । 'न यत्र माये'ति वाक्यादेवकारः । **प्रतिसञ्चर** इति । प्रतिकूलः सर्वगोचरत्वप्रतिकूलः सर्वागोचरः । **अस्त्येवेति** । अयोगव्यवच्छेदकैवकारः । नीलं सरोजं भवत्येवेत्यत्रेव । 'पूर्ववद्वे'ति सूत्रोक्तपश्चा'दहं' 'यथेदानीं तथा चाग्रे पश्चादप्येतदीदृशम् । तदेतदक्षय'मिति वाक्यसञ्चारेण प्रलयलक्षणमाहुः **वस्तुत** इति । **एवेति** । उक्तवाक्येभ्यः । 'तस्माद्वा एतस्मादि'ति क्रमेण वा, 'तदात्मानꣳस्वयमकुरुते'ति युगपद्वा । तद्गोचरत्वमस्मदादिगोचरत्वम् । 'लोकद्वारा व्यवहार्यो भविष्यामीती'च्छाकारादेवकारः । **इतीच्छयेति** । अस्मागोचरत्वमेव प्रलयोस्तु, तद्गोचरत्वमेव सृष्टिरस्त्वितीच्छया । **कश्चिदिति** । सर्वानुभवितृत्वं दोषः, प्रलयो न संभवतीति दोषः । **एवमेवेति** । पूर्वोक्तप्रकारेण एकैकनिषेधेन सर्वात्मकत्वबोधत्वरूपेण । एवकारोऽन्तरङ्गबहिरङ्गन्यायेन । कल्पितः स्वल्पापेक्षः । अकल्पितोऽत्र भिन्नप्रकारो बह्वपेक्षो बहिरङ्गः । **अस्थूलेति** । स्थूलभिन्नस्थूलसदृशमित्यत्र भेदप्रतियोगिन्यपि बोध्यमित्यर्थः । **अत** इति । अस्मा उपपत्तेः । **श्रुतीनामिति** । 'चतुष्पाद्ब्रह्म' 'षोडशकलं ब्रह्मे'त्याद्युक्तानाम् । **प्रतीकत्वादेवेति** । प्रतीकत्वात् एकैकरूपस्य सर्वात्मकावयवत्वात् । **एवेति** । अवधारणेन निर्बलत्वं शंक्यताम् । अधीष्टे लोट् । नतूपासनाप्रधानत्वादिति भावः । तेषां नित्यत्वान्नत्वाकारलिङ्गत्वादित्यपि बोध्यमित्यर्थः । **उपाधिनिमित्तस्येति** । मायाया निमित्तस्याकस्मिकस्य । उपाधिर्निमित्तं यस्य सविशेषस्येति वा तथेत्यप्रयोजकम् । **नैमित्तिक** इति । नतु सांसिद्धिके जलद्रवत्वादौ वस्तुधर्मत्वाभावस्य व्यभिचारेण । द्वितीयं हेत्वन्तरमाहुः **उपाधीत्यादिना** । **दूषितत्वेनेति** । द्वितीयाध्यायचतुर्थे 'न ह्यत्र किञ्चनानुभूयते नाविद्यानुभवात्मनि स्वप्रकाशे सर्वसाक्षिण्यविक्रियेऽद्वय' इति । अग्रे च 'अत एतस्य सतः आद्यन्ताव-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भाष्यप्रकाशः ।

वाक्यान्युक्तानि, तेष्वपि 'अथात आदेश' इति वाक्यं तु न निर्विशेषप्रतिपादकमिति दर्शयतिसूत्रभाष्यव्याख्यान एव दर्शितम् । विदिताविदितवाक्यं तु तदुभयभिन्नत्वमेव वदति, न तु विशेषान्निषेधति । अथान्यत्वादिकथनमुखेन निषेधति, तदा लौकिकानेव निषेधति । तावतैव चारितार्थ्यम्, न तु स्वरूपात्मकानपि । 'तदेतद् ब्रह्मे'त्यादिश्रुतिविरोधप्रसङ्गात् । 'यतो वाच' इति वागाद्यप्राप्यत्वमेव वदतीत्यनिरुक्तश्रुतिसमानार्थम्, न तु विशेषनिषेधकमित्यपि प्रागेव व्युत्पादितम् । 'अवचनेनैवोवाचे'त्यपि 'यतो वाच' इत्येतस्य समानार्थकम् । लौकिकसर्वधर्मराहित्यादेवोपशान्तत्वसिद्धेरिति । 'न सत्तन्नासदुच्यत' इति गीतावाक्यमपि व्याकृताव्याकृतयोरेव निषेधकमिति लौकिकनिषेधपरमेव । 'सर्वतःपाणिपादान्त'मित्यग्रिमवाक्येन तथा निश्चयात् । सर्वतःपाणिपादत्वादेः क्वापि लौकिके अदर्शनादिति । 'माया ह्येषे'ति वाक्यमपि सर्वभूतगुणयुक्तदर्शननिषेधाभिप्रायकमिति तत्रैव स्फुटतीति न सार्वात्म्यबाधकम्, अतस्तत्सूत्रव्याख्यानमपि तथा । एवं

रश्मिः ।

स्वाविचारे यत्किमपि कार्यमविद्या च तत्सत्त्वेनैवानुभूयते, नतु प्रतिनियतेन तेन तेन रूपेणातो विजातीयद्वैतस्याप्यभावाच्छुद्धाद्वयसिद्धिरित्यर्थ इति' सन्दर्भे दूषितत्वेन, प्रयोजकहेतुत्वाभावात् । व्याख्यान एवेति नान्यत्रेत्येवकारः । **तदुभयेति** । विदिताविदितोभयभिन्नत्वमन्यदेवेत्यत्र भिन्नार्थकान्यशब्दप्रयोगात् । भिन्नवाचकपदसत्त्वाविशेषनिषेधवाचकपदाभावादेवकारः । **विशेषानिति** । द्वितीयान्तम् । **अथेति** पदार्थभिन्नप्रक्रमे । **अन्यत्वादीति** । आदिना विदितत्वाविदितत्वे । मुखमुपायः । **निषेधतीति** । विदितादन्यत् अविदितादन्यदित्युक्ते विदिताविदितप्रतियोगिकभेदवत्प्रतीतेः विदितत्वाविदितत्वरूपसामान्यधर्मनिषेध इति निषेधतीत्यर्थः । **एवेति** । प्रक्षालनपङ्कन्यायात् । **श्रुतिविरोधेति** । तत्स्थसर्वानुभूपदविरोधप्रसङ्गादित्यर्थः । **वागादीति** । आदिना मनः । एवकारोऽन्यस्य सविशेषत्वस्य योगव्यवच्छेदकः । नतु निर्विशेषत्वं वदतीत्यर्थः । किञ्च । **अनिरुक्तेति** । निरुक्तत्वे प्राप्तेऽनिरुक्तत्वं विरुद्धधर्माधारत्वार्थम् । तद्वद्वाक्प्राप्यत्वे प्राप्ते वाङ्निवृत्तिर्विरुद्धधर्माधारत्वार्थमित्यनिरुक्तश्रुतिसमानार्थमित्यर्थः । **प्रागेवेति** । **अवचनेति** । वचनेनोवाचेति प्राप्ते अवचनेनोवाचेति विरुद्धधर्माश्रयत्वाय । अवचनेन वचनविरुद्धवचनेन । परस्परं विरुद्धवचनेनेति यावत् । **विरोधो नत्वर्थ** इति । अत एवकारः । विरुद्धधर्माणामन्याभिर्निश्चयात् । **एवेति** । नत्वलौकिकसर्वधर्मराहित्यमुपशान्तत्वसिद्धिरपेक्षत इत्यर्थः । उपशान्तत्वं त्वेवम् । बाष्कलिना च राद्धः पृष्टः सन् 'अवचनेनैव ब्रह्म प्रोवाचे'ति श्रूयते 'स होवाचाधीहि भगवो ब्रह्मेति । स तूष्णींबभूव, तं ह द्वितीये तृतीये वा वचन उवाच क्रमः खल त्वं न विजानासि उपशान्तोऽयमात्मे'ति । स ह बाष्कलिर्ह प्रसिद्धः । हे भगवन् पृष्टः सः पृष्टः । तं तूष्णींभूतं पृष्टं प्रति द्वितीय इति । प्रश्ने वचने, पृष्ट उवाच, क्रमः क्रमेण । सुपांसुः । हे खल, त्वं तु ब्रह्म न विजानासि, उपशान्तः लौकिकसर्वधर्मरहितः । यथा शान्तो वह्निर्भस्मात्मा । **व्याकृतेति** । लक्षणया सदसदर्थयोः । **एवेति** । समाकर्षाधिकरणादेवकारोयम् । तत्र शब्दाः स्वार्थात्प्रच्याव्यन्त इति । **लौकिकेति** । लौकिकसर्वधर्मनिषेधपरम् । श्रुत्येकवाक्यतासम्भवादेवकारः । **इत्यग्रिमेति** । अलौकिकसर्वधर्माणां सर्वतः पाणिपादान्तत्वादीनां बोधकेन । **तथेति** । लौकिकनिषेधपरत्वेन निश्चयात् । **सर्वत** इति । आदिना सर्वतोक्षिशिरोमुखत्वम् । **तत्रैवेति** । वाक्य एव, नत्वन्यत्र, 'नैवं मां द्रष्टुमर्हसी'त्यंशेन स्फुटतीत्यर्थः । **न सार्वात्म्येति** । परिच्छेदेन सर्वात्मत्वधर्मबाधकम् । एतादृशधर्मोपादानं जीवपरत्वेन प्रतीतानां ब्रह्मपरत्वप्रतिपादनाय । **अत** इति । सार्वा-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

भाष्यप्रकाशः ।

वृद्धिह्रासस्सूत्रे जलवृद्धिह्रासाभ्यां प्रतिबिम्बवृद्धिह्रासकथनमपि तथा । भूयसि स्वल्पेपि च जले सूर्यादिप्रतिबिम्बस्य तुल्यताया एव ग्रहणात् । अतोत्राकाशदृष्टान्तेन धर्माणामौपाधिकत्वसमर्थनमेव युक्तम्, न तु जलसूर्यदृष्टान्तसमर्थनमित्यवधेयम् ।

यत्तु भामत्यामेतत्तात्पर्यमुक्तम् । उपाधिजनितस्य रूपस्य पारमार्थिकत्वे ब्रह्मणः परिणामिभावः । स च प्राक्प्रतिषिद्ध इत्यपारमार्थिको ब्रह्मण्यध्यस्त इति । निर्विशेषप्रतिपादनार्थत्वाच्छ्रुतीनाम् । सविशेषतायामपि मधुविद्यायां 'यश्चायमस्यां पृथिव्या'मित्यादिभिर्ब्रह्मैकत्वप्रतिपादनपरत्वात् । एकत्वनानात्वयोश्चैकस्मिन्नसम्भवात् । एकत्वाङ्गत्वेनैव नानात्वप्रतिपादनपर्यवसानात् । नानात्वस्य प्रमाणान्तरसिद्धत्वेनानुवाद्यत्वादेकत्वस्य चानधिगतेर्विधेयत्वोपपत्तेः । भेददर्शननिन्दया च साक्षाद्भूयसीभिः श्रुतिभिरभेदप्रतिपादनात् । आकारवद्ब्रह्मविषयाणां च कासाञ्चिच्छ्रुतीनामुपासनापरत्वम्, तच्चासति बाधकेऽन्यपराद्वचनात् प्रतीयमानमपि गृह्यते । यथा देवतानां विग्रहवत्त्वम् । सन्ति चात्र साक्षाद्द्वैतापवादेनाद्वैतप्रतिपादनपराः शतशः श्रुतयः । कासाञ्चिच

रश्मिः ।

त्स्यात् । परस्याक्षरात्परस्य प्रतिषेधेनैव निर्विशेषं ब्रह्म प्रतिपाद्यत इतिव्याख्यानमपि तथा नाम शिथिलम् । एवेति । प्रत्यक्षादेवकारः । **अतोत्रेति** । भूयसि स्वल्पेपि च जले सूर्यादिप्रतिबिम्बस्य तुल्यतायाः । **आकाशेति** । घटाकाशः स्वल्पः, गृहाकाशो महान् इत्येवमाकाशदृष्टान्तेन घटीयाकाशगृह्याकाशत्वादिधर्मवत्, ब्रह्मधर्माणां सर्वकर्मत्वसर्वकामत्वादीनां मायिकधर्मत्वमौपाधिकत्वं तत्समर्थनमित्यर्थः । स्वयं परमार्थतोऽविकृतमेकरूपमिति । **एवेति** । एतद्व्यवच्छेद्यमाहुः **न त्विति** । अम्बुवत्सूत्रेण दृष्टान्तस्यायुक्तत्वमुक्त्वा वृद्धिह्राससूत्रेण च जलसूर्यदृष्टान्तसमर्थनम् । **एतत्तात्पर्यमिति** । जलसूर्यदृष्टान्ततात्पर्यम् । **प्रागिति** । अरूपवत्सूत्रे । **अपारमार्थिक** इति । मायिकः । **सविशेषेति** । सविशेषपरतायाम् । विरुद्धधर्माधारप्रतिपादनपरत्वमस्त्वित्याशङ्क्याह **एकत्वेति** । मूर्तामूर्तब्राह्मणे निषेधशेषत्वेन प्रतियोगिमूर्तामूर्तनिरूपणेप्यारोपापवादादाहुः **एकत्वाङ्गेति** । **एवेति** । प्रतियोगिनोऽभावशेषत्वम्, न त्वभावस्य प्रतियोगिशेषत्वमित्येवकारः । किञ्च । **नानात्वस्येति** । **प्रमाणान्तरेति** । प्रत्यक्षेण सिद्धत्वेन । सिद्धस्य कथनमनुवाद इत्यनुवाद्यत्वात् । **अनधिगतेरिति** । लोके बोध्यम् । तथाच लोकेऽनधिगतार्थगन्तृत्वरूपप्रमाणस्यैकत्वात्मकांशे सत्त्वादनूद्यांशस्यार्थवादत्वान्निर्विशेषप्रतिपादने पर्यवसानमिति भावः । **भेदेति** । 'मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यती'ति भेददर्शननिन्दया । **श्रुतिभिरिति** । 'यत्र त्वस्य सर्वमात्मैवाभू'दित्यादिभिः । **आकारवदिति** । 'चतुष्पाद्ब्रह्मे'त्यादीनाम् । **तच्चेति** । उपासनापरत्वं च असति बाधके उपदेशादिपरत्वरूपे अन्यपराद्वचनादुपदेशादिपरा 'ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो' इत्येकादशपदात्, यद्वा पञ्चपदात् वाक्यात् । जीवात्मैक्यपरमपीदम् । तथाच नेदमुपासनापरम् । उपदेशपरत्वस्य ऐक्यपरत्वस्य च बाधकस्य सत्त्वात् । यत्र 'सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत' 'आत्मेत्येवोपासीते'त्यादौ तु बाधकाभावः, अन्यपरवचनाभावात् । किञ्चोभयत्र प्रतीयमानः शक्यार्थोपि गृह्यते । सामान्ये नपुंसकम् । **प्रतीयमानमिति** । देवताविग्रहश्रुतिः पूर्वतन्त्रेऽस्ति । तत्र प्रतीयमानं विग्रहवत्त्वम् । **शतश** इति । यथा 'मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यती'ति 'यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्ये'दित्यादि । श्रुतयः शतं व्याख्यानद्वारा श्रुतीर्ददातीति शतशः सन्ति । **कासाञ्चिदिति** । 'आत्मेत्येवोपासीत' 'आत्मानं लोकमुपासीत' 'तज्जलानिति शान्त उपासीत'इत्यादीनां कर्मकर्तृरूपेण द्वैताभिधायिनीनाम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भाष्यप्रकाशः ।

द्वैताभिधायिनीनां तत्प्रलयपरत्वम् । तस्मान्निर्विशेषमेकरूपं चैतन्यैकरसं सत् ब्रह्म परमार्थतः । विशेषाश्च सर्वगन्धत्ववामनीत्वादय उपाधिवशादस्ता इति सिद्धमिति ।

तदप्यसङ्गतमेव । ब्रह्मणः परिणामिभावस्य श्रुतिषु सूत्रेषु च प्रतिषेधादर्शनात् । 'बहु स्यां प्रजायेये'ति, 'स आत्मानं स्वयमकुरुते'त्यादिश्रुतिषु, 'आत्मकृतेः परिणामा'दित्यादिषु सूत्रेषु च तद्विपरीतस्य विधानस्यैव दर्शनाच्च । नच वाचारम्भणवाक्यं विकारस्य वाङ्मात्रताकथनमुखेन तदभावमेव बोधयत् प्रतिषेधतीति शक्यवचनम् । तत्र तत्कथनमुखेन कारणाभिन्नत्वबोधनस्यैव भगवता सूत्रकारेणादृततया स्वयमन्यथादर्तुमयुक्तत्वात् । तदनादृत्यादरे तु 'वाचारम्भणं विकारो मृत्तिकैव सत्य'मित्येतावतैव चारितार्थ्येन, इतिशब्दनामधेयपदयोर्वैयर्थ्यस्य दुर्वारत्वमित्यादिकं तदनन्यत्वसूत्रभाष्यविभाग एव विवृतमिति न पुनः प्रपञ्च्यते । अतो निर्विशेषप्रतिपादनार्थत्वं यच्छ्रुतीनामङ्गीकृतम्, तदप्यभिमानमात्रमेवेति प्रागेवोपपादितम् । एकत्वनानात्वयोरेकत्रासम्भवस्तु 'इदं सर्वं यदयमात्मा' 'यदेकमव्यक्तमनन्तरूपं विश्वं पुराणं तमसः परस्ता'दित्यादिश्रुतिभिरेवोदस्त इति तस्य निर्विशेषतासाधनादरः श्रुतिप्रद्वेषादेव । एकत्वाङ्गत्वेन नानात्वप्रतिपादनं त्विष्टमेव, परन्तु तन्न नानात्वस्यापोद्यत्वाय, अपि त्वभेदस्य भेदविरुद्धसम्पत्त्वबोधनायेत्यप्युक्तपूर्वम् । नानात्वस्य प्रमाणान्तरसिद्धत्वं तु लौकिकस्यैव, न तु ब्रह्मधर्मभूतस्यैकत्वाविरोधिनः । तादृशस्य

रश्मिः ।

अन्येति । चक्षुरवेद्यत्वात् । तथाच नार्थवादत्वमिति भावः । **तस्येति** । नानात्वस्य । 'तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मण' इति श्रुत्या तस्य भेदस्य प्रलयपरत्वम् । 'प्रज्ञां कुर्वीते'त्यस्य दृशिमात्रं ब्रह्म कुर्यात्प्रपञ्चप्रविलायनेनेत्यर्थात् । **उपाधीत्यादि** । अन्यत्राप्रसिद्धानामध्यस्तत्वं भ्रमात् । **इत्यादिष्विति** । सूत्राणि तु समन्वयादित्यादीनि द्रष्टव्यानि । **तद्विपरीतस्य** प्रतिषेधविपरीतस्य । **एवेति** । प्रतिषेधयोगव्यवच्छेदक एवेति । **तदभावमेवेति** । परिणामिभावस्य प्रतिषेधम् । एवकारोऽन्ययोगव्यवच्छेदकः । **प्रतीषेधतीति** । ब्रह्मणः परिणामिभावं प्रतिषेधति । **एवेति** । स्वसिद्धान्तभाष्यादेवकारः । **तदिति** । भाष्यम् । **तदनन्येति** । विभागो व्याख्यानम् । एवकारोऽन्ययोगव्यवच्छेदकः । **एवेति** । नतु युक्त्यन्तरदूषणेन प्राप्तम् । **प्रागेवेति** । तदनन्यत्वाधिकरणे । एवकारोऽधिकरणान्तरयोगव्यवच्छेदकः । **एवोदस्त इति** । निर्धारणेनोदस्तः । एकात्मत्वविधानेन तमःपरत्वेन चोदस्तः । **श्रुतिप्रेति** । श्रुतीनामक्षरमात्रान्यथाऽप्रतिपादकत्वेन विरुद्धधर्माश्रयत्वे लोकविरोधात्प्रद्वेषः, आलोचनयुक्त्यभावात्, दुरूहे जिज्ञासोदयात् । अनुभवादेवकारः । **इष्टमेवेति** । नानात्वं विना सात्त्विकज्ञानेनैकत्वज्ञानानुदयादिष्टम् । **एवेति** । एकत्वस्याष्टादशाध्यायगीतयोपबृंहणादेवकारः । विरुद्धधर्माधारप्रकरणादाहुः **परन्त्विति** । **तन्नेति** । एकत्वं न । अभेदस्य एकत्वस्य भेदो नानात्वं तद्विरुद्धत्वसम्पत्त्वबोधनाय । **पूर्वमिति** । प्रकाशाश्रयवत्सूत्रे । **प्रमाणान्तरेति** । प्रत्यक्षसिद्धत्वम् । एवकारव्यवच्छेद्यमाहुः **नत्विति** । **तादृशस्येति** । नानात्वस्य । तादृशशब्दो रूढः । अवयवार्थो नास्ति । कुत्र रूढ इति चेत् । तत्पूर्वोक्तमेकत्वाविरोधित्वं दृश्यते यत्र तत्र । योग इति चेत्, वैदिकेस्तु, तल्लोके रूढ्यर्थं गृह्यते । योगस्तु तमिवेमं पश्यन्ति जना इति । बहुव्रीहिप्रसङ्ग इति चेत्,

१. मुद्रितभामत्यामध्यस्ता इति पाठ उपलभ्यते, श्रीहस्ताक्षरपुस्तके तथैव कैश्चित् शोधितः, तथापि भाष्यप्रकाशकाराणां त्वयमेव पाठः संमत इति 'विशेषाणामस्तते' तिफक्किकया प्रतिभाति, अतो यथोपलब्ध एव पाठोत्राहृत इति । स्वारस्यस्य तस्मिन्नेव रक्षणादिति ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

भाष्यप्रकाशः ।

स्वरूपान्तःपातितया श्रुत्येकगम्यत्वेनान्यावेद्यत्वात् । अतस्तस्यानुवाद्यताङ्गीकारोपि स्वमनस्तोषणायैवालम्, न तु व्याख्येयसमर्थनाय । भेददर्शननिन्दा तु घटपटादिवत् तात्त्विकभेददर्शनपरा, न त्वैच्छिकतत्परा । अन्यथा 'इव'शब्दवैयर्थ्यप्रसङ्गादित्यपि 'अपिचैवमेके' इति सूत्रव्याख्यान एव दर्शितमिति न तयापि विशेषप्रतिषेधसिद्धिः । साक्षाद्द्वैतापवादेनाद्वैतप्रतिपादनपरत्वमपि श्रुतीनामस्मद्रीत्या, न तु युष्मद्रीत्येत्युपासनापराभ्योपि देवताविग्रहवद्ब्रह्मण आकारादिग्रहणेपि न किञ्चिद्बाधकम् । अतो विशेषाणां नास्तता, अपि तु निर्विशेषमात्राभ्युपगन्तॄणामेवास्ततेति बोध्यम् ।

यत्पुनः, प्रकृतैतावत्त्वसूत्रमारभ्य नवसूत्रमधिकरणम् । तत्र त्वारम्भ एव 'द्वे वा व ब्रह्मणो रूपे' इति मूर्तामूर्तब्राह्मणं विषयवाक्यत्वेनोपन्यस्य, तच्च व्याख्याय, 'नेति नेती'ति निषेधस्य किं रूपद्वयं ब्रह्म च विषयः, उत रूपद्वयमेव वा, ब्रह्मैव वेति सन्देहे, नञ्द्वयाद्रूपद्वयं ब्रह्म च, अथवा ब्रह्मणः प्रमाणान्तरागोचरत्वाद्ब्रह्मैव वा विषय इति पूर्वपक्षे, रूपद्वयमेव निषिध्यते, न ब्रह्म, रूपब्रह्मणोर्निषेधे शून्यवादप्रसङ्गात् । 'ब्रह्म ते ब्रवाणी'त्युपक्रमस्य 'असन्नेव स भवती'ति निन्दायाः 'अस्तीत्येवोपलब्धव्य' इत्यवधारणस्य च विरोधेन तन्निषेधस्यानुपपन्नत्वात् सर्ववेदान्तकोपप्रसङ्गाच्च । तस्माद्रूपद्वयं प्रतिषेधति, ब्रह्म तु परिशिनष्टीति । तदेतदाह । प्रकृतैतावत्त्वं हि प्रतिषेधतीति । प्रकृतं यदेतावता परिच्छिन्नं मूर्तामूर्तलक्षणं ब्रह्मणो रूपं तदेष शब्दः प्रतिषेधति । तद्धि प्रकृतम् । प्रपञ्चितं च पूर्वस्मिन् ग्रन्थे अधिदैवतमध्यात्मं च । तज्जनितं च वासनालक्षणम-

रश्मिः ।

तत् दृश्यत इति पदद्वयं तादृश इति प्रयोगे यत्रेति तु स्पष्टार्थम् । **स्वरूपान्तरिति** । 'अविभक्तं च भूतेषु विभक्तमिव च स्थित'मिति गीतायाः । **तोषणायैवेति** । 'नमःस्वस्तिस्वाहास्वधाऽलंवषड्योगाच्चे'ति सूत्रेणालंयोगे चतुर्थी । **व्याख्येयेति** । नानात्वापनोदेनैकत्वसमर्थनाय । अतो विरुद्धधर्माधारत्वमर्थवादत्वाभावात्सुस्थिरमिति भावः । ननूक्ताया भेददर्शननिन्दायास्तादृशेष्ववतारात्स्वरूपान्तःपातित्वं कथमिति चेत्, तत्राहुः **भेददर्शनेति** । **घटपटेति** । घटपटयोः कुड्यकुसूलयोरिव । षष्ठ्यन्ताद्वतिः । **इवशब्देति** । 'य इह नानेव पश्यती'त्यत्रेवशब्दः । **एवेति** । नत्वन्यत्रेत्यर्थः । **दर्शितमिति** । इत्यनेन प्रकारेण । **तया** भेदनिन्दया[1] । **विशेषेति** । स्वरूपान्तःपातिनानात्वरूपविशेषप्रतिषेधसिद्धिः । **अस्मद्रीत्येति** । विरुद्धधर्मप्रतिपादनरीत्या । **युष्मद्रीत्येति** । आरोपापवादसङ्गत्या । **आकारेति** । आदिनोपासना । शक्यार्थत्वेनाकाराणामुपासनानां च ग्रहणम् । **विशेषाणामिति** । सर्वकर्मसर्वकामत्वादीनाम् । **एवेति** । एकदेशिमतादरणेनास्तता । तादृशमनोभावेन वागस्तात् । **एवेति** । ब्रह्मयोगव्यवच्छेदकः । **ब्रह्मैवेति** । रूपद्वयव्यवच्छेदकैवकारः । **सर्ववेदान्तेति** । वेदान्तेषु प्रवृत्त्यभावात्कोपः । शून्यवादे फलाभावात् । **परीति** । परिशेषं करोति । **शब्द इति** । नञ्शब्दः । **पूर्वस्मिन्निति** । मूर्तामूर्तप्रतिपादनोत्तरग्रन्थे । **चेति** । प्रकृतमित्यन्वयः । 'इत्यधिदैवतम्' । 'अथाध्यात्म'मिति श्रुतिभ्याम् । **तज्जनितमिति** । अमूर्तजनितम् । मूर्तस्य तु एष तपति स रसः । वासनात्यक्तपूर्वापरानुसन्धानं पदार्थादानम् । **अमूर्तेति** । अमूर्तस्य वासनारूपरसभूतो यः पुरुषस्तस्य प्रतिपादको यः शब्दः तेनोदितमुक्तम् । उपादेये वासनाशब्दो लाक्षणिकः । तस्यैतस्यामूर्तस्य । 'एतस्यामूर्तस्यैतस्य स्थितस्यैतस्यैव सत्यस्यैव रसो य एष एतस्मिन्मण्डले पुरुषरूपस्त्यस्य ह्येष रस इत्यधिदैवत'मिति श्रुतिः । त्यस्य सत्यपदैकदेशस्य त्याक्षरार्थस्येत्यर्थः । य एतस्मिन्मण्डले पुरुषः कारणात्मको हिरण्यगर्भो

१. तत्त्वात्मकः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भाष्यप्रकाशः ।

परं रूपममूर्तरसभूतपुरुषशब्दोदितं लिङ्गात्मव्यपाश्रयं माहारजनाद्युपमाभिर्दर्शितम् । तदेतत् सप्रपञ्चं ब्रह्मणो रूपं सन्निहितावलम्बनेनेतिकरणेन प्रतिषेधकनञ् प्रत्युपनीयत इति गम्यते । ब्रह्म तु रूपविशेषणत्वेन षष्ठ्या निर्दिष्टं पूर्वस्मिन् ग्रन्थे, न तु स्वप्रधानत्वेन । प्रपञ्चिते च रूपद्वये रूपवतः स्वरूपजिज्ञासायामिदमुपक्रान्तं 'अथात आदेशो नेति नेती'ति । तत्र कल्पितरूपप्रत्याख्यानेन ब्रह्मणः स्वरूपावेदनमिदमिति निर्णीयते । नच स्वरूपद्वयं स्वयमेवोक्त्वा स्वयमेव निषेधे 'प्रक्षालनाद्धि पङ्कस्ये'ति न्यायेनाकथनमेव युक्तं स्यादिति शङ्क्यम् । एतस्य रूपद्वयस्य लोकप्रसिद्धस्य ब्रह्मणि कल्पितत्वेन प्रतिषेध्यत्वाय शुद्धब्रह्मस्वरूपप्रतिपादनाय च तत्परामर्शेन कथनस्य युक्तत्वात् । द्वौ चैतौ निषेधौ यथासंख्यं मूर्तामूर्ते प्रतिषेधतः । यद्वा । पूर्वप्रतिषेधो भूतराशिं निषेधति, उत्तरस्तु वासनाराशिम् । अथवा, 'नेति नेती'ति वीप्सा । तत्र 'इती'ति यावत्किञ्चिदुत्प्रेक्ष्यते, तत्सर्वं 'ने'त्यनेन निषिध्यते । परिगणितनिषेधे हि क्रियमाणे यदि नैतद्ब्रह्म, किमन्यत् ब्रह्म भवेदिति जिज्ञासा स्यात् । वीप्सायां तु सत्यां समस्तविषयजातस्य प्रतिषेधात् अविषयः प्रत्यगात्मा

रश्मिः ।

विराडात्मा एतच्चाधिदैविककारणात्मकस्य ब्रह्मणो रूपम् । निश्चयपूर्वकं पुनराह त्यस्य ह्येष इति । त्यमित्युक्तस्य हि निश्चयेन एष रसः रसशब्दप्रतिपाद्यः सारः वासनेत्यावृत्तिः । एवमुक्तमाधिदैविकं विभागमुपसंहरति स्म **अधिदैवतमिति** । **लिङ्गात्मेति** । 'तस्य हैतस्य पुरुषस्य रूपम् । यथा माहारजनं वासो यथा पाण्ड्वाविकं यथेन्द्रगोपो यथाग्न्यर्चिर्यथा पुण्डरीकं यथा सकृद्विद्युतꣳ सकृद्विद्युतेव ह वा अस्य श्रीर्भवति य एवं वेदे'ति श्रुतिः । अत्र तस्याधिदैविकस्य ह एतस्याध्यात्मिकस्य लिङ्गपुरुषस्य आत्मनीत्यध्यात्मं तत्सम्बन्धिन इत्यर्थात् । मनसो वासनामयं रूपम् । यथा लोके महारजनं हरिद्रा तया रक्तं माहारजनं वासः वस्त्रम् । 'तेन रक्तं रागादि'ति सूत्रेणाण् । एवं स्त्र्यादिविषयसंयोगे सति । तादृशं रञ्जनाकारमुत्पद्यते । तथा चाविरिदमाविकम् । ऊर्णादि यत्पाण्डुरम् । तथान्यद्वासनारूपं लिङ्गस्य जायते । तथा चेन्द्रगोपः वर्षाकालीनकीटविशेषः कौसुम्भवदत्यन्तरक्तो भवत्येवमेवास्य वासनारूपम् । यथाचाग्न्यर्चिर्भास्वरं भवति, तथा क्वचित्कस्यचिद्वासनारूपम् । यथाच पुण्डरीकं शुभ्राम्भोजं तद्वदपि क्वचित्कस्यचिद्वासनारूपं भवति । यथाच सकृद्विद्युतं विद्योतनं सर्वतः प्रकाशकं भवति । यथा ज्ञानप्रकाशविवृद्ध्यपेक्षया कस्यचिद्धिरण्यगर्भादेर्वासनारूपमुपजायते । सत्त्वादितारतम्यादित्यर्थः । चरमोक्तहिरण्यगर्भवासनारूपोपासनफलमाह **सकृदिति** । एवं यथोक्तमत्यन्तं हिरण्यगर्भवासनारूपं यो वेद अस्योपासकस्य सकृद्विद्युतेव विद्योतनमिव श्रीः शोभा ख्यातिर्भवति । ह वै भवत्येवेत्यर्थः । तदेतदुक्तं **लिङ्गात्मे**त्यारभ्य **दर्शितमि**त्यन्तेन । 'अथात आदेशो नेति नेती'त्यस्या अर्थमाह **तदेतदिति** । सन्निहितं मूर्तामूर्तं आध्यात्मिकमाधिदैविकं च तेषामवलम्बनं ग्राह्यं प्रतिपाद्यं यस्येतिकरणस्य तेन । **प्रतिषेधकेति** । प्रतिषेधकं नञ् प्रतिषेधकनञ् तं प्रति प्रतियोगितासम्बन्धेनोपनीयते प्राप्यते । 'द्वे वा व ब्रह्मणो रूपे' इत्यत्राह **ब्रह्म त्विति** । ब्रह्मसम्बन्धिनी रूपे इति रूपविशेषणत्वेन । **ग्रन्थे** श्रुतौ । **रूपवत** इति । ब्रह्मणः । **स्वयमेवेति**, ननु 'तदेषाभ्युक्ते'तिवदन्यमुखेन । एवमग्रेपि । **प्रक्षालनेति** । 'प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वर'मितिन्यायेन । **एवेति** । कथनयोगव्यवच्छेदकः । **परीति** । परिगणितानां वस्तूनां मूर्तामूर्ताधिदैवताध्यात्मिकानां निषेधे । **एतदिति** । वासनाभूतम् । **अविषयः** स्वयंप्रकाशः । 'प्रकृतैतावत्त्वं हि प्रतिषेधती'ति व्याकृत्य 'ततो ब्रवीति च

१. मूले रश्मौ च प्रतिषेधकनञिति पाठः, मुद्रितपुस्तके प्रतिषेधकनञमिति ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

भाष्यप्रकाशः ।

ब्रह्मेति जिज्ञासा निवर्तते । तस्मात् ब्रह्मणि कल्पितं प्रपञ्चं प्रतिषेधति, ब्रह्म तु परिशिनष्टीति निर्णयः । किञ्च । ततः प्रतिषेधात् 'भूयो ब्रवीति' 'अन्यत् परमस्ती'ति । अभावावसाने हि निषेधे किमन्यत् परमस्तीति ब्रूयात् । अतोपि ब्रह्मैव परिशिनष्टीति निर्णयः । तत्रैषा श्रुत्यक्षरयोजना । नेति नेतीति ब्रह्मादिश्य तमेवादेशं पुनर्निर्वक्ति । नेति नेतीत्यस्य कोर्थः । न ह्येतस्माद्ब्रह्मणो व्यतिरिक्तमस्तीत्यतो नेतीत्युच्यते, न पुनः स्वयमेव नास्तीत्यर्थः । तच्च दर्शयति 'अन्यत् परमस्ती'ति । यदा पुनः श्रुत्यक्षराण्येवं योज्यन्ते, न ह्येतस्मादिति नेति । न हि प्रपञ्चनिषेधरूपादादेशनादन्यत् परं ब्रह्मण आदेशनं नास्तीति, तदा 'ततो ब्रवीति च भूय' इत्येतन्नामधेयविषयं योजनीयम् । 'अथ नामधेयं सत्यस्य सत्य'मिति, 'प्राणा वै सत्यं तेषामेष सत्य'मिति हि ब्रवीतीति । तच्च ब्रह्मावसाने निषेध उपपद्यते । अभावावसाने तु किं 'सत्यस्य सत्य'मित्युच्येत । तस्माद्ब्रह्मावसानोऽयं निषेध इति सूत्रं व्याचक्रुः । तत् ब्रह्मास्ति चेत्, कुतो न गृह्यते इति शङ्कायां तदव्यक्तसूत्रम्, तस्य च, 'न चक्षुषा गृह्यते,' 'स एष नेति नेत्यात्मा,' 'अगृह्यः', 'यदा ह्येवैष एतस्मिन्नदृश्ये,' 'यत्तदद्रश्यमग्राह्यम्,' 'अव्यक्तोऽयमचिन्त्योऽय'मिति विषयवाक्यानि धृत्वा, सर्वसाक्षित्वादनिन्द्रियग्राह्यमिति व्याख्याय, 'अपि संराधन'सूत्रे भक्तिध्यानप्रणिधानाद्यनुष्ठानरूपसंराधनेन 'कश्चिद्धीरः प्रत्यगात्मानमैक्षत्,' 'ज्ञानप्रसादेन विशुद्धसत्त्व' इत्यादिश्रुत्यनुरोधेन अव्यक्तस्यापि ब्रह्मणो दर्शनमङ्गीकृत्य, ननु संराध्यसंराधकभावाभ्युपगमात् परेतरात्मनोरन्यत्वं स्यादिति शङ्कायां तन्निषेधाय 'प्रकाशादिवच्चावैशेष्यं प्रकाशश्च कर्मण्यभ्यासा'दिति सूत्रमवतार्य, यथा प्रकाशाकाशसूर्यादयोङ्गुलिकरकोदकादिषु कर्मसूपाधिभूतेषु सविशेषा इवावभासन्ते, न च स्वाभाविकीमविशेषात्मतां जहति, एवमुपाधिनिमित्त एवायमात्मभेदः, स्वतस्त्वैकात्म्यमेव । तथाहि वेदान्तेष्वभ्यासेनासकृज्जीवप्राज्ञयोरभेदः प्रतिपाद्यत इति व्याख्याय, 'अतोऽनन्तेन तथाहि लिङ्ग'मिति सूत्रं च अभेदस्य स्वाभाविकत्वात् भेदस्य चाविद्याकृतत्वाद्विद्यया अविद्यां विधूय जीवः परेणानन्तेन प्राज्ञेनैक्यं गच्छति । तथाहि लिङ्गम् । 'स यो ह वैतत्परमं ब्रह्म वेद ब्रह्मैव भवति, ब्रह्मैव सन् ब्रह्माप्येती'त्यादीनि व्याख्याय, स्वमतशुद्धये तस्मिन्नेव संराध्यसंराधकभावे मतान्तरोपन्यासायाहिकुण्डलादिसूत्रद्वयमित्येवं तदवतार्य, 'ततस्तु तं पश्यते निष्कलं ध्यायमानः,' 'परात् परं पुरुषमुपैति

रश्मिः ।

भूय' इति व्याकरोति स्म किञ्चेति । 'अन्यत्परमस्ती'ति श्रुतिस्तत्रत्या । अभावावसाने वासनावसानेप्यभावो वासनायामवसानं यस्य निषेधस्य तस्मिन्सति । ब्रूयादिति । किमः प्रश्ने प्रयोगात्प्रश्नं ब्रूयात् । **अतोपीति** । वीप्सया प्रतिषेधात् । **तमेवेति** । एतन्निर्वचनस्याग्रे दर्शनादेवकारः । श्रुतिस्तु 'नेति नेति नह्येतस्मादिति नेत्यन्यत्परमस्तीति प्राणा वै सत्यं तेषामेष सत्य'मिति । 'नह्येतस्मादिति' 'नेत्यन्यत्परमस्ती'ति द्वितीयपाठः । **दर्शयतीति** । श्रुतिः । नामधेयविषयं यथा तथाहुः **अथेत्यादि** । **तत** इत्यस्यार्थः आनन्तर्येऽथशब्दः । तदनन्तरम् । हीति चकारार्थः । ब्रवीति भूयो ब्रवीति । **तच्चेति** । सत्यत्वम् । वीप्सापक्षे ब्रह्मावसानं तस्मिन् । ब्रह्मण्यवसानं यस्य निषेधस्य तस्मिन्सत्युपपद्यते । **सर्वेति** । सर्वेषां साक्षित्वात् । **इत्यादीति** । 'ततस्तु तं पश्यते निष्कलं ध्यायमान' इति । **परेति** । परं च इतरात्मा चेति तयोः । **प्रकाशेति** । आदिना चन्द्रः । **अङ्गुलीति** । आदिना आदर्शः । यथासंख्यमधिकरणानि । **कर्मस्विति** । **कर्मणी**ति सौत्रपदार्थः । अस्य विवरणमुपाधिष्विति रूढ्या । **सविशेषा** इति । विशेषा अङ्गुल्यादयः तैः सह समाना वा सविशेषाः । **एवेति** । 'मृत्योः स मृत्युमाप्नोती'ति श्रुतेरेवेति । **ऐकात्म्यमेवेति** । 'यत्र त्वस्य सर्वमात्मैवाभू'दिति श्रुतेरेवकारः । **अभ्यासा-**

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भाष्यप्रकाशः।

दिव्यम्', 'यः सर्वाणि भूतान्यन्तरो यमयती'त्यादौ ध्यातृध्येयत्वद्रष्टृद्रष्टव्यत्वाभ्यां गन्तृगन्तव्यत्वेन नियन्तृनियन्तव्यत्वेन च भेदो व्यपदिश्यते। 'तत्त्वमसि''अहं ब्रह्मास्मि', 'एष त आत्मा सर्वान्तर एष त आत्मान्तर्याम्यमृत' इत्यभेदश्च। एवमुभयव्यपदेशे सति यद्यभेद एकान्त एव गृह्यते, तदा भेदव्यपदेशो निरालम्बन एव स्यात्। अतो यथा अहिरित्यभेदः, कुण्डलाभोगप्रांशुत्वादीनीति भेदः, एवमिहापि उभयव्यपदेशदर्शनादङ्गीकर्तव्यः। अथवा। यथा सौर्यः प्रकाशस्तदाश्रयश्च सूर्यो नात्यन्तभिन्नौ, उभयोस्तेजस्त्वाविशेषात्, अथ च भेदव्यपदेशभाजौ भवतः, एवमिहापीतिव्याख्याय, ततः, पूर्ववद्वेत्यादिसूत्रद्वयं सिद्धान्तीयत्वेनाभिप्रेत्य, यथा वा, 'प्रकाशादिवच्चावैशेष्य'मिति सूत्रे पूर्वमुपन्यस्तं तथैवैतद्भवितुमर्हति। तथा सत्यविद्याकृतत्वाद्बन्धस्य विद्यया मोक्ष उपपद्यते। यदि पुनः परमार्थत एव बद्धः कश्चिदात्माऽहिकुण्डलन्यायेन परमात्मनः संस्थानभूतः प्रकाशाश्रयन्यायेन वा एकदेशभूतोऽङ्गीक्रियते, तदा बन्धस्य पारमार्थिकत्वेन तिरस्कर्तुमशक्यत्वान्मोक्षशास्त्रवैयर्थ्यं स्यात्। श्रुतिश्च भेदाभेदौ न तुल्यवद्व्यपदिशति, किन्त्वभेदं प्रतिपाद्यत्वेन निर्दिशति। भेदं तु पूर्वप्रसिद्धमेवानुवदत्यर्थान्तरविवक्षया। किञ्च। 'नान्योऽतोऽस्ति द्रष्टे'त्यादिना चेतनान्तरं निषेधति, 'अथात आदेशो ने'ति, 'तदेतद्ब्रह्मापूर्वमनपर'मित्यादिना च प्रपञ्चम्। अतोऽन्यनिराकरणाद्ब्रह्ममात्रपरिशेषणाच्च 'प्रकाशादिवच्चावैशेष्य'मितिसूत्रोक्त एव सिद्धान्त इत्याहुः।

तदसङ्गतम्। तद्रीतिके प्रथमसूत्रव्याख्याने मूर्तामूर्तप्रतिषेधस्य 'प्रकृतं प्रतिषेधती'त्येतावतैव सिद्धेरेतावत्त्वमित्यस्य, एतावत्त्वपदादरे च प्रकृतपदस्य वैयर्थ्यप्रसक्तेर्दुर्निवारत्वात्। एतावत्त्वमिति त्वप्रत्ययस्य भावेऽनुशिष्टत्वेन एतावता परिच्छिन्नस्य मूर्तामूर्तलक्षणरूपद्वयस्य तेन पदेनालाभात्। त्वस्य षष्ठ्यन्तादनुशिष्टत्वेन तृतीयान्तादभवनेनापि तथात्वाच्च। अथ तन्न विग्रहवाक्यम्, किन्त्वर्थमात्रकथनमित्युच्यते, तदापि रूपद्वयात्मकस्य सर्वस्य प्रपञ्चस्य परिच्छिन्नान्तर्निवे-

रश्मिः।

दिति सौत्रं पदं व्याकरोति स्म **तथाहीति**। अविद्यां विधूयेत्यावरणभङ्गः। **तद्वतार्येति**। सूत्रद्वयमवतार्य। **एवेति**। आलम्बनयोगव्यवच्छेदकः। **अतो यथेति**। रज्जुरहिरित्यभेदः। अहेः कुण्डलमाभोगो रज्जुः। प्रगतः अंशुः प्रांशुः तत्त्वम्। **उभयेति**। भेदाभेदव्यपदेशदर्शनात्। प्रकाशाश्रयसूत्रव्याख्यानमाहुः **अथवेति**। **भेदव्यपेति**। सूर्यस्य प्रकाश इति प्रयोगादिति भावः। **अभिप्रेत्येति**। इत्याहुरित्यनेनान्वेति। कथं सिद्धान्तत्वेनाभिप्रेतत्वमित्यतः पूर्वसूत्रीयभाष्यं प्रक्षिपन्ति स्म **यथा वेति**। **इतीति**। इति पूर्वं तस्मिन्सूत्र उपन्यस्तमितियोजना। एतदिति ब्रह्म। **बन्धस्य** भेदस्य। मोक्षोऽभेद उपपद्यते। **संस्थानेति**। ध्यातृध्येयादिभावात्तथा। **एकदेशेति**। भेदव्यपदेशभाक्त्वपक्षे ब्रह्मण एकदेशभूतः। **भेदं त्विति**। ध्यातृध्येयभावाद्भेदं तु पूर्वं अविद्यावस्थायां प्रसिद्धम्। **एवेति**। सार्वत्रिकत्वादेवेति। **अन्विति**। सिद्धस्य कथनमनुवादः। **अर्थोऽभेदः अन्योर्थः** भेदः अर्थान्तरं तस्य विवक्षया। प्रतिषेधसूत्रार्थमाहुः **किञ्चेति**। **एवेति**। अपिसंराधनसूत्रोक्तस्य सिद्धान्तत्वयोगव्यवच्छेदकैवकारः। ननु प्रकृतं मूर्तामूर्तं एतावत्त्वं यत्पदं इत्येवमेतावत्त्वपदादरे तस्य तद्वाच्यत्वे लक्षणायाः क्वचित् सिद्धत्वेनादोषाद्दूषणान्तरमाहुः **प्रकृतपदस्येति**। **मूर्तामूर्तेति**। भावप्रत्ययरहितस्य। **तेनेति**। भावप्रत्ययसहितेन। **तृतीयान्तादिति**। एतावता मूर्तामूर्तेन भावः प्रकृतजन्यबोधे प्रकारः एतावत्त्वम्। प्रकृतेन मूर्तामूर्तेन विशेषणेन जन्यो नेति नेतीत्युक्तब्रह्मविशेष्यकबोधः तत्र प्रकारः। **तथात्वादिति**। तेन पदेनालाभात्। **अथेति**। भिन्नप्रक्रमे। **तत्** एतावत्ताभावः। **तदित्यव्ययात्**। एतावतोर्भाव

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

भाष्यप्रकाशः ।

शादेतावतेत्यत्राभिप्रेतस्य परिच्छेदकस्यालाभेनासङ्गतिः । नच लौकिकप्रमाणमेव तथेति वाच्यम् । जन्मादिसूत्रव्याख्याने 'मनसाप्यचिन्त्यरचनारूपस्ये'ति स्वोक्तस्य प्रपञ्चविशेषणस्य विरोधेन तथा वक्तुमशक्यत्वाच्च । किञ्च, अत्र मूर्तामूर्ते रूपद्वयं यत्प्रकृतत्वेन विवक्षितं तत्प्राधान्यमालम्ब्य । तत् तस्य किं स्वेन रूपेण ब्राह्मरूपत्वेन वा । नाद्यः । ब्रह्मणो रूपे इति विशेषणवैयर्थ्यप्रसङ्गात् । द्वितीये तु ब्रह्मण एव प्राधान्यम् । ब्रह्मपरिचायनार्थमेव रूपद्वयस्य कथनात् । ब्रह्मण एवात्रोपदेश्यत्वाच्च । नच सम्बन्धषष्ठ्यन्तपदेन बोधनाद्ब्रह्मणोऽप्राधान्यमिति युक्तम् । 'राहोः शिर' इतिवदभेदेपि षष्ठीभवनेन सम्बन्धषष्ठ्या प्राधान्याबाधात् । 'आनन्दं ब्रह्मणो विद्वा'नित्यत्र स्वयमप्यभेदे षष्ठ्याः स्वीकृतत्वात् । कार्ये कारणानन्यत्वस्य भगवता सूत्रकारेणोक्ततया 'द्वे वा व ब्रह्मणो रूपे' इत्यत्र ब्रह्माभिन्ने रूपे इत्यर्थस्य वक्तुमुचितत्वाच्च । अतो ब्रह्मणः प्राधान्यस्याविघातात् 'ब्रह्म ते ब्रवाणी'ति वाक्योपन्यासेन स्वयमेवोपक्रान्तत्वाङ्गीकारादग्रे उपदेश्यत्वाच्च ब्रह्मणः प्रकृतत्वसिद्धौ तस्मिन्नेतावत्त्वं परिच्छिन्नत्वं प्रतिषेधतीत्येव व्याख्यातव्यम् । एतावच्छब्दस्य परिच्छिन्नवाचकतायाः प्रसिद्धत्वात् । तथाच मूर्तामूर्तमात्रत्वं ब्रह्मणि नास्तीत्यर्थः सिध्यति, न तु प्रकृतं यदेतावता परिच्छिन्नमिति सिध्यति । एवञ्च, 'नेति नेती'ति श्रुतिव्याख्याने नञ्द्वयेन यथासंख्यं मूर्तामूर्तनिषेधे वासनाशेषात् तद्विहाय भूतराशिवासनाराश्योर्निषेधाङ्गीकारे परिगणितनिषेधेन, यदि नेदं ब्रह्म, किमन्यद्ब्रह्मेति शङ्कापत्तेस्तदपि विहाय वीप्सया यावद्विषयजातनिषेधो यदङ्गीकृतः, सोपि तथा । भूतराशिनिषेधे कैमुतिकादेव वासनाराशिनिषेधसम्भवेन तदर्थं निषेधापेक्षाभावात् । त्यक्ते यथासंख्ये वासनानिषेधावतारकप्रमाणाभावात्, वासनाया अनुक्तत्वेन तन्निषेधस्याप्ययुक्तत्वाच्च । अत एव न यावन्निषेधोपि युक्तः ।

यदपि 'न ह्येतस्मा'दिति 'नेत्यन्यत् परमस्ती'त्यस्य योजनाद्वयम् । तत्र प्रथमयोजनायां निषेधवीप्सया ब्रह्मव्यतिरिक्ताभाव उच्यते, न पुनर्ब्रह्माभावः, तदेव दर्शयति'अन्यत्परमस्ती'ति व्याख्यातम् ।

रश्मिः ।

एतावत्त्वमिति षष्ठ्यन्तविगृहीतस्यार्थमात्रकथनम् । **अभीति** । अभेदसंसर्गेणाभिप्रेतस्य मूर्तामूर्तरूपस्य परिच्छेदकस्यालाभेन एकस्य परिच्छेदकपरिच्छिन्नभावायोगात् परिच्छिन्नपरिच्छेदकभावासंगतिरित्यर्थः । **लौकिकेति** । यादृशपरिच्छेदकेन मूर्तामूर्तेन यादृशं मूर्तामूर्तं परिच्छिन्नमिति लौकिकप्रमाणं चक्षुरादि तदैव नतु अलौकिकं प्रमाणं तथा संगतिप्रयोजकम् । भाष्ये प्रकृते ब्रह्मणि यदेतावत्त्वं लौकिकधर्मवत्त्वं तत्समर्थयितुमाहुः **किञ्च, अत्रेति** । **प्राधान्येति** । मूर्तामूर्तयोः प्राधान्यमालम्ब्य तत्तस्य प्राधान्यं तस्य मूर्तामूर्तस्य । **स्वेन** मूर्तामूर्तरूपेण । **ब्राह्म(ण)** इति । मूर्तामूर्तब्राह्मणमिति ब्रह्मसम्बन्धिविशेषणरूपत्वेन । विशेषणस्य ब्रह्मणो वैयर्थ्यप्रसङ्गात् । **ब्रह्मण एवेति** । नतु मूर्तामूर्तयोरिति मूर्तामूर्तान्ययोगव्यवच्छेदक एवेति । **एवेति** । प्रसिद्धेरेवकारः । **ब्रह्मण एवेति** । 'द्वे वा व ब्रह्मणो रूपे' इत्युपक्रमात् । 'तेषामेष सत्य'मित्युपसंहाराच्चैवकारः । **स्वयमिति** । श्रुत्या । तदनन्यत्वसूत्रकारेण । **ब्रह्म ते ब्रवाणीत्यादि** । तथाच तद्भाष्यं प्रकृतसूत्रस्थम् । 'ब्रह्म ते ब्रवाणी'त्याद्युपक्रमविरोधात् । 'असन्नेव स भवति असद्ब्रह्मेति वेद चे'दित्यादिनिन्दाविरोधादिति । **अग्र** इति । उपसंहारे 'तेषामेष सत्य'मित्यनया । **प्रतीति** । प्रतिषेधत्येवेति व्याख्येयम् । अयोगव्यवच्छेदक एवकारः । **एतावतेति** । परिच्छिन्नत्वेन धर्मेण परिच्छिन्नं ब्रह्मेत्यर्थः । **त्यक्त** इति । वासनानिषेधापेक्षाभावात्त्यक्ते द्वितीयपक्षोक्ते यथासंख्ये । यद्वा । पूर्वप्रतिषेधो भूतराशिं निषेधत्युत्तरस्तु वासनाराशिमिति । **अत एवेति** । भूतराशिनिषेधेन कैमुति-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भाष्यप्रकाशः।

तदपि तथा। ब्रह्मव्यतिरिक्तनिषेधोत्तरं ब्रह्मसत्ताप्रदर्शनस्य अन्यदस्तीत्येतावतैव सिद्ध्या परपदवैयर्थ्यापत्तेः। अतो व्यतिरिक्तनिषेधेनाव्यतिरिक्तत्वं सर्वस्य स्वीकृत्य तावन्मात्रत्ववारणाय परं ब्रह्मान्यदस्तीत्यङ्गीकार्यमित्येव युक्तम्। द्वितीययोजनायामपि परपदवैयर्थ्यं पूर्ववदेव। तदर्थं परपदमुत्कृष्टार्थकतया व्याख्येयम्। तत्र चाभावावसान एव निषेधः सिध्यतीति ब्रह्मसत्तासाधनाय, 'ततो ब्रवीति च भूय' इति सूत्रांशं नामधेयविषयत्वेन योजयित्वा, नामधेयेन तत्सत्तां साधयित्वा, निषेधस्य ब्रह्मावसानत्वमुपपादितम्। तदपि तथा। नामधेयाङ्गीकारे तद्वत्तासिद्ध्या यावद्विशेषशून्यत्वप्रतिज्ञाहानिप्रसङ्गात्। नामधेयकथनमात्रेणैव तत्सत्तासिद्धेस्तन्निर्वचनश्रुतिवैयर्थ्यप्रसङ्गात्। तदादरे च 'चक्षुषश्चक्षु'रित्यादिवन्नियामकत्वतन्मूलरूपत्वयोः सिद्ध्या प्रतिज्ञाहानितादवस्थ्याच्च। एवं तदव्यक्तादिसूत्रद्वयेपि यदि ब्रह्मणो दृश्यत्वादृश्यत्वयोर्द्वयोरपि स्थापनम्, तदा तु विरुद्धधर्माश्रयत्वापत्तिः। यदि च साधनाभ्यासपाकवशात् दृश्यत्वम्, तदभावे अदृश्यत्वमिति व्यवस्था, तदापि दृश्यत्वस्य प्रामाणिकत्वे 'यतो वाच' इत्यादिश्रुतिविरोधतादवस्थ्यम्। अप्रामाणिकत्वे च 'कश्चिद्धीर' इत्यादिश्रुतेस्तदुक्तसाधनानां च वैयर्थ्यम्। अपिसंराधनसूत्रस्य च, न हि तेन कश्चिन्निर्णयः सिध्यति, अपि तु ब्रह्मणो दृश्यत्वबोधनेन, जीवब्रह्मणोः संराधकसंराध्याभावाद्भेदबोधनेन च संशयस्यैवोत्पत्तिरिति। यदपि प्रकाशादिवत्सूत्रे जीवब्रह्मणोरभेदं युक्त्या व्याख्याय तत्र प्रमाणापेक्षायां वेदान्तेषु जीवप्राज्ञयोरभेदप्रतिपादनाभ्यासो हेतुत्वेन व्याख्यातः। सोपि शिथिलः। सौत्रस्याभ्यासपदोक्तस्य हेतोरवैशेष्ये कर्मणि प्रकाशे च साधारण्येनोक्ततया

रश्मिः।

कन्यायादेव। **यावन्निषेध** इति। तृतीयवीप्सापक्षोक्तः। **तथेति**। अयुक्तम्। **सर्वस्येति**। मूर्तामूर्तप्रपञ्चस्य। **तावदिति**। प्रपञ्चमात्रत्ववारणाय। **इत्येवेति**। 'मायावादमसच्छास्त्र'मिति पाद्मात्। **पूर्ववदेवेति**। अन्ययोगव्यवच्छेदकः। **तदर्थमिति**। परपदवैयर्थ्यपरिहारार्थम्। **तत्र चेति**। द्वितीययोजनायाम्। **अभावावसान** इति प्रथमान्तम्। नेति न इत्येवमभावे पर्यवसानम्। निषेधोऽभावपर्यवसानः। एवकारस्तु यदा पुनः श्रुत्यक्षराण्येवं योज्यन्ते। **नह्यस्मादिति नेति**। नहि प्रपञ्चनिषेधरूपादेशनादन्यत्परं ब्रह्मण आदेशनं नास्तीति तदीयग्रन्थात्। **तत्सत्तामिति**। ब्रह्मसत्ताम्। **तथेति**। अयुक्तम्। **नामधेयेति**। मात्रचा 'ततो ब्रवीति च भूय' इति नामधेयवाचकेतरस्याः 'सत्यस्य सत्य'मित्यस्य व्यवच्छेदः। **एवेति**। मात्रजर्थानुवादः। **तत्सत्ता** ब्रह्मसत्ता तस्याः सिद्धेः। **तन्निर्वचनेति**। 'सत्यस्य सत्य'मिति श्रुतिवैयर्थ्यप्रसङ्गात्। **तदादर** इति। निर्वचनादरे। **नियामकेति**। सत्यमूलत्वं तन्मूलत्वम्। **प्रतिज्ञेति**। अरूपवत्सूत्रोक्ता। **इत्यादीति**। 'कश्चिद्धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन्' इति श्रुतेः। **तदुक्तेति**। धीरवृत्तचक्षुष्ट्वादीनाम्। **संशयस्यैवेति**। परेतरात्मनोरन्यत्वसंशयस्य। एवकारो व्याख्यानात्। **अभेदेति**। ज्योतिर्ब्राह्मणे 'यथा प्रियया स्त्रिया संपरिष्वक्तो न बाह्यं किञ्चन वेद नान्तरमेवमेवायꣳशारीर आत्मा प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किञ्चन वेद नान्तर'मिति। 'अत्र पिताऽपिता भवती'त्यादि। 'यद्वैतन्न पश्यति पश्यन्वैतद्द्रष्टव्यं न पश्यती'ति अभेदप्रतिपादनाभ्यासः। वक्ष्यमाणवृत्तौ तु 'तत्त्वमसी'त्याद्यभेदश्रुत्यभ्यासादित्यर्थ उक्तः। **अवैशेष्य इत्यादि**। वैशेष्ये अभेदे कर्मणि आत्माभिध्यानज्ञानादौ कर्मण्युपाधौ। **उक्ततयेति**। तथाच वृत्तिः। यथा सौरः प्रकाश आकाशो वाङ्गुल्याद्युपाधौ कर्मणि भिन्न इव वक्र इव भाति, वस्तुतस्त्वेकरूपः, तद्वत्प्रकाशे आत्माभिध्यानज्ञानादौ। कर्मण्युपाधौ। भिन्न इव वक्र इव भाति, वस्तुतस्त्ववैशेष्य-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

भाष्यप्रकाशः ।

जीवप्राज्ञाभेदाभ्यास एव नियमने प्रमाणानुपलम्भात् । वेदान्तेषु तयोरभेदस्येव भेदस्याप्यभ्यासदर्शनाच्च । यदप्युभयव्यपदेशादिसूत्रद्वयमेकदेशिमतीयत्वेन व्याख्याय, 'पूर्ववद्वे'ति सूत्रव्याख्याने तद्दूषणमुक्तम् । जीवात्मनः परमात्मसंस्थानभूतत्वे एकदेशभूतत्वे वाङ्गीक्रियमाणे बन्धस्य पारमार्थिकत्वेनातिरस्कार्यत्वापत्त्या मोक्षशास्त्रवैयर्थ्यमिति । तदपि तथा । 'बहु स्यां प्रजायेये'तीच्छाभ्यां भेदस्यागन्तुकत्वावगमाद्बन्धस्य पारमार्थिकत्वेपि तथात्वात् पल्यूलनेन वस्त्रमालिन्यस्येव शास्त्रीयसाधनैर्बन्धनाशसम्भवेन शास्त्रवैयर्थ्याभावात् । एवं प्रतिषेधसूत्रे 'नान्योऽतोऽस्ति द्रष्टे'ति चेतनान्तरनिषेधो य उक्तः, सोपि द्रष्टुर्ब्रह्माभिन्नत्वं वदति, न तु ब्रह्मणो द्रष्टृभिन्नत्वम्, अतो न तद्व्यवसायसाफल्याय । 'नेति नेती'ति वाक्यं 'तदेतद्ब्रह्मापूर्व'मिति वाक्यं च यथायथं प्रपञ्चस्य ब्रह्माभिन्नत्वं ब्रह्मणः सर्वाकारत्वं च वदतीति प्रागेवोपपादितम् । अतोऽन्यनिषेधो यो वर्तते, स सर्वं ब्रह्मणोऽन्तर्निवेश्येतरं निषेधति, न तु सर्वं मिथ्याकृत्येति सुधीभिरवधेयम् ।

भास्कराचार्यस्तु । विंशतिसूत्रमेकमेवाधिकरणमङ्गीकृत्य, सगुणासु शाण्डिल्यविद्यादिषु सगुणोपासितस्य प्रतिप्रकरणं चोदनासामर्थ्येन निर्णीतत्वात् तत्र नायं विचारः, किन्तु निर्गुणब्रह्मचोदनायां साकारं निराकारं च ब्रह्मोपास्यम्, उतैकतरमिति जिज्ञासायाम्, यथास्थितवस्तूपासनस्य युक्तत्वात् कारणात्मना प्रपञ्चात्मना चावस्थितमुपास्यमिति प्राप्तेऽभिधीयते । नोभयलिङ्गमुपास्यम् । कुतः । अस्थूलादिवाक्यैः समस्तप्रपञ्चाकारस्य निवर्तितत्वात् । स्वतश्च कारणस्य कूटस्थनित्यस्यैकस्याद्वितीयत्वात् । पाश्चात्यस्य कार्यरूपस्य कादाचित्कत्वात् । ननु कारणस्य विकारात्मकत्वा-

रश्मिः ।

रूपत्वमेवात्मनः । कुतः । अभ्यासात् । 'तत्त्वमसी'त्याद्यभेदश्रुत्यभ्यासादित्यर्थ इति । अवैशेष्ये दार्ष्टान्तिके यः स दृष्टान्तयोरपीति । एवेति । ननु कर्मप्रकाशयोरित्येवकारार्थः । **तयोरिति** । जीवप्राज्ञयोः । **भेदस्यापीति** । अपिसंराधनसूत्रेऽस्मद्भाष्योक्तरीत्याभ्यासदर्शनात् । **परमात्मेति** । अहिकुण्डलन्यायेन परमात्मनः संस्थानभूत इत्युक्तप्रकारेण । प्रकाशाश्रयन्यायेन एकदेशभूतत्वे । **पारमार्थिकत्वेनेति** । संस्थानभूतस्यैकदेशभूतस्य परमार्थस्य धर्मः पारमार्थिको बन्ध इति । **तथेति** । शिथिलम् । **तथात्वादिति** । तिरस्कार्यत्वात् । **पल्यूलनेनेति** । वस्त्रमालिन्यनाशसाधनेन । **बन्धनाशेति** । बन्धतिरोभावसम्भवेन । अतो ब्रह्मणोऽन्यो भिन्नो न द्रष्टास्तीति योजनामाहुः **सोपीति** । 'अधिकं तु भेदनिर्देशा'दिति सूत्रादाहुः **नत्विति** । **तद्व्यवेति** । ब्रह्माद्वितीयत्वरूपफलेन सर्वमिथ्यात्वव्यवसायस्य साफल्यं मिथ्या तस्मा इत्यर्थः । **प्रागेवेति** । 'दर्शयति चे'ति सूत्रे ब्रह्माभिन्नत्वं स्पष्टम् । 'तदेतद्ब्रह्मे'त्यपि तत्र स्पष्टम् । **अन्तरिति** । 'स्वसृष्टमिदमापीये'ति वाक्यात् । **इतरमिति** । प्रपञ्चम् । **सुधीभिरिति** । शोभना ब्रह्मगोपनाभावेन मोक्षार्था धीर्येषां तैः ।

विंशतीति । 'न स्थानतोपी'तिसूत्रमारभ्य 'प्रतिषेधाच्चे'त्यन्तम् । **एवेति** । न तु द्वयमिति द्वययोगव्यवच्छेदक एवेति । **शाण्डिल्येति** । छान्दोग्यपञ्चमप्रपाठकेऽस्ति 'सर्वं खल्विदं ब्रह्मे'त्यादिशाण्डिल्यविद्या । 'इति ह स्माह शाण्डिल्यः शाण्डिल्य'इति श्रुतेः । आदिना कोशविज्ञानम् । 'अन्तरिक्षोदरः कोश'इत्यादिश्रुतेः । तदग्रे कोशविद्या । तदग्रे यज्ञसम्पादनं 'पुरुषो वाव यज्ञ' इत्यादिना । **चोदनेति** । 'सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीते'त्यत्रोपासीतेत्युपासनाचोदना । कोशविज्ञाने चोदना । 'सामवेदं प्रपद्य' इति लेडाश्रयणात् । 'य एवं वेदे'ति यज्ञसम्पादने चोदनालेडाश्रयणात् । **नोभ-**

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भाष्यप्रकाशः।

द्विकारपरित्यागे कारणस्वरूपस्यापि त्यक्तत्वात् कारणत्वेनोपासनमपि हीयेतेति चेत्, नेत्युच्यते। न पृथिव्यादिस्थानतोपि परस्योभयलिङ्गता। ब्रह्मणः स्वतोऽभिन्नत्वात्। स्थानकृतस्य रूपस्य चागन्तुकत्वात्। ब्रह्मात्मको हि नामरूपप्रपञ्चः, न प्रपञ्चात्मकं ब्रह्म। यथा समुद्रात्मकः फेनतरङ्गादिः, न तदात्मकः समुद्र इति। कथं पुनर्गम्यते, सर्वत्र, वेदान्तेषु, 'अशब्दमस्पर्शम्,' 'स एष नेति नेत्यात्मा,' 'अस्थूल'मित्यादिषु भूतभौतिकनिराकरणात्। नचैतैः प्रपञ्चस्य मायामात्रत्वप्राप्तिः। कारणे कार्यरूपं अनेकविधं नास्तीत्येतावदवधारणेनैव वाक्योपपत्तेः प्रपञ्चाभावस्य प्रतिपत्तुमशक्यत्वादित्येवं प्रथमसूत्रं व्याख्याय, 'न भेदा'दितिसूत्रे प्रथमं नकारमपठन्तः, 'सर्वाणि भूतानि सर्व एवात्मानः समर्पिता' इति श्रुतेर्नेमिस्थानीयेन बाह्यप्रपञ्चेन वेष्टितानामरस्थानीयानां विज्ञानात्मनामन्तरतमे रथचक्रनाभिस्थानीये परमात्मनि समर्पणाद्भेदोऽवगम्यते, अतो भोग्यभोक्त्राकारवदुपास्यमिति सूत्रांशेनाशङ्क्य, 'न प्रत्येकमतद्वचना'दित्यनेन मधुविद्यायां प्रत्युपाधि भेदवचनाभावाद्यत्र सर्वेषां चेतनाचेतनानामेकीभावः, स एव परमात्मा ध्येयत्वेनोपदिश्यत इति व्याख्याय, तन्मात्रसूत्रे चैतन्यमात्रं ब्रह्मेति व्याख्याय, 'ब्रह्मायाति प्रपञ्चोऽयं रूपं हित्वा तु वैकृतम्। जहाति कठिनावस्थां जलधौ लवणं यथा। चेतनेऽचेतनं क्षिप्तमभेदाच्चेतनीभवेत्। उषायां वस्तु विन्यस्तं तत्सर्वं लवणीभवेत्' इत्येतावदधिकमुक्त्वान्यानि सूत्राणि शङ्कराचार्यवत् व्याचक्रुः। ततः प्रकृतैतावत्त्वसूत्रे च प्रकृतस्य पुरुषस्य यदेतावत्त्वं मूर्तामूर्तोपाधिपरिच्छिन्नत्वं तत्प्रतिषेधति, ततो निर्विकल्पकं परिशिष्टं ब्रह्म भूयः पुनर्ब्रवीति, अन्यत् परमस्तीति व्याख्याय, शङ्कराचार्योक्तामधिकरणान्तरकल्पनां सर्वोपनिषद्वदस्यामप्युपनिषदि ब्रह्मण उपक्रमोपसंहारयोरव-

रश्मिः।

येति। कार्यकारणोभयलिङ्गम्। सूत्रं व्याचक्षते स्म **न पृथिव्यादी**ति। अत्र भेदाभेदावेतन्मते तावनुसंधेयौ। **स्वत** इति। कारणात्मना। अभेदस्तु कटकं सुवर्णमितिवत्। **रूपस्ये**ति। कार्यरूपस्य। कटकं सुवर्णं सुवर्णं कटकं नेति प्रतीत्याहुः **ब्रह्मात्मक** इति। **तदात्मक** इति। फेनतरङ्गबुद्बुदात्मकः। **सर्वत्रे**ति सौत्रांशव्याख्या **सर्वत्रे**त्यादि। **भूतभौतिके**ति। भूतौ शब्दस्पर्शौ वाय्वाकाशतन्मात्रारूपौ। भौतिकं स्थूलं वाय्वाकाशरूपम्। तयोर्निराकरणात्। **एतै**रिति। भूतभौतिकनिराकरणैः। **अनेके**ति। न एकविधं अनेकविधं शब्दतत्स्थूलाकाशविधं स्पर्शतत्स्थूलवायुविधं नास्ति, किन्तु शब्दस्पर्शरूपं भूतसूक्ष्मरूपं कार्यरूपमिति। एवकारोऽन्ययोगव्यवच्छेदकः। 'अशब्दमस्पर्श'मित्यादिवाक्योपपत्तेः। **सर्वाणी**ति। मधुब्राह्मणस्था। **एवात्मान** इत्यत्र एते आत्मान इत्यपि पाठः। नेमी रथचक्रवलयम्। अरा वलयेऽर्पिताः स्थूलशलाकाः। **रथचक्रे**ति। नाभी रथचक्रपिण्डिका। **भोग्ये**ति। भोग्यः प्रपञ्चो नेमिः। भोक्तारो जीवा अराः। उपास्यं परमात्मा नाभिः। **इत्यनेने**ति। सूत्रांशेन। **प्रत्युपाधी**ति। क्रियाविशेषणानां नपुंसकत्वमेकवचनान्तत्वं च। उपाधिपृथिव्यादि लक्षीकृत्येति प्रत्युपाधि। **स एवे**ति। अत्रेति बोध्यम्। अन्ययोगव्यवच्छेदक एवकारः। **आयाती**त्यादि। आसमन्तादाप्नोति। **कठिने**ति। पृथिव्यवस्थाम्। 'यत्कठिनं सा पृथिवी'ति श्रुतेः। **उषाया**मिति। रात्रौ क्वचित्। **अधिकरणान्तरे**ति। मूर्तामूर्तब्राह्मणं विषयः। सन्देहः ब्रह्म वा मूर्तामूर्ते वा प्रतिपाद्ये इति। मूर्तामूर्ते सत्यमित्युपसंहाराद्ब्रह्मणोऽप्रत्यक्षत्वाच्च प्रतिपाद्ये इति पूर्वपक्षः। ब्रह्मप्रतिपाद्यमुपक्रमस्यासञ्जातविरोधित्वात् ब्रह्मणोऽप्रत्यक्षत्वेपि शून्यवादप्रसङ्गादिति सिद्धान्तः। तदिदं नाधिकरणान्तरम्। तत्र तृतीयान्तं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भाष्यप्रकाशः ।

स्थानात् सन्देहानुत्पत्त्या निरस्य, शेषं शङ्कराचार्यवदेव व्याख्यातवन्तः ।

तथाच तन्मते कारणस्यावस्थाविशेष एव कार्यम् । तन्तुनाभदृष्टान्तात् । अतो निमित्तवशादेव नानाकारः । स यद्यसन्नेवोत्पद्यते, तदा असतः सत्तानिषेधकश्रुतिविरोधः । अतः सन्नेव निमित्तवशाद्व्यज्यते । कारणं च ब्रह्म यथाकाशोऽविक्रियमाण एव वायुजनकः, एवमविक्रियमाणमेव प्रपञ्चजनकम् । तच्च कृत्स्नप्रसक्त्यादिदोषवारणार्थं श्रुतिबलादेव भगवता सूत्रकारेणाङ्गीकृतम् । स्वयमपि तथैव व्याख्यातम् । निमित्तं चात्रेच्छैव । परिणतिश्च शक्तेरेव । शक्तिशक्तिमतोर्नात्यन्तं भेदो गुणगुणिनोरिवेतरेतराविनाभावादिति तदनन्यत्वाधिकरणे व्युत्पादितम् ।

तत्रेदमवधेयम् । यदि श्रुतिबलादेवमवधारितम्, तदा ब्रह्मणि युक्तीनां लौकिकीनामकिञ्चित्करत्वादचिन्त्यसामर्थ्यं त्वङ्गीकृतमेव । तथा सति तेनैव विरुद्धधर्माश्रयत्वाद्दोषपरिहारसिद्धौ कुतः कारणरूपस्य केवलनिर्विकल्पकत्वाग्रहः । नचाशब्दादिवाक्येभ्य इति युक्तम् । तेषां यथा भूतभौतिकनिराकरणेऽप्युभयलिङ्गताप्रतिपादकत्वं तथोपपादितत्वात् । नापि 'कश्चिद्धीर' इति वाक्यात् । 'तं यथा यथोपासत' इति श्रुत्या तादृगुपासकेन तथादर्शनेपि तेन लिङ्गान्तरबाधस्याशक्यवचनत्वात् । सूत्रस्थेन केवलेन सर्वत्रेतिपदेन भूतभौतिकनिराकरणात्मकस्य हेतोरलाभात् । मधुविद्यायामपि यत्रैकीभावस्तादृशरूपस्य ध्येयत्वोपदेशेपि 'तदेतद्ब्रह्मापूर्व'मित्युपसंहारवाक्येपि

रश्मिः ।

हेतुमाहुः सर्वैत्यादिना सन्देहानुत्पत्त्येत्यन्तेन । यद्यप्यत्र गार्गिब्राह्मणेऽस्थूलादिवाक्यं पञ्चमप्रपाठकीयशाण्डिल्यविद्यादिषु 'सर्वकर्मा सर्वकाम' इति वाक्यम्, तथाप्यन्यसंग्रहाय सर्वत्वेनोपनिषद्गृहीता । अस्यामिति । मूर्तामूर्तब्राह्मणीयायामुपनिषदि । ब्रह्मण इति । 'द्वे वाव ब्रह्मणो रूपे' इत्युपक्रमः । 'तेषामेष सत्य'मित्युपसंहारः । रूपे वा रूपवद्वेति सन्देहानुत्पत्त्या इति हेतुः । निरस्येति । विंशतिसूत्रात्मकाधिकरणमिति नवसूत्र्यामधिकरणत्वं निरस्य । एवेति । भास्करभाष्याभ्याससूचनेनान्ययोगव्यवच्छेदक एवकारः । एवेति । दृष्टान्तसद्भावात् । निमित्तेति । क्रीडेच्छा निमित्तं तद्वशात् । तन्तुनाभवत् । एवेति । 'सदेव सोम्येदमग्र आसी'दित्यत्र सदितरव्यवच्छेदात् 'स ईक्षांचक्र' इत्यत्र निमित्तप्रदर्शनादन्ययोगव्यवच्छेदकैवकारः । असत इति । श्रुतिस्तु 'असन्नेव स भवति असद्ब्रह्मेति वेद चे'दिति । एवेति । चिन्तामणिदृष्टान्तसत्त्वादेवकारः । तच्चेति । अविकृतत्वम् । आदिना 'निरवयवत्वशब्दकोपो वा' । सूत्रेति । 'कृत्स्नप्रसक्तिनिरवयवत्वशब्दकोपो वे'ति सूत्रकारेण । स्वयमिति । भास्कराचार्यैः । इच्छैवेति । श्रुतेरेवकारः । शक्तेरेवेति । निर्गुणत्वाच्छक्तिमतो योगस्य व्यवच्छेदकैवकारः । तदेति । श्रुतिविचारकाले । एवेति । अवधारणेनैवकारार्थेन हेतुना । अशब्दादीति । अत्रैव पूर्वमुक्तेभ्यः । तेषामिति । इदमपि व्याख्यातम् । उपेति । दर्शयति चेति सूत्रोपन्यास एव पूर्वम् । भास्करभाष्योक्तेतरामप्याहुराशङ्काम् । नापीति । तादृगुपासकेनेति । तादृगिति रूढशब्दः । महाभाष्ये तु सोयं स इव दृश्यमानस्तमिवात्मानं पश्यतीति कर्मकर्तरि व्युत्पत्तिर्दर्शिता । सोयं तादृगुपासकः स इव आत्मदर्शीव अन्यैर्दृश्यमानस्तमिवात्मदर्शिनमिव स्वात्मानं पश्यतीत्यर्थः । तादृगुपासकेन । लिङ्गान्तरेति । निर्विकल्पकलिङ्गादन्यलिङ्गं सविकल्पकत्वलिङ्गं तस्य बाधस्य । अलाभादिति । सूत्रस्य सारवद्विश्वतोमुखत्वादिति भावः । विकल्प इति चेदोम् । भगवत्क्रीडार्थत्वात्सर्वमतानाम् । अपीति । अनेन यत्रैकीभावः, तत्रापि ध्येयत्वेन सर्वरूपत्वपदार्थसम्भावना । उपेति । शङ्कराचार्य-

१. उभयव्यपदेशाधिकरणे ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भाष्यप्रकाशः।

सर्वरूपत्वबोधनस्योपपादितत्वाच्च। एवं तन्मात्रसूत्रविषयवाक्येपि कृत्स्नपदादेवाकारलाभो व्युत्पादित इति न तेनापि केवलनिराकारत्वसिद्धिरिति शाङ्करमतनिराकरणादेवैतदपि निराकृतं बोध्यम्।

विज्ञानभिक्षुस्तु। 'न स्थानतोपी'त्यादिचतुःसूत्र्या नित्यज्ञानेच्छादिमती ब्रह्मणो यान्तरङ्गशक्तिस्तद्द्वारकं ब्रह्मणो लक्षणमुच्यते, 'प्रकाशवच्चावैयर्थ्या'दित्याद्येकादशसूत्र्या जीवसाधारणं ब्रह्मस्वरूपमुच्यते, शेषैः सूत्रैस्त्वापादसमाप्ति ब्रह्मप्रपञ्चयोर्भेदाभेदौ परीक्ष्येते इति प्रतिज्ञाय, परस्य परमात्मन उभयलिङ्गं ज्ञानाज्ञानरूपधर्मद्वयं यथोक्तजाग्रदाद्यवस्थासम्बन्ध इति यावत्, स स्थानतः अभिव्यक्तिस्थानभूतादुपाधेरपि न, किन्त्वविलुप्तोपाधित्वात् सदा सर्वसाक्षित्वसदैश्वर्यसदानन्दत्वाद्येकरूपत्वमेव, कुतः, सर्वत्र हि, हि यस्मात् सर्वत्रैव वस्तुनि अधिष्ठातृतया परस्तिष्ठति। 'यः सर्वेषु तिष्ठन् सर्वमन्तरो यमयती'ति श्रुतेः। तच्च सर्वाधिष्ठानं साक्षित्वाद्यनित्यत्वे सति न सम्भवति, स्वाज्ञानकालीने कार्ये अधिष्ठानासम्भवादित्यर्थः। तथाचौपाधिकानेकरूपत्वाभावोपि परमात्मनो जीवव्यावृत्तं लक्षणम्, जीवे चाल्पं साक्षित्वादिकम्, तदप्यनित्यमिति व्याख्याय, द्वितीयसूत्रे च 'न भेदा'दिति पाठमङ्गीकृत्य, परस्य ब्रह्मण उभयलिङ्गत्वाभावो न घटते, माण्डूक्ये विश्वतैजसप्राज्ञतुरीयाभिधचतुष्पादकथने जाग्रदाद्यवस्थाभिर्ज्ञानाज्ञानरूपलिङ्गभेदश्रावणादिति चेत्, न, प्रत्येकमतद्वचनात्, 'नान्तःप्रज्ञं न बहिःप्रज्ञं नोभयतःप्रज्ञं न प्रज्ञानघनं न प्रज्ञं नाप्रज्ञ'मित्यादिना वाक्यशेषेण प्रत्येकं तत्तदवस्थावदन्यत्ववचनात्। अत्र 'नान्तःप्रज्ञ'मित्यनेन स्वप्नावस्थायाः प्रतिषेधः। 'न बहिःप्रज्ञ'मित्यनेन जाग्रदवस्थायाः। 'नोभयतःप्रज्ञ'मिति मोहावस्थायाश्चोक्तः। 'न प्रज्ञानघन'मित्यनेनेच्छाकृत्यानन्दसम्भेदाज्जीवस्वरूपतो व्यावृत्तिरुक्ता। 'न प्रज्ञ'मित्यनेन चैतन्याश्रयत्वनिषेधः। 'नाप्रज्ञ'मित्यनेन सुषुप्तिमरणाद्यवस्थाः प्रतिषिद्धाः। अतो नावस्थाभिर्ब्रह्मण उभयलिङ्गत्वमित्यर्थं व्याख्याय, अग्रिमसूत्रे चैतमेवार्थमुपष्टभ्य, नन्ववस्थावत्त्वतद्राहित्ययोस्तुल्येपि श्रावणे कथं तद्राहित्यवाक्यानामेव बलवत्त्वमवधारितमित्यत आह

रश्मिः।

मतदूषकग्रन्थे उपपादितत्वात्। कृत्स्नपदादिति। तथाच भाष्यं 'स यथा सैन्धवघनोऽनन्तरोऽबाह्यः कृत्स्नो रसघन एवे'ति। एवेति। सदृशत्वादेवकारः। अन्तरङ्गेति। सदा सर्वसाक्षित्वादिरूपा वक्ष्यमाणा। तद्द्वारकं अन्तरङ्गशक्तिजनकसत्यादित्वम्। अत्राविभागाद्वैतमनुसन्धेयम्। 'यथा मधु मधुकृतो निस्तिष्ठन्ती'ति छान्दोग्यीयद्वितीयोपदेशरूपम्। जीवेति। जाग्रदादीति। सुषुप्तावज्ञानम्। 'न किञ्चिदवेदिष'मिति प्रतीतेः। उपाधेरिति। अणुत्वोपाधेर्जीवस्येवेश्वरस्य महत्त्वोपाधेरपि न। सदेति। आदिना चित्त्वम्। एवेति। उभयलिङ्गयोगव्यवच्छेदकैवकारः। ज्ञानाज्ञानेति। विश्वतैजसौ ज्ञाने प्राज्ञोऽज्ञाने। वाक्येति। एकरूपत्वमुभयलिङ्गत्वं वेति सन्देहोऽयं वाक्यशेषः। अविभागाद्वैतभङ्गाशङ्कायां अविभागाद्वैतस्थापकः। प्रत्येकं अन्तःप्रज्ञादि लक्षीकृत्य जाग्रदाद्यवस्थातद्वतोन्तःप्रज्ञादेरन्यत्वस्य भेदस्य वचनात्। मधुवदन्तःप्रज्ञाद्येकरूपमित्यर्थः। इच्छेति। प्रज्ञानमिच्छा करणव्युत्पत्त्याऽनयैव व्युत्पत्त्या प्रज्ञानं कृतिः भावव्युत्पत्त्यानन्दः प्रज्ञानानां घनं सम्भेदो मिश्रणमिति यावत्। प्रज्ञानघनम्। जीवेति। विज्ञानघनात्। इत्यनेनेति। जानातीति ज्ञः प्रकर्षेण ज्ञः प्रज्ञ इति व्युत्पादितेन। चैतन्येति। ज्ञानस्य कृत्यनधीनत्वादाश्रये लक्षणा। सुषुप्तीति। सुषुप्तावज्ञानेऽप्रज्ञत्वम्। आदिना मूर्च्छा। उभयेति। किन्त्वेकरूपत्वम्। एवेति। नत्ववस्थावत्त्ववाक्यानाम्।

CC-0. Agamnigam Digital Preseyation Foundation, Chandigarh

भाष्यप्रकाशः ।

'अरूपवदेव ही'ति । हि यस्मात् अरूपवदेव ब्रह्म । मूर्तामूर्तब्राह्मणाज्जाग्रदाद्यवस्थाहेतुभूतस्थूलसूक्ष्मशरीरद्वयरहितमेव ब्रह्म प्रतिपत्तव्यम्, कुतः, तत्प्रधानत्वात्, 'ततो यदुत्तरतरं तदरूपमनामय'मिति, 'यन्मनसा न मनुते येनाहुर्मनो मतम्, तदेव ब्रह्म त्वं विद्धी'त्यादिश्रुतीनां तत्परत्वात्, अवस्थाधारैर्मनआदिकरणैः शून्यस्यैव ब्रह्मणः सम्यग्ज्ञानविषयत्वावधारणादित्यर्थः । अपिच, 'अथात आदेशो नेति नेति, न ह्यस्मादिति नेत्यन्यत् परमस्ती'ति मूर्तामूर्तरूपाभावादेशस्यैव पारमार्थिकत्वं वदति, तदेवमुभयलिङ्गत्वनिषेधेनैकमात्ररूपत्वमुपाधिसाधारण्येन लक्षणमुक्तमित्याह ।

तदसङ्गतम् । सर्वत्रेति पदेन सर्वाधिष्ठानश्रुतय एवाभिप्रेयन्त इत्यत्र गमकस्यानुपलम्भात् । अथ जीवस्य पूर्वं निरूपितत्वात् तद्वद्ब्रह्मण्यप्युभयलिङ्गत्वशङ्कायां तन्निरासायास्य सूत्रस्य प्रवृत्तत्वादर्थादेव तस्य हेतोः प्राप्तिरिष्यते, तदाप्येतादृशैकलिङ्गत्वस्य ब्रह्मलक्षणत्वमात्रं युक्तम् । श्रुतिसिद्धत्वात् । न तु लक्षणस्योपाधिसाधारण्यमपि युक्तम् । परमेश्वरस्य कारणसत्त्वोपाधिकत्वे प्रमाणानुपलम्भात् । पूर्वं स्वयमपि 'न स्थानतोऽपी'त्यागामिसूत्रस्यैव प्रमाणत्वेनोपन्यस्तत्वात् । सर्वकारणस्याद्वितीयस्य परस्य 'सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयम्', 'तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः,' 'यथा सुदीप्तात् पावकाद्विस्फुलिङ्गाः,' 'दिव्यो ह्यमूर्तः पुरुषः स बाह्याभ्यन्तरो ह्यजः, अप्राणो ह्यमनाः शुभ्रो ह्यक्षरात् परतः परः, एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि चे'त्यादिषु श्रुतिषु, 'तन्मायाफलरूपेण केवलं निर्विकल्पितम् । वाङ्मनोगोचरातीतं द्विधा समभवद्बृहत् । तयोरेकतरो ह्यर्थः प्रकृतिः सोभयात्मिका । ज्ञानं त्वन्यतमो भावः पुरुषः सोऽभिधीयत' इत्यादिषु पुराणेषु च निरुपाधिकत्वेनैव सिद्धेश्च । कार्योपाधिरयं जीवः कारणोपाधिरीश्वर इत्यादीनि तु ब्रह्मविष्ण्वादिपराणि । तत्रत्येश्वरपदस्य परमेश्वरपरत्वे नियामकस्य तेष्वदर्शनात् । नच निरुपाधिकस्य निर्धर्मकत्वम् । तस्य शाङ्करमतनिरास एव निरस्तत्वात् । न चारूपवत्सूत्रविरोधः । रूपवद्वैलक्षण्यस्यैव तत्र बोधनेन रूपराहित्यस्य तत्राबोधनीयत्वात् । 'आनन्दरूपममृतं यद्विभाति,' 'सच्चिदानन्दरूपाये'त्यादिभिस्तत्र तद्रूपताया एव निर्धाराच्च । नच 'ततो यदुत्तरतरं तदरूप'मिति श्रुतिविरोधः । तदग्र एव 'सर्वाननशिरोग्रीवः सर्वभूतगुहाशयः । सर्वव्यापी स भगवांस्तस्मात् सर्वगतः शिव' इत्यस्य मन्त्रस्य दर्शनात् । नापि 'यन्मनसा न मनुत' इत्यस्याः । तत्राप्युपास्यरूपस्यैव ब्रह्म-

रश्मिः ।

एवेति । 'नेति नेती'ति श्रुत्यैवकारः । तत्र इति । मूर्तामूर्तरूपद्वयात् । शून्यस्यैवेति । अशून्ययोगव्यवच्छेदकः । एवेति । मूर्तामूर्तरूपयोगव्यवच्छेदकैवकारः । एवेति । सर्ववाक्ययोगव्यवच्छेदकैवकारः । पूर्वमिति । प्रथमपादे । पूर्वाध्याये वा । अर्थादेवेति । सङ्कुचितहेत्वाक्षेपादेव । एवकारः सर्वत्र शब्दशक्तियोगव्यवच्छेदकः । उपाधीति । एकरूपत्वोपाधिसाधारण्यमित्यर्थः । प्रमाणानुपलम्भं दर्शयन्ति स्म **पूर्वं स्वयमिति** । ईक्षत्यधिकरणे स्वयं विज्ञानेन्द्रभिक्षुणा । एवेति । पूर्वं स्वयमपि प्रमाणोपन्यासयोगव्यवच्छेदकैवकारः । एवेति । न तु सोपाधिकत्वेन । तत्रत्येति । कार्योपाधिरित्यादिवाक्यस्थेश्वरपदस्य । तेष्विति । वाक्येषु । निरस्तत्वादिति । यथाकथञ्चिदपि निर्धर्मकत्वासिद्धेः । एवेति । अन्ययोगव्यवच्छेदकः । एवेति । वदित्युक्तया एवकारः । तत्रेत्यादि । ब्रह्मणि । **तद्रूपतायाः** आनन्दाकारतायाः सच्चिदानन्दाकारतायाः । एवकारस्तु श्रुतित्वात् । नचानन्देन रूप्यते व्यवह्रियते इत्यरूपमिति शक्यम् । व्यवहार्यत्वधर्मसिद्धेः । उपास्येति । अनुपास्ययोगव्यवच्छेदकैवकारः । नेदं परिदृश्यमानं इदं मनो न । यदिदं वैदिकोपासका उपासते तद्ब्रह्म विद्धीति । यदिदमुपासते नेदं

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भाष्यप्रकाशः ।

त्वेन निरूपणादुपास्यतयैव रूपादिसिद्धेरिदङ्कारान्तरप्रयोगबलेनास्माभिः प्रागेवोपपादितत्वादिति ।

यत्पुनः, 'प्रकाशवच्चे'त्यादिसूत्रचतुष्टये प्रकाशतुल्यं ब्रह्म, चिन्मात्रमेव, न तु चिद्धर्मकमपि । सर्वज्ञ इति व्यवहारस्तु 'राहोः शिर' इतिवद्विकल्पमात्रः । यदि ह्यात्मनि ज्ञानाख्यं धर्मान्तरं कल्प्येत, तदा तद्व्यर्थं स्यादित्युक्तम् । तदपि मन्दम् । सर्वज्ञ इति व्यवहारस्येश्वरे ज्ञानधर्मकत्वस्य च 'यः सर्वज्ञः सर्वविद्यस्य ज्ञानमयं तप'इति श्रुतिसिद्धत्वेन तद्विरोधस्य दुर्वारत्वात् । नच सा सोपाधिपरेति युक्तम् । परस्मिन्नुपाधिवैशिष्ट्याभावस्य साधितत्वादिति । यदपि वृद्धिह्रासस्सूत्रे व्याख्यातम् । यद्यप्यम्बुवद्ग्रहणं नात्रास्ति, तथापि वृद्धिह्रासभाक्त्वम्, अन्तर्भावात् । प्रतिविम्बरूपेणान्तःप्रवेशादेव सम्भवति । अतो दृष्टान्तदार्ष्टान्तिकयोर्जलबुद्ध्योरुभयोः सामञ्जस्यात् वृद्धिह्रासनियामकत्वरूपात् सादृश्यात् एवं प्रतिविम्बितत्वं प्रतिपत्तव्यमित्यर्थ इति । तदपि तथा । सूत्रे वृद्धिह्रासभाक्त्वं प्रत्यन्तर्भावस्य सिद्धवद्धेतुत्वेन कथनात् वृद्धिह्रासभाक्त्वेनान्तर्भावस्वरूपसाधनस्य सूत्रविरुद्धत्वात् । अम्बुवदग्रहणादित्यस्य प्रतिपक्षहेतोराभासीकरणं विना वृद्धिह्रासभाक्त्वस्य साध्यसमत्वेन तस्यान्तर्भावस्वरूपसाधने सामर्थ्याभावाच्च । यदपि रूपरहितस्य बुद्ध्यादेः प्रतिविम्बाधारत्वसमर्थनायाकाशे पर्वतनीलिमादिप्रतिविम्बस्य प्रत्यक्षसिद्धत्वान्मठाकाशादौ शब्दप्रति-

रश्मिः ।

ब्रह्मेति योजनां निरस्यन्ति स्म **उपास्येति** । यद्युपास्यस्य ब्रह्मत्वनिषेधः, तदा शून्यवादापत्तिः । 'यन्मनसा न मनुते येनाहुर्मनो मतम् । तदेव ब्रह्म त्वं विद्धि' इत्यत्राधोक्षजस्य मनोबोधकस्याहार्यज्ञानविषयस्य 'कश्चिद्धीरः प्रत्यगात्मानमैक्षत्' 'अपिसंराधन' इति श्रुतिसूत्रयोरविषयत्वादुपास्यस्य तु कल्पितरूपस्य तपोविषयत्वादुपास्यतयैव रूपादिसिद्धेरित्यर्थः । एवकारः 'चिन्मयस्याद्वितीयस्य निष्कलस्याशरीरिणः । उपासकानां कार्यार्थं ब्रह्मणो रूपकल्पने'ति रामतापिनीयात् । **रूपादीति** । आदिना रूपस्थानां देवतानां च पुंरूपाङ्गरूयङ्गादिकल्पना ग्राह्या । 'नेदं यदिदमुपासत' इत्यत्रेदङ्कारान्तरं बोध्यम् । **प्रागेवेति** । यदुक्तं प्रकाशवच्चावैयर्थ्यादित्येकादशसूत्रेत्यादि तदप्रपञ्चितमिति प्रपञ्चयन्ति स्म **यत्पुनरिति** । एवकारव्यावर्त्यमाह **नत्विति** । **सर्वज्ञ इति** । ज्ञ इति ज्ञानाश्रयः जानातीति ज्ञ इतिव्युत्पत्तेः । **विकल्पेति** । विकल्प एव । राहोः शिरः राज्ञः पुरुषः इति प्रयोगाभ्यां विकल्पमात्रः । **तदिति** । धर्मान्तरं व्यर्थं धर्मिणैव प्रकाशात् । 'यः सर्वज्ञः सर्ववित्' । **साधितत्वादिति** । पूर्वं अम्बुवदग्रहणसूत्रमग्रे वक्तव्यमत आहुः **यदपीति** । **नात्रेति** । बुद्धावुपाधौ नास्ति । ब्रह्मणो विम्बस्य नीरूपत्वात्प्रतिविम्बाश्रयाया बुद्धेरस्वच्छत्वात् । **वृद्धीति** । एकरूपस्य ब्रह्मणो वृद्धिह्रासभाक्त्वम् । **एवेति** । बुद्धेर्ज्ञानात्मिकायाः शुद्धत्वात्सतो प्रजाभिरेकरूपस्य नीरूपत्वाभावादेवकारः । **उभयेत्यादि**सूत्रांशार्थमाह **अतो दृष्टान्तेति** । **जलबुद्ध्योरिति** । अम्बुवत्सूत्रोक्तं जलं दृष्टान्तः । अन्तर्भावपदोपात्तप्रतिविम्बाक्षिप्तबुद्धिर्दार्ष्टान्तिकरूपा । सामञ्जस्यादित्यस्य व्याख्या **वृद्धिह्रासेति** । उभयोः सादृश्यात् । **सूत्रेति** । सूत्रोक्तकार्यकारणांशे विरुद्धत्वात् । किञ्च । **अम्बुवदित्यादि** । ब्रह्म जडजीवधर्मयोगात्सर्वकामत्वादिधर्माभाववत्, अम्बुवदग्रहणात्, देवदत्तवत् इत्यस्य प्रतिपक्षत्वं यादृशानुमाने तदुच्यते । ब्रह्म जडजीवयोगात्सर्वकामत्वादिधर्मवत् । 'यथा मधु मधुकृत' इत्यादिश्रुतिविषयत्वात् । कृष्णावतारवदिति । तथाच प्रतिपक्षस्य हेतोरित्यर्थः । **तस्येत्यादि** । ब्रह्म प्रतिविम्बरूपेणान्तःप्रवेशं वृद्धिह्रासभाक्त्वात् इत्यत्र तस्य वृद्धिह्रासभाक्त्वस्य हेतोः । **अन्तर्भावेति** । अन्तर्भावस्य स्वरूपं प्रतिविम्ब-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भाष्यप्रकाशः ।

बिम्बस्य स्मृतिसिद्धत्वाच्चेत्युक्तम् । तदपि तथा । आकाशनीलिमप्रतीतेराकाशस्वभावादेवोपपत्तौ पश्चाद्बाधाभावेन धियां प्रमात्वस्यौत्सर्गिकत्वेन च तस्याः प्रमात्वसिद्धौ नीलिम्नि पर्वतप्रतिबिम्बत्वबुद्धेरभिमानमात्रत्वात् । प्रतिध्वनौ शब्दप्रतिबिम्बत्वस्य स्मृतावनुक्तत्वेन तस्यापि तथात्वात् । नच 'छायाप्रत्याह्वयाभासा असन्तोप्यर्थकारिण' इत्येकादशस्कन्धवाक्ये प्रतिध्वनेरसत्त्वस्योक्तत्वात् सादृश्यस्य चोपलभ्यमानत्वात् तस्य प्रतिबिम्बरूपत्वं कल्प्यत इति वाच्यम् । नटकल्पितपारावतादिरुतवन्मायिकशब्दान्तरत्वस्याप्युक्तहेतुभ्यां शक्यवचनत्वेन तत्स्वरूपानिश्चयात् । इदं यथा तथा 'न प्रतिस्फुरणं रूपरहितस्य कदाचने'ति सर्वनिर्णयकारिकाया आवरणभङ्गे सम्यक् व्युत्पादितमिति न पुनः प्रपञ्च्यते । अतोऽम्बुवदग्रहणस्याभासीकरणं चतुर्वक्त्रस्याप्यशक्यमिति सूत्रव्याख्यानमसमञ्जसमेव । एवमग्रेप्यस्ति । तथापि तद्दूषणस्यानावश्यकत्वादुपरम्यते ।

रामानुजाचार्यास्तु । 'न स्थानतोपी'त्यारभ्य 'अतोऽनन्तेने'त्यन्तं षोडशसूत्रमेकमधिकरणमङ्गीकुर्वन्ति । 'उभयव्यपदेशा'दित्यारभ्य चतुःसूत्रमपरम् ।

तत्र प्रथमेऽधिकरणे पूर्वग्रन्थे जीवस्य वैराग्योत्पादनाय दोषान् दर्शयितुं जीवस्यावस्थाविशेषा निरूपिताः, इदानीं ब्रह्मप्राप्तीच्छाजननाय प्राप्यस्य ब्रह्मणो निर्दोषत्वं कल्याणगुणत्वं च प्रतिपादयितुमारभत इति प्रतिज्ञाय, देहसम्बन्धाज्जीवानां दोषसम्बन्धोऽतो देहसम्बन्धोऽपुरुषार्थः, स चाकर्मवश्यस्यापि परमात्मनोऽन्तर्यामितया सर्वचिदचिद्वस्तुषु विद्यमानत्वादस्त्येवेति प्राप्ते, आह, 'न स्थानतोपि परस्ये'ति । पृथिव्यादिस्थानतोपि परस्य ब्रह्मणो नापुरुषार्थसम्बन्धः । कुतः । उभयलिङ्गं सर्वत्र हीति । यतः सर्वत्र श्रुतिस्मृतिषु परं ब्रह्म उभयलिङ्गं निरस्तसमस्तदोषत्वकल्याणगुणाकरत्वलक्षणोपेतमभिधीयते । 'अपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसङ्कल्प' इत्यादि, 'समस्तकल्याणगुणात्मकोऽसौ स्वशक्तिलेशोद्धृतभूतसर्गः । तेजोबलैश्वर्यमहावबोधः सुवीर्यशक्त्यादिगुणैकराशिः । परः पराणां सकला न यत्र क्लेशादयः सन्ति परावरेशे,' 'समस्तहेय-

रश्मिः ।

रूपेणान्तःप्रवेशः तस्य साधन इत्यर्थः । **मठेति**....। **एवेति** । प्रतिबिम्बयोगव्यवच्छेदकः । ननु शब्दगुणके आकाशे नीलिमप्रतीतिर्भ्रमो न स्वभावादित्यत आहुः **पश्चादिति** । यदि भ्रमात्मिका स्यात्पश्चाद्बाध्येत तदभावेन । **तस्या** इति । नीलिमप्रतीतेः । **तस्यापीति** । प्रतिबिम्बत्वस्यापि । **तथात्वाद्**-स्मार्तत्वात् । **सादृश्यस्येति** । प्रतिबिम्बत्वप्रयोजकस्य । **तस्येति** । प्रत्याह्वयस्य ध्वनिपर्यायस्य । **उक्तेति** । प्रत्यक्षसिद्धश्रुतिसिद्धत्वाभ्याम् । **तत्स्वरूपेति** । प्रतिबिम्बस्वरूपानिश्चयात् । **एवेति** । सामञ्जस्ययोगव्यवच्छेदकैवकारः । **पूर्वग्रन्थ** इति । 'सन्ध्य'सूत्रमारभ्य 'मुग्धेऽर्धसम्पत्ति'सूत्रान्ते । **दोषानिति** । स्वप्नादिदोषान् । इच्छाया ज्ञानजन्यत्वाच्छाब्दज्ञानविषयत्वमाहुः **प्राप्यस्येत्यादि** । **अस्त्येवेति** । अयोगव्यवच्छेदकैवकारः । नीलं सरोजं भवत्येवेतिवत् । **स्वशक्तीति** । स्वशक्तिर्माया जीवश्च तयोर्लेशेन उद्धृतः भूतानामन्तर्यामिब्राह्मणोक्तानां पृथिव्यादीनां सर्गः कारणजन्मात्मा येन । अत्र विशिष्टाद्वैतमनुसन्धेयम् । 'अस्मान्मायी सृजते विश्वमेतत् तस्मिंश्चान्यो मायया सन्निरुद्धः' । 'मायां तु प्रकृतिं विन्द्यान्मायिनं तु महेश्वर'मिति श्वेताश्वतरश्रुतिः । अस्मात् अस्माद्वा 'ऋचो अक्षरे परमे व्योमन्यस्मिन्देवा अधि विश्वे निषेदु'रित्यनयोक्तात्पुरुषात् । **विश्वता** विश्वसमूहः । **अन्यो** जीवः । **सुवीर्येति** । आदिना । **सकला** इति क्लेशादय इत्यस्य विशेषणम् । **एतमिति** । उभयलिङ्गं निरस्तसमस्तदोषत्वकल्याणगुणाकरत्वलक्षणं पूर्वोक्तं समीपतरवर्तिनमर्थम् । ऊहापोहौ तर्कानुस्यूतत्वरूपौ

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भाष्यप्रकाशः।

रहितं विष्णवाख्यं परमं पद'मित्यादि चेति सूत्रं व्याख्यायैतमेवार्थमग्रिमसूत्रेणोहापोहपूर्वकं स्थापयन्ति।

द्वितीये तु मूर्तामूर्तब्राह्मणे मूर्तामूर्तप्रपञ्चस्य ब्रह्मणि रूपत्वमुपदिश्यते। 'अथात आदेश' इत्यादिना मूर्तामूर्तरूपतया ब्रह्मणो या इयत्ता, सा प्रतिषिध्यते। 'न ह्येतस्मा'दित्यनेन ब्रह्मणोऽन्य-दुत्कृष्टं नास्तीत्युक्त्वा, तदुपपादनाय 'अथ नामधेय'मित्यादिना नामनिर्वचनान्तेन प्राणशब्दनि-र्दिष्टेभ्यश्चेतनेभ्योऽप्येष सत्यम्, कदाचिदपि ज्ञानादिसङ्कोचाभावादित्युक्तम्। तथा 'प्रधानक्षेत्रज्ञ-पतिर्गुणेश' इत्यादिश्रुतिष्वप्ययमर्थ उक्तः। तस्याचिद्वस्तुनो ब्रह्मरूपत्वप्रकार इदानीं चिन्त्यते, ब्रह्मणो निर्दोषत्वसिद्ध्यर्थम्। किमस्याचिद्वस्तुनो ब्रह्मरूपत्वमहिकुण्डलन्यायेन, उत प्रभाप्रभावतो-रिवैकजातियोगेन, उत जीवस्येव विशेषणविशेष्यतयांशांशिभावेनेति। इह स्थाप्यमानं विशेषण-विशेष्यभावमङ्गीकृत्य, 'प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात्,' 'तदनन्यत्वमारम्भणशब्दादिभ्य' इत्यत्र सूक्ष्मचिदचिद्विशिष्टाद्ब्रह्मणः स्थूलचिदचिद्विशिष्टस्य ब्रह्मण उत्पत्तिरनन्यत्वेनोक्ता, किं युक्तम्, अहिकुण्डलवदिति, कुतः, उभयव्यपदेशात्। 'ब्रह्मैवेदं सर्वमात्मैवेदं सर्व'मिति तादात्म्यस्य 'हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणी'ति भेदस्य व्यपदे-शाचाहिकुण्डलभावर्जुभाववत् तस्यैव ब्रह्मणः संस्थानविशेषा एवाचिद्वस्तूनि। अग्रिमसूत्रे वाशब्दः पक्षव्यावृत्त्यर्थः। ब्रह्मस्वरूपस्यैवाचिद्रूपेणावस्थाने भेदश्रुतयो ब्रह्मणोऽपरिणामित्ववादिन्यश्च बाधिता भवेयुः, अतो यथा प्रभातदाश्रययोर्भिन्नयोरपि तेजस्त्वेन तादात्म्यम्, एवमचित्प्रपञ्चस्यापि ब्रह्म-

रश्मिः।

तत्पूर्वकम्। अग्रे स्फुटिष्यति। उपेति। ऊहापोहरूपाय। माध्यन्दिनपाठभेदादाहुः **अथ नामेति**। प्राणशब्दनिर्दिष्टेभ्य इत्यनेनान्वयः। **चेतनेभ्यो** जीवेभ्यः 'मायया सन्निरुद्ध' इति श्रुतेः। विशिष्टाद्वैतात्। न तु प्राणा नापीन्द्रियाणि। 'प्राणा वै सत्यं तेषामेष सत्य'मिति श्रुत्यर्थ उक्तः। **प्रधानेति**। 'प्रधान-क्षेत्रज्ञपतिर्गुणेशः संसारबन्धस्थितिमोक्षहेतुः। स तन्मयो ह्यमृत ईशसंस्थोऽजः सर्वगो भुवनस्यास्य गोप्ता। य ईशे अस्य जगतो नित्यमेव नान्यो हेतुर्विद्यत ईशनाय। यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै। तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये' इति। **अयमर्थ** इति। विशिष्टमद्वैतम्। प्रधानं प्रकृतिः। क्षेत्रज्ञा जीवाः तेषां पतिः मूर्तामूर्तोत्कृष्टः। गुणत्रयेशः प्रधानेशः। यथायथं संसारेण बन्धस्य हेतुः। क्षेत्रज्ञः स्थितिहेतुः। प्रधानं विशिष्टाद्वैतात्। मोक्षहेतुः प्रधानेक्षेत्र-ज्ञपतिरीश्वरः। स प्रसिद्ध ईश्वरस्तन्मयः प्रधानक्षेत्रज्ञमयः। ईशप्रलयोऽजो जीवः। एवेति। अव-धारणेन। विदधाति उत्पादयति। दधाति पुष्णाति च। एवमयमर्थ उक्तः। षोडशसूत्र्यामुक्त्वा चतुः-सूत्र्यामाहुः **तस्याचिदिति**। प्रधानवस्तुनः। **निर्दोषत्वेति**। विशिष्टत्वेपि अद्वैतत्वे दोषप्राप्तेर्निर्दोष-त्वसिद्ध्यर्थम्। **अहीति**। अहेः कुण्डलं अहिकुण्डलिका अहिः कुण्डलिकेति प्रतीतिद्वयात्। **एकजा-तीति**। तेजस्त्वजातियोगेनेत्यर्थः। **विशेषणेति**। ब्रह्मणोंशो जीव इति जीवस्यांशि ब्रह्मेति च प्रत्ययात्। **प्रकृतिश्चेति**। प्रथमाध्यायसमाप्तौ। तदनन्यत्वसूत्रं पूर्वाध्याये। **भेदस्येति**। कर्ता गुणेशः करणं जीव इति भेदस्तस्य। अहेः कुण्डलभावः ऋजुभावश्च तद्वत्। **तस्यैवेति**। चिदचिद्विशिष्टस्यैव। उक्तश्रुतिभ्य एवकारः। **एवेति**। उक्तश्रुतिभ्य एवैवकारः। **अग्रिमेति**। प्रकाशाश्रयवद्वेति सूत्रे। **पक्षेति**। यथा स्थाणुर्वा पुरुषो वेत्यत्र। **एवेति**। स्वशक्तिलेशयोगव्यवच्छेदकैवकारः। **भेदश्रुतय इति**। 'प्रधानक्षेत्रज्ञपतिर्गुणेश' इत्यादय उक्ताः। प्रधानक्षेत्रज्ञानां पतिरिति भेदे षष्ठी। **अपरीति**।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

भाष्यप्रकाशः ।

रूपत्वमिति । 'पूर्ववद्वे'त्यग्रिमसूत्रे वाशब्दः पक्षद्वयव्यावृत्त्यर्थः । एकस्यैव द्रव्यस्यावस्थाविशेषयोगेपि ब्रह्मस्वरूपस्यैवाचिद्द्रव्यस्वरूपत्वादुक्तदोषादनिर्मोक्षप्रसङ्गः । अथ प्रभातदाश्रययोरिवाचिद्ब्रह्मणोर्ब्रह्मत्वजातियोगमात्रं विवक्षितम्, तदा अश्वत्ववद्ब्रह्मापीश्वरे चिदचिद्वस्तुनोश्चानुवर्तमानं सामान्यमिति सकलश्रुतिस्मृतिव्यवहारविरोधः । अतः पूर्ववदेव, 'अंशो नानाव्यपदेशात्' 'प्रकाशादिवत्तु नैवं परः' इति जीववत् पृथक्स्थित्यनर्हविशेषणत्वेनाचिद्वस्तुनो ब्रह्मांशत्वम्, विशिष्टवस्त्वेकदेशत्वेनाचिद्व्यवहारो[2] मुख्यः, विशेषणविशेष्ययोः स्वरूपभेदेन भेदव्यवहारोपि मुख्य इति ब्रह्मणो निर्दोषत्वं रक्षितम् । तदेवं प्रकाशजातिगुणशरीराणां मणिव्यक्तिगुण्यात्मनोऽपृथक्सिद्धविशेषणतया यथांशत्वम्, तथेह जीवस्याचिद्वस्तुनश्च ब्रह्म प्रत्यंशत्वम् । किञ्च । 'स एष महानज आत्मा अजरः' 'नास्य जरयैतज्जीर्यत' इत्यादिभिर्ब्रह्मणोऽचिद्धर्मप्रतिषेधादपि विशेषणविशेष्यत्वेनैवांशांशिभाव इत्यर्थः । अतः सूक्ष्मचिदचिद्वस्तुविशिष्टं कारणभूतं ब्रह्म, स्थूलचिदचिद्विशिष्टं[3] वस्तु कार्यभूतं ब्रह्मेति कारणात् कार्यस्यानन्यत्वं कारणभूतब्रह्मविज्ञानेन कार्यस्य ज्ञाततेत्यादि सर्वमुपपन्नम् । ब्रह्मणो निर्दोषत्वेन कल्याणगुणाकरत्वेन चोभयलिङ्गत्वमपि सिद्धमित्याहुः ।

तत्र प्रथमे द्वितीये च यदधिकरणारम्भप्रयोजनमुक्तं तत्र वयमुदासीनाः । ब्रह्मप्राप्तीच्छाजननाय ब्रह्मणो निर्दोषत्वसाधनाय चेदानीं ब्रह्मणो निर्दोषकल्याणगुणाकरत्वे निरूपणीये जिज्ञासासूत्रमारभ्य निरूपितस्य ब्रह्मस्वरूपनिरूपकग्रन्थस्य निष्प्रयोजनकत्वापत्तेः । तेनैव तथात्वसिद्धावेतदधिकरणद्वयवैयर्थ्यप्रसङ्गाच्च । तेनासिद्धाविदानीमपि तद्विषयवाक्यैरेव निर्णयस्य कर्तव्यतया तत्सिद्धेः सुतरां दौर्घट्यादिति ।

यत् पुनर्द्वितीये कारणभूतस्य ब्रह्मणश्चिदचिद्विशिष्टत्वमुक्तम् । तच्चिन्त्यम् । आदिसृष्टिप्राक्काले वैशिष्ट्यस्य वक्तुमशक्यत्वात् । तत्र सत्तत्सत्याक्षरादिपदैः कारणस्य निर्देशात्, तेषां च 'ॐ तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः' 'सत्यं ज्ञानमनन्तं ब्रह्म' 'एतद्वै तदक्षरं गार्गी'त्यादि-

रश्मिः ।

सकला न यत्र क्लेशादयः सन्ती'ति 'समस्तहेयरहितं विष्णवाख्यं परमं पद'मित्याद्याः । एवमिति । ब्रह्माचित्प्रपञ्चानां भिन्नानामपि विशिष्टत्वेन तादात्म्यमचित्प्रपञ्चस्यापि ब्रह्मस्वरूपत्वमित्यर्थः । **पक्षद्वयेति** । ब्रह्मणः संस्थानविशेषा एवाचिद्वस्तूनि, ब्रह्मस्वरूपस्यैवाचिद्रूपेणावस्थानमिति पक्षद्वयव्यावृत्त्यर्थः । **उक्तेति** । 'भेदश्रुतयो ब्रह्मणोऽपरिणामी'त्यादिग्रन्थोक्तात् दोषात् । अपहतपाप्मत्वादिप्रकारकज्ञानाविषयत्वेपि तज्ज्ञानादनिर्मोक्षप्रसङ्गः । मोक्षनिष्क्रान्ताभावप्रसङ्गः । मोक्षनिष्क्रान्तशब्दो भावप्रधानः । **अश्वत्ववदिति** । 'सर्वापेक्षा च यज्ञादिश्रुतेरश्वव'दित्यस्य वासनयोपमानम् । **ब्रह्मापीति** । मनोवागविषयवस्तु महेश्वरत्वं वा सामान्यमित्यनेनान्वयः । **तादृशं तद्वस्त्विति** । विशिष्टाद्वैतम् । अतो भेदप्रतिपादिकाः सकलश्रुतिस्मृतयस्तासां व्यवहारास्तेषां विरोध इत्यर्थः । **पूर्ववदेवेति** सौत्रं पदं व्याख्यान्ति स्म **अंशो नानेति** । **पृथगिति** । चिदचिद्विशिष्ट ईश्वर इत्यत्रेदं बोध्यम् । निर्दोषत्वं मायाया भेदेन मायाकृतदोषान्निष्क्रान्तत्वम् । **प्रकाशेत्यादि** । प्रकाशो मणिनिष्ठः । जातिर्व्यक्तिनिष्ठा । गुणो गुणिनिष्ठः । शरीरमात्मनिष्ठम् । **अपृथगिति** । मणिः प्रकाशवान्, व्यक्तिर्जातिमती, गुणोस्यास्मिन्गुणी, शरीरमचिद्वस्तु, शरीरवानात्मा इत्येवमपृथक्सिद्धे वस्तुनि विशेषणतयेत्यर्थः । **तेनैवेति** । पूर्वग्रन्थेन । एवकारोऽधिकरणद्वयारम्भप्रयोजनयोगव्यवच्छेदकः । **तेनेति** । पूर्वग्रन्थेन । **एवेति** । अर्थैक्ये प्रतिपादकैक्यस्य युक्तत्वादेवकारः । **तत्सिद्धेरिति** । असिद्धसिद्धेरित्यर्थः । **तत्रेति** ।

---

१. ब्रह्मत्वमपीति मूलप्रकाशे टिप्पणम् । २. अभेदव्यवहारः । ३. वस्तुविशिष्टम् । ४. पृथक्स्थित्यनर्हविशेषणत्वेन ।

२३ ब्र० सू० ९०

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भाष्यप्रकाशः ।

स्मृतिश्रुतिभिः केवलब्रह्मवाचकत्वावगमात् । सुबालोपनिषद्यपि पृथिव्यादीनां स्वस्वकारणे लयोत्यनन्तरं 'तमःपरे देवे एकीभवती'ति शब्दान्तरेण तमसो मूलकारणभूतपराभेदस्यैव बोधनात् । 'लीङ् श्लेषणे' 'श्लिष आलिङ्गन' इति धात्वर्थविचारे लयस्याविभागरूपत्वेन सिद्ध्या तद्विलक्षणस्यैकीभावस्य भेदाभावरूपेणैव सिद्धेर्वैपरीत्यस्य वक्तुमशक्यत्वात् । कारणप्रायपाठेन कारणतयैव परस्यापि देवस्य सिद्धेरिति । इदं यथा तथा समन्वयसूत्रे प्रतिज्ञादृष्टान्तानुपरोधसूत्रे तदनन्यत्वादिसूत्रे च व्युत्पादितमिति न पुनः प्रपञ्च्यते ।

एतन्मतचौरः **शैवो**ऽप्येतेनैव दत्तोत्तरः, प्रहस्तेऽपास्तश्च ।

माध्वास्तु । 'न स्थानतोऽपी'त्यादिविंशतिसूत्र्यां त्रिसूत्र आद्ये अधिकरणे स्थानादिभेदकृताया भेदप्रतीतेः स्वरूपाभेदाबाधकत्वादेक एव सर्वत्र परमेश्वर इति, 'अरूपवदेवे'ति द्वितीये चतुःसूत्रे अरूपवत्त्वमप्राकृतरूपवत्त्वायेति, 'अत एव चे'त्येकसूत्रे तृतीये जीवस्य ब्रह्मभिन्नत्वाय प्रतिबिम्बत्वमुच्यत इति, 'अम्बुव'दित्येकसूत्रे चतुर्थे भक्तिं विना जीवस्य न स्वरूपसुखाभिव्यक्तिरिति, 'वृद्धिह्रासे'तिद्विसूत्रे पञ्चमे भक्तिः सर्वत्र नैकविधेति तत्फलदानेपि तारतम्यमिति, 'प्रकृतैतावत्त्वे'त्येकसूत्रे षष्ठे भगवान् पालकोपीति, 'तदव्यक्ते'ति चतुःसूत्रे 'प्रकाशवच्चावैशेष्य'मिति भेदनेन पञ्चसूत्रतां कृत्वा, तत्र सप्तमे परमात्मा सदा अव्यक्तस्वभावः, स च भक्तिसाध्यात् प्रसादाद्व्यक्तो भवतीति, 'उभयव्यपदेशा'दिति चतुःसूत्रेऽष्टमे आनन्दादिरूपोपि श्रुतिबलादानन्दादिगुणकोपीति सर्वत्र माहात्म्यमेवोच्यते भक्त्यर्थमित्याहुः ।

तत्रापि वयमुदासीनाः । आद्ये हेतोरध्याहार्यत्वात् । द्वितीयार्थस्य प्रागपि सिद्धत्वेन निष्प्रयोजन-

रश्मिः ।

कारणभूतप्रतिपादिकासु । **शब्दान्तरेणे**ति । लयशब्दादन्येन 'एकीभवती'ति शब्देन । **एवे**ति । लययोगव्यवच्छेदक एवेति । **अविभागे**ति । द्वयोर्धर्मत्वेनार्धनारीश्वरवदविभागरूपत्वेन । **एव सिद्धेरि**ति । सैन्धवखिल्य उदके प्रास्ते तथादर्शनादेवकारः । दृष्टान्तेन सिद्धेरित्यर्थः । **वैपरीत्यस्ये**ति । अविभाग एकीभावः भेदाभावो लय इति वैपरीत्यं तस्य । **कारणप्राये**ति । कारणभूतप्रतिपादिकासु प्रायपाठो बोध्यः । **कारणतयैवे**ति । कार्यांशतयेत्यस्य योगस्तस्य व्यवच्छेदकः ।

शैव इति । भगवान् शैवः । **एतेनैवे**ति । रामानुजाचार्यमतदूषकग्रन्थेन । प्रकारभेदाभावादेवेति ।

अप्राकृतेति । तथाच रूपशब्दः प्राकृतरूपे लाक्षणिक इति भावः । **भक्तिं विने**ति । भक्तिं विनाम्बुवदग्रहणात् जीवस्य न तथात्वं स्वरूपसुखाभिव्यक्तिमत्त्वं स्वरूपसुखाभिव्यक्तिरिति यावत् । इत्यर्थकात्तथा । **भक्तिः सर्वत्रे**ति । अत्र तु व्याख्यासुधायामर्थः कृतः । 'भक्तेर्वृद्धिह्रासभाक्त्वं ब्रह्मादीनां भक्तत्वेन्तर्भावात् । एवं भक्तितारतम्येऽङ्गीकृत एवेश्वरस्योभयान्प्रति सामञ्जस्यसंभवादिति ।' **पालकोपी**ति । अत्र पूर्वपक्षप्रदर्शनपरं भाष्यम् । 'सृष्टिसंहारकर्तृत्वमेवास्य, न पालकत्वम् । स्वतःसिद्धेरिति । तदयुक्तम् । सृष्टिसंहारकर्तृत्वाभ्युपगमस्य व्यर्थत्वात् । स्वतःसिद्धेरित्यत्रास्येत्यप्रतीतेश्च । स्थितेरित्यध्याहारेपि स्वभाववादाश्रयणस्य सृष्टिसंहारसाम्येन तत्कर्तृत्वाभ्युपगमानुपपत्ते'रिति ग्रन्थात् । **भेदनेने**ति । 'प्रकाशादिवच्चावैशेष्यं प्रकाशश्च तत्कर्मण्यभ्यासा'दिति सूत्रभेदनेनेत्यर्थः । **सप्तम** इति । अधिकरणे । तदव्यक्तसूत्रार्थमाहुः **परमात्मे**ति । अभक्तानामिति बोध्यम् । प्रकाशश्चेति सूत्रार्थमाहुः **स चे**ति । प्रकाशपदार्थो व्यक्त इति । **श्रुती**ति । 'आनन्दं ब्रह्म' 'एष ह्येवानन्दयाती'ति श्रुतिबलात् । **सर्वत्रे**ति । उभयव्यपदेशे । देवत्वं माहात्म्यम् । एवकारोऽभेदयोगव्यवच्छेदकः । **हेतोरि**ति । भेदवा-

१. अज्ञाते कः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

परमतः सेतून्मानसम्बन्धभेदव्यपदेशेभ्यः ॥ ३१ ॥ (३-२-३०)

धर्मिधर्मविरोधः परिहृतः । धर्म्यन्तरविरोधपरिहारार्थमधिकरणमारभते । तत्र पूर्वपक्षमाह । परमतः । अतोपि ब्रह्मणः परमन्यदुत्कृष्टं फलमस्ति । तत्र वैदिकहेतवः । सेतून्मानसम्बन्धभेदव्यपदेशेभ्यः । यद्यपि समन्वय एवैते दोषाः

भाष्यप्रकाशः ।

कत्वात् । तृतीयेपि जीवस्य मुख्यप्रतिबिम्बतायां मिथ्यात्वापत्तेर्भिन्नत्वस्य प्रागेव साधितत्वाच्च सूत्रवैयर्थ्यमित्यादिदोषाणां भानादिति ॥३०॥ इति नवमं प्रकाशाश्रयवद्वेत्यधिकरणम् ॥ ९ ॥

परमतः सेतून्मानसम्बन्धभेदव्यपदेशेभ्यः ॥३१॥ सङ्गतिकथनपूर्वकमधिकरणप्रयोजनमाहुः धर्मीत्यादि । ब्रह्म सर्वधर्मशून्यम्, न तु धर्मीति, धर्माश्चेतरेतरविरुद्धाः न ह्येकत्र सम्भवन्तीति, धर्माश्च कार्याः, न ब्रह्मेत्यादिरूपो यो विरोधः, सोधिकरणचतुष्टयेन परिहृतः । अतः परं धर्म्यन्तरस्यापि सहावस्थानमाशङ्क्य तत्परिहारार्थमारभते । तथाच प्रसङ्गः सङ्गतिरुक्तविरोधपरिहारश्च प्रयोजनमित्यर्थः । तत्र यथा ज्ञेयाद्ब्रह्मणः फलरूपमुत्कृष्टम्, एवं ततोप्यन्यदुत्कृष्टमस्ति नवेति सन्देहः । तद्बीजं तु 'अक्षरात् परतः परः' 'पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गति'रिति व्यपदेशः सेत्वादिव्यपदेशश्च । तयोः पूर्वपक्षादेव बुध्यमानत्वात् तमेव वदतीत्याशयेनाहुः तत्रेत्यादि । तत्र वैदिकहेतव इति । फलान्तरसत्त्वे वैदिका एव हेतवः । तथाच

रश्मिः ।

दोनुसन्धेयः । प्रतिपिपादयिषितोभयलिङ्गे हेतुतयोभयलिङ्गनिषेधो हेतुः । भेदे प्रतिपिपादयिषिते उभयलिङ्गनिषेधो न हेतुरतोत्र परस्योभयलिङ्गं सर्वत्र स्थानतोपि नेत्यतोऽभेदः प्रसिद्धः प्रतिपत्तव्यः । अप्राकृतरूपवत्त्वं प्रसिद्धं प्रतिपत्तव्यम् । एक एव सर्वत्रेश्वर इति एवं हेतोरभेदरूपस्याप्राकृतरूपवत्त्वस्य वाध्याहार्यत्वात् । **द्वितीयार्थस्येति** । अत्राधिकरणे प्रथमसूत्रेण रूपराहित्यमुपपाद्य 'प्रकाशवच्चावैयर्थ्य'मिति सूत्रेण रूपवत्त्वविषयाणां श्रुतीनां वैयर्थ्यमाशङ्क्य विलक्षणरूपत्वाङ्गीकारेण परिहृतमित्येवं व्याख्यासुधोक्तस्येत्यर्थः । **प्रागपीति** । 'न स्थानतोपी'त्यधिकरणेपि । हेत्वन्तरमाहुः **भिन्नत्वस्येति** । **प्रागेवेति** । भेदघटितसूत्रेषु । **इत्यादीति** । आदिना प्रसिद्धार्थानां सूत्राविषयवाक्यप्रतिपाद्यत्वं दोषः ॥ ३० ॥ **इति नवमं प्रकाशाश्रयवद्वेत्यधिकरणम्** ॥ ९ ॥

परमतः सेतून्मानसम्बन्धभेदव्यपदेशेभ्यः ॥ ३१ ॥ **सङ्गतीति** । प्रसङ्गसङ्गतिरिति वक्ष्यन्ति । **धर्मीति** । 'ब्रह्मैवेदमग्र आसीत्' 'आत्मैवेदमग्र आसी'दिति पुरुषविधब्राह्मणे । प्रयोगाभिप्रायेण । स्पष्टं द्वितीयस्कन्धनवमाध्याये ब्रह्माणं प्रति स्वरूपदर्शने । 'द्वन्द्वं न्यञ्चि पात्राणि प्रयुनक्ती'ति गृह्यसूत्रम् । **सहेति** । 'स्वरूपं द्विविधं चैव सगुणं निर्गुणं तथे'ति श्रीगोपालतापिनीयात् । न तु ब्रह्म प्रसिद्धम्, 'वासुदेव आत्मे'ति द्वितीयसुबोधिन्युक्तदिशा सहानवस्थानम् । **ज्ञेयादिति** । 'ब्रह्मविदाप्नोति पर'मित्याद्यनुसन्धेयम् । **तत इति** । फलरूपात् । **अक्षरादिति** । परतोऽक्षरादित्यन्वयः । अयमेको व्यपदेशः द्वितीयकोटौ बीजम् । प्रथमकोटौ बीजमाहुः **सेत्वादिव्यपदेश इति** । सेतून्मानसम्बन्धभेदव्यपदेशः । एतेऽत्र यथाक्रमं बीजे बोध्ये । अग्रे स्पष्टे । **एवेति** । संशयग्रन्थयोगव्यवच्छेदक एवकारः । **तमेवेति** । पूर्वपक्षम् । **एवेति** । पूर्ववत् । **फलेति** । फलमक्षरात्परं ततोऽन्यत्फलान्तरं परमत इति सूत्रभागोक्तम् । तत्सत्त्वे वैदिका हेतवो वक्तव्याः, अन्यथा 'अक्षरात्परतः पर'इत्याद्युक्तश्रुतिभ्यां फलान्तरबोधेऽवक्तव्यत्वं सूत्रस्य स्यात् । वैदिका एवेत्येवकारस्तु वैदिकहेतुसत्त्वेऽन्योक्तौ प्रतारकत्वं स्यादिति

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

परिहृताः, तथापि स्वरूपविरोधपरिहारप्रस्तावात् पुनरुच्यन्ते। सर्ववाक्यप्रतिपाद्यमेकमेवेत्यपि न सिद्धम्। एतैर्हेतुभिः परिच्छेदेन धर्मिभेदे सिद्धे न पूर्वाधिकरणसिद्धान्तविरोधः। ननु समन्वयेन ब्रह्मत्वमुत्तरपादेनैक्यं पूर्वाधिकरणेनाविरोध इति व्यर्थमिदमधिकरणमिति चेत्। न। अर्थबलविचारोयम्। समन्वये चोत्तरपादे च शब्द-

---

भाष्यप्रकाशः।

शब्दबलेन अद्वितीयत्वादिवदर्थबलेन फलान्तरस्यापि सिद्ध्या प्राप्ते विरोधे वेदान्तवाक्यार्थनिर्धाराय प्रवृत्तस्यैतद्विचारणमावश्यकमिति बोधितम्। ननु सेत्वादिवाक्यानां पूर्वं विचारितत्वात् पुनः कथनस्य किं प्रयोजनमित्यत आहुः यद्यपीत्यादि। सर्वेषां वेदान्तानां ब्रह्मपरत्वविचारे यद्यप्येते सेत्वादिपदोक्ता अवान्तरवर्तित्वादयः परिहृताः, तथापि परस्वरूपविरोधित्वेन बाधका इत्येवं न परिहृता इति तथा परिहर्तुं पुनरुच्यन्ते। किञ्च। तेषु तेषु वाक्येषु तत्तद्रूपाणां प्रतिपादनात् सर्ववाक्यप्रतिपाद्यमेकमेवेत्यपि न सिद्धम्, अतस्तत्साधनायापि पुनरुच्यन्त इत्यर्थः। ननु पूर्वाधिकरणे ब्रह्मणः परत्वमद्वितीयत्वं च सिद्धम्, अत्र चैतैर्हेतुभिस्तदाक्षिप्यत इत्याक्षेप एवात्र सङ्गतिरस्तु, न प्रसङ्ग इत्यत आहुः एतैरित्यादि। सेत्वादिभिर्हेतुभिः परिच्छेदेन ब्रह्मणोऽवान्तरत्वनिश्चयेन धर्म्यन्तरे सिद्धे तस्मिन्नेव परत्वमद्वितीयत्वं च पर्यवसास्यतीति न पूर्वाधिकरणसिद्धान्तानां विरोधः, अतो नाक्षेपः सङ्गतिः, किन्तु प्रसङ्ग एव सङ्गतिरित्यर्थः। पुनः प्रकारान्तरेण वैयर्थ्यमाशङ्क्य परिहरन्ति नन्वित्यादि। अविरोध इति। प्रतिषेधबोधकस्याद्वितीयपदस्यासङ्कुचितवृत्तिकत्वात् तेन धर्म्य-

रश्मिः।

अन्यहेतूक्तियोगव्यवच्छेदकः। नत्वन्ये हेतव इति। शब्देति। 'एकमेवाद्वितीय'मित्यादिशब्दबलेन। अर्थेति। सेतून्मानाद्यर्थबलेन। अर्थास्तु वक्ष्यमाणानां सेत्वादिबोधिकानां श्रुतीनाम्। विरोध इति। अद्वितीयादिश्रुतिविरोधे। प्रवृत्तस्येति। भगवतो व्यासस्य। एतदिति। परतःपरस्य सम्बन्धि। अन्यथा वैदिकहेतूक्तिपुरःसरं परात्परविचारणमयुक्तं स्यात्। ब्रह्मेतरात्मधर्माणां तयोरभेदेन ब्रह्मपरत्वात्पादार्थसङ्गतिः। पूर्वमिति। दहराधिकरणे सेतुवाक्यम्। तत्रैवोन्मानवाक्यं 'यावान् वा अयमाकाश'इत्यादि। तत्रैवाधाराधेयसम्बन्धवाक्यं प्रमेयनिरूपणप्रस्तावे 'उभे अस्मि'न्नित्यादि। अन्तस्तद्धर्माधिकरणे भेदवाक्यं 'य एषोन्तरादित्ये हिरण्मयः पुरुष' इत्यादि। अवान्तरेति। अवान्तरवर्तित्वं परिच्छेदनिरूपणात्। आदिना परिच्छेदः आधाराधेयभावः सम्बन्धः भेदश्च। परीति। उक्ताधिकरणेषु परिहृताः। तथापीतिभाष्यं विवृण्वन्ति स्म तथापीति। सर्वेतिभाष्यं विवृण्वन्ति स्म किञ्चेत्यादि। तेष्विति। अधिकरणविषयवाक्येषु। 'यदेकमव्यक्तमनन्तरूप'मिति श्रुत्यैवकारः। एतैरिति। सेत्वादिभिः। तदाक्षिप्यत इति। परत्वमद्वितीयत्वं च पूर्वोक्तं कथमित्याक्षेप आक्रोश इत्यर्थः। एवकारव्यवच्छेद्यमाहुः न प्रसङ्ग इति। धर्म्यन्तर इति। अतः परस्मिन्। तस्मिन्नेवेति। एवकारेण परब्रह्मान्यरूपान्ययोगो व्यवच्छिद्यते। विरोध इति। 'अक्षरात्परतः पर'इति श्रुतावक्षरात्परतोपि परत्वकथनान्न विरोध इत्यर्थः। प्रसङ्ग एवेति। आक्षेपसङ्गतिव्यवच्छेदक एवकारः। वैयर्थ्यमिति। अधिकरणवैयर्थ्यम्। नन्वित्यादीति। समन्वयेन पूर्वाध्यायार्थेन धर्म्यन्तरस्य ब्रह्मत्वं तत्प्रतिपादकस्य 'अक्षरात्परतः पर' इत्यस्य परतोऽक्षरादित्यन्वयात्। उत्तरपादे 'सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषा'दित्यारम्भके वेदैक्येन विद्यैक्यम्। प्रतिषेधेति। द्वितीयप्रतिषेधबोधकस्य। स्वरूपस्येत्येकस्य। एतेनावान्तरवर्तित्वादीनां

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

बलविचारः। धर्मिविचारान्न पूर्वेण गतार्थत्वम्।

फलतः साधनतश्च प्रमेयाच्च प्रमाणतः।
विचारेणाबृहत् तच्चेत् कोऽन्यः साधयितुं क्षमः॥ १॥

अतो हेतून् बाधकानाह। एकदेशबाधकत्वात्। तत्र फलतो बाधहेतुमाह। सेतुव्यपदेशात्। 'अथ य आत्मा स सेतुर्विधृति'रिति। 'दहर उत्तरेभ्य' इत्यत्र ब्रह्मत्वमस्य सिद्धम्। 'अथ य इहात्मानमनुविद्य व्रजन्ती'त्युपक्रम्य, 'सर्वेषु लोकेषु कामचारो भवती'त्युक्त्वा, कामानुपपाद्य, अज्ञानव्यवधानं ज्ञानप्रशंसार्थमुक्त्वा, ज्ञानानन्तरं संसारसम्बन्धाभावाय सेतुत्वं वदति। पापाङ्धितरणार्थम्। यश्च तरति, तद्गताश्च दोषा गच्छन्तीति च। अतः संसारफलयोर्मध्ये विद्यमानत्वात् तीर्णस्यैव फलश्रवणात् फलरूपं वस्तु किञ्चिदन्यदस्तीति ज्ञायते। निधित्वेन

भाष्यप्रकाशः।

न्तरस्यापि निवृत्तेः स्वरूपस्याप्यविरोध इत्यर्थः। धर्मिविचारादित्यादि। पूर्वाधिकरणे धर्माणां ब्रह्मणः सकाशाद्भेदो निवारितः, इह तु धर्म्यन्तरं निवार्यत इति धर्मिविचारात् तथेत्यर्थः।

अतः परं सूत्रं व्याकरिष्यन्तो हेतुचतुष्टयकथनप्रयोजनं गृह्णन्ति फलत इत्यादि। फलत इत्यादौ ल्यब्लोपे पञ्चमी। फलमनुसन्धायेत्यर्थः। एवमग्रेपि। अबृहत्तदिति। न परं ब्रह्म, पूर्वाधिकरणेषु विचारितम्। कोऽन्य इत्यादि। फलादिव्यतिरिक्तः कोऽन्यो हेतुस्तस्य परब्रह्मत्वं साधयितुं समर्थ इत्यर्थः। साधयितुमिति स्वार्थेणिच्। 'रामो राज्यमचीकर'दितिवत्। विभजन्ते अत इत्यादि। यत एवं विचारेऽन्यो हेतुर्न साधनसमर्थः, अतः परत्वबाधकान् हेतून् क्रमेणाहेत्यर्थः। क्रमे हेतुमाहुः एकेत्यादि। परब्रह्मत्वे साधनीये परत्वमेकदेशस्तद्बाधकत्वादित्यर्थः। 'ब्रह्मविदाप्नोति पर'मिति फलत्वात् परत्वमुक्तम्, अतस्तद्बाधकं हेतुं पूर्वं वदतीत्याशयेनाहुः तत्रेत्यादि। एकदेशबाधकत्वे मानमाहुः दहरेत्यादि। अस्येति। सेतोरित्यर्थः। फलतो बाधकं हेतुं व्युत्पादयन्ति अथेत्यादि। तद्गताश्च दोषा गच्छन्तीति। 'एतं सेतुं तीर्त्वा अन्धः सन्ननन्धो भवती'ति तत्र श्रावणादित्यर्थः। ननु पूर्वं 'तद्यथापि हिरण्यनिधिं निहितमक्षेत्रज्ञा उपर्युपरि सञ्चरन्तोपि न विन्देयु'रित्यादिना तस्मिन् फलत्वमपि दृष्टान्ते बोधितमिति कथं फलतो बाधकत्वमित्यत आहुः निधि-

रश्मिः।

परस्वरूपविरोधित्वेन बाधकत्वं परिहृतम्। **भाष्ये**। इदमिति। ब्रह्मत्वविद्यैक्यप्रतिपादकम्। **अर्थबलेति**। धर्म्यन्तररूपार्थबलेन 'अक्षरात्परतः पर' इति यथावद्योज्येत्यर्थबलविचारः। बादरिमतम्। व्यासमतमाहुः **समन्वय** इति। व्यासमतत्वेन तस्य शब्दबलविचारकत्वात्। **प्रकृते। एवं विचार** इति। परब्रह्मतः परविचारे। **परत्वेति**। परब्रह्मणः परत्वबाधकान् अक्षरात्परतः परस्य साधकान्। सूत्रकार आह **व्युत्पादयन्तीति**। छान्दोग्यीयदशमप्रपाठकस्थाभ्यां श्रुतिभ्याम्। **पूर्वमिति**। छान्दोग्ये दशमप्रपाठक एव। 'अथ य आत्मा स सेतुर्विधृति'रित्यस्मात्पूर्वम्। **इत्यादिनेति**। 'एवमेवेमाः सर्वाः प्रजा अहरहर्गच्छन्त्य एतं ब्रह्मलोकं न विन्दन्त्यनृतेन हि प्रत्यूढा' इत्यादिपदार्थः। **तस्मिन् फलत्वमिति**। परब्रह्मणि फलत्वं दुर्विज्ञेयत्वेन निधित्वेन वा बोधितमित्यर्थः, नतु सेतावित्यर्थः। वाक्यस्य 'अथ य आत्मे'त्यस्मात्पूर्वत्वात्। अथेत्यस्यानन्तर्यार्थत्वे सेतावित्यर्थः। ब्रह्म सेतुरिति। **फलत** इति। फलमनुसन्धाय सेतुरूपहेतोः परत्वस्य बाधकत्वम्। फलतोऽत्र सेतुत्वं ब्रह्मत्वम्। यद्यपि 'ब्रह्मविदाप्नोति पर'मित्यत्र परपदम्, अत्र फलमिति तौल्यम्, तथापि 'अक्षरात्परतः पर'

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

फलवचनमवान्तरफलपरं भविष्यति। 'एतमानन्दमयमात्मानमुपसंक्रम्ये'त्यप्यत्रोदाहरणम्। तथा उन्मानव्यपदेशात्। तत्रैव 'यावान् वा अयमाकाशस्तावानेषोऽन्तर्हृदय आकाश' इति साधनयुक्तिप्रश्ने, उन्मानेन परिच्छेदं निरूपयति। दृष्टान्तदार्ष्टान्तिकत्वेन ज्ञानं साधनम्। तत्र बहिराकाशज्ञानमपि साधनं भवति।

भाष्यप्रकाशः।

त्वेनेत्यादि। निधेरर्थरूपत्वेन परतः पुरुषार्थत्वात् तद्दृष्टान्तेनात्र फलकथनात् तथेत्यर्थः। अत्रोदाहरणमिति। ल्यबन्तप्रयोगादवान्तरत्वे उदाहरणमित्यर्थः। अत्र मध्ये विद्यमानत्वादित्यनेनाव्यापकत्वबोधनादेशपरिच्छेदो ज्ञापितः। साधनतो बाधकं व्युत्पादयन्ति तथा उन्मानेत्यादि। तत्रैवेति। दहरविद्यायामेव। तत्र हि दहरपुण्डरीकान्तर्यो दहर आकाशस्तदन्तःस्थितस्य ज्ञानार्थकयत्नरूपमन्वेषणं साधनं तस्य युक्तिर्योजनं विषयावगमानुकूलत्वं तदर्थके प्रश्ने, 'तं चेद्ब्रूयु'रित्यादिना कृते, तदुत्तरं वदन् 'यावान् वा अयमाकाशस्तावानेषोऽन्तर्हृदय आकाश' इति यावत्तावत्पदाभ्यामाकाशसमानताव्यपदेशेन दहराकाशस्य परिच्छेदं निरूपयति। ततश्च दृष्टान्तदार्ष्टान्तिकत्वेनाकाशद्वयज्ञानं दहराकाशस्वरूपज्ञानसाधनम्। तत्र च दृष्टान्तभूतबहिराकाशज्ञानमपि साधनं भवति। तथाच बहिराकाशः कालतः परिच्छिन्न इति दार्ष्टान्तिकभूतो दहराकाशोपि तथा भवति। नच यावत्तावत्पदाभ्यां परिमाणसाम्यमेवायाति, नान्यत्साम्यमिति वाच्यम्। 'प्रजापतिर्यज्ञानसृजते'त्यत्र 'तानुदमिमीत, यावदग्निहोत्रमासीत्तावानग्निष्टोम' इति फलतः साम्यवदत्रापि साम्या-

रश्मिः।

इति श्रुतेर्बाधकत्वं बोध्यम्। परत इति। सुषुप्त्यवस्थातः। अवान्तरेति। ब्रह्मप्राप्तेरवान्तरफलपरम्। तद्दृष्टान्तेनेति। निधिघटितवाक्योक्तदुर्ज्ञेयत्वदृष्टान्तेनात्र धर्म्यन्तरे। तथा अवान्तरफलपरं भविष्यति। ल्यबन्तेति। 'क्त्वो ल्यबि'ति क्त्वो व्याकरणे समानकर्तृकाद्धातोर्विधानाद्भृगूपनिषदि कामरूप्यनुसंचरन्नितिश्रुत्युक्तसंचरणफलात्फलेऽवान्तरत्वे इत्यर्थः। इत्यनेनेति। भाष्येण। तथाचातः धर्म्यन्तरं परब्रह्मणः परं सेतुव्यपदेशात्, यन्नैवं तन्नैवम्, 'जन्माद्यस्य यत' इत्यत्र परवत्। साधनत इति। साधनमनुसन्धायोन्मानरूपहेतुं धर्मिपरत्वबाधकं व्युत्पादयन्ति स्मेत्यर्थः। एवकारोऽन्ययोगव्यवच्छेदकः। अन्वेषणमिति। 'किं तत्र विद्यते यदन्वेष्टव्यं यद्वा विजिज्ञासितव्य'मिति प्रश्नेनेष्टत्वात्साधनम्। पाठान्तरे 'तस्मिन्यदन्तस्तदन्वेष्टव्यं तद्वा विजिज्ञासितव्य'मिति विधानात्साधनम्। तत्किंविशिष्टं आसमन्ताच्छब्देर्थे शङ्काराहित्यपूर्वकं यज्ज्ञानं तदर्थकस्तत्प्रयोजनको यत्नस्तद्रूपमन्वेषणं तद्विशिष्टम्। भाष्ये 'किं तत्रे'त्याद्युक्तपाठे युक्तः प्रश्नेऽन्वयेपि पाठान्तरे किंप्रयोगाभावेन प्रश्नेऽन्वयाभावेनाहुः तस्य युक्तिरिति। योजनं पूर्वोक्ताकाशान्तःस्थिते बोध्यम्। शाब्दज्ञानविषयोऽर्थः तस्यावगमो ज्ञानम्। तदनुकूलं तज्जनकं तत्त्वं तदनुकूलत्वं साधन इति। तदर्थकेति। तत् विषयावगमानुकूलत्वमर्थः प्रयोजनं यस्य प्रश्नस्य तादृशप्रश्ने। इत्यादिनेति। 'तं चेद्ब्रूयुर्यदिदमस्मिन्ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोस्मिन्नन्तराकाशः किं तदत्र वर्तते यदन्वेष्टव्यं यद्वा विजिज्ञासितव्य'मित्यादिशब्दार्थः। तदुत्तरं प्रश्नोत्तरम्। भाष्यीयोन्मानशब्दार्थमाहुः आकाशसमानतेति। दृष्टान्तेत्यादिभाष्यं विवृण्वन्ति स्म ततश्च दृष्टान्तेति। तत्र बहिरित्यादिभाष्यं विवृण्वन्ति स्म तत्र चेति। कालत इति। ईश्वरे कालकृतं परत्वं वियति कालकृतमपरत्वं तद्रूपः परिच्छेदस्तद्विषयः। तथेति। कालतः परिच्छिन्नः। नान्यदित्येवकारार्थः। कालतः परिच्छिन्नत्वं नेत्यर्थः। उदमिमीतेति। उन्मानमकुरुत। फलत इति। फले साम्यवत्।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

चतुष्पाच्च ब्रह्म भूतादिपादाश्च ज्ञातव्याः । तथा सम्बन्धव्यपदेशात् । तत्रैव प्रमेयनिरूपणप्रस्तावे 'उभावस्मि'न्नित्यादिना आधाराधेयसम्बन्धो निरूपितः । अत्र च वस्तुपरिच्छेदो निरूपितः । 'प्राज्ञेनात्मना सम्परिष्वक्त' इति च । तथा भेदव्यपदेशात् । 'य एषोऽन्तरादित्ये हिरण्मयः पुरुषो दृश्यते' 'य एषोऽन्तरऽक्षिणि पुरुषो दृश्यते' इत्यत्र स्थानद्वयस्थितयोः पुरुषयोः परस्परं धर्मातिदेशमाह । अक्षिस्थितनिरूपकमतिदेशः प्रमाणमिति । धर्म्यभेदे तु स एवायमिति वदेत् ।

भाष्यप्रकाशः ।

न्तरलाभस्य बोधनायोन्मानपदस्य सूत्रे उक्तत्वादिति । तथाच दृष्टान्ते कालपरिच्छेदात् तत्समानत्वज्ञानरूपसाधनतः परत्वनिवारणमित्यर्थः । उदाहरणान्तरमाहुः **चतुष्पादित्यादि** । अत्रापि भूतादीनां पादानामनित्यत्वात् तज्ज्ञानरूपसाधनतः कालपरिच्छेदात्तथा । तृतीयं हेतुं व्युत्पादयन्ति **तथा सम्बन्धेत्यादि** । **तत्रैवेति** । दहरवाक्ये । तथाचात्राधारत्वेनैव प्रमेयत्वम्, न तु सर्वोत्कृष्टत्वेनेति प्रमेयतो वस्तुपरिच्छेदान्न परत्वसिद्धिरित्यर्थः । वस्तुपरिच्छेदे उदाहरणान्तरमाहुः **प्राज्ञेनेत्यादि** । चतुर्थहेतूदाहरणमाहुः **य एष इत्यादि** । **अतिदेशः प्रमाणमिति** । 'तस्यैतस्य तदेव रूपं यदमुष्य रूपं यदमुष्य गेष्णौ तौ गेष्णौ यन्नाम तन्नामे'ति श्रावणात् तथेत्यर्थः । **गेष्णाविति**,

रश्मिः ।

फलमुभयोः समानमित्यर्थः । **तत्समानेति** । तत्समानत्वज्ञानरूपसाधनमनुसन्धाय परब्रह्मणि परत्वनिवारणमित्यर्थः । पूर्वपक्षसूत्रत्वान्नाकाशान्तरन्वेषणम् । **उदाहरणेति** । उन्मानव्यपदेशे तथा । **भूतादीनामिति** । 'भूतादिपादव्यपदेशोपपत्तेश्चैव'मिति सूत्रे 'ज्योतिश्चरणा'धिकरणे स्पष्टम् । **तज्ज्ञानेति** । तज्ज्ञानरूपसाधनमनुसन्धाय, ज्योतिषि कालकृतं परत्वं पादेषु कालकृतमपरत्वं तद्रूपः परिच्छेदस्तस्मात् । तथा नामोन्मानेन ज्येष्ठे कालकृतं परत्वं कनिष्ठे कालकृतमपरत्वमितिवच्चतुष्पाद्ब्रह्म कालेन परत्वविशिष्टम् । भूतादिपादाश्च कालेनापरत्वविशिष्टा इत्यर्थः । **अत्राधारेति** । श्रुतौ 'उभे द्यावापृथिवी अस्मिन्नाकाशेन्तरे समाहिते' इत्युक्त्यात्र आकाशस्याधारत्वेन, नतु आधेयत्वेन प्रमेयत्वम् । द्यावापृथिव्योस्त्वाधेयत्वेन । उभयत्रैवकारव्यावर्त्यमाहुः **नत्विति** । **वस्त्विति** । आकाशद्यावापृथ्वीनामाधाराधेयभावसम्बन्धात्कालकृतापरत्वरूपपरिच्छेदान्न परब्रह्मणि परत्वसिद्धिः । **वस्त्विति** । वस्तूनामाकाशादीनां कालकृतापरत्वरूपपरिच्छेदे इत्यर्थः । अनेन 'अत्र च वस्तुपरिच्छेद' इति भाष्यमपि व्याख्यातम् । **प्राज्ञेनेत्यादीति** । इयं ज्योतिर्ब्राह्मणेस्ति । सुषुप्तौ जीव आधेयः, प्राज्ञ आधार इत्याधाराधेयसम्बन्धो निरूपितः । **भाष्ये । धर्मातिदेशमिति** । किमत्र कार्यमिति चेच्छृणु । उभयत्र पूर्वपक्षनिराकरणेन ब्रह्मत्वज्ञानमिति । धर्मस्वरूपमाहुः **अक्षीति** । स्थितिर्धर्मः । अक्षिस्थितः हिरण्मयनिरूपितः तत्सम्बन्धी इत्येवं हिरण्मयदर्शनमक्षिस्थितिनिरूपकम् । **प्रकृते । तस्यैतस्येति** । छान्दोग्ये प्रथमप्रपाठके । **तस्य** प्रसिद्धस्य, **एतस्याक्षिस्थितस्य, अमुष्य** हिरण्मयस्य । **तथेति** । 'अन्यत्र प्रतीतायाः कृत्स्नाया धर्मसन्ततेः, अन्यत्र कार्यतः प्राप्तावतिदेशः स कथ्यत' इत्यतिदेशलक्षणादन्यत्र आदित्ये हिरण्मयपुरुषे, अन्यत्र अक्षिस्थपुरुषे, कार्यतः ब्रह्मत्वतः । अतिदेशोयं शब्दः प्रमाणमित्यर्थः । **पर्वणी इति** । 'एषा त्रय्येव विद्या तपती'ति महानारायणश्रुतेः । **व्यूहौ** । 'तस्यर्क् साम च गेष्णौ' इत्यादिश्रुतेः । **केचिदिति** । विरलाः । अष्टरसात्मकोद्गीथविद्यायां अधिकारिपर्वतोतिरिक्तनटगायनपर्वौचित्यात् । 'नटवरवपु'रिति

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अतो देशकालवस्तुस्वरूपपरिच्छेदाच्चतुर्विधपरिच्छेदरहितमन्यत् किञ्चिदस्तीति प्रतिपत्तव्यमित्येवं प्राप्तम् ॥ ३१ ॥

सामान्यात्तु ॥ ३२ ॥

तुशब्दः पक्षं व्यावर्तयति । समानस्य भावः सामान्यम् । सेत्वाकाशादिशब्दास्तद्धर्मातिदेशार्थमुच्यन्ते, न तु तद्गतं दोषमपि कल्पयन्ति । संसारसागरोत्तरणोपायत्वात् सेतुत्वम् । निर्लेपायाकाशत्वम् । कामाभिदोहाय चतुष्पात्त्वम् ।

भाष्यप्रकाशः ।

पर्वणी इत्यर्थः केचिदाहुः । 'गेष्णौ तु नटगायना'विति कोशात् ताविति वयं प्रतीमः ॥ ३१ ॥

सामान्यात्तु ॥३२॥ सिद्धान्तसूत्रं व्याकुर्वन्ति **तुशब्द** इत्यादि । **पक्ष**मिति । एतैर्हेतुभिः परत्वनिराकरणपक्षम् । **न तु तद्गतं दोषमपि कल्पयन्ती**ति । पूर्वाधिकरणे दोषनिरासस्य श्रुत्यैव कृतत्वाद्दोषं न कल्पयन्ति । सामान्यादिति सौत्रो हेतुः प्रयोजनगर्भ इत्याशयेन व्याकुर्वन्ति **संसारे**त्यादि । षोडशकलश्रुतिरत्र पूर्वं नोदाहृता, तथाप्यन्यैरुदाहृतेति तत्तात्पर्यमप्युक्तम् । एवमन्यत्रापि बोधार्थम् । अतिदेशकपदाभावे सेत्वादिशब्दैः कथं सामान्यावगमः, कथं च तद्गुणा-

रश्मिः ।

श्रीमद्भागवते । 'जगौ कलं वामदृशां मनोहर'मिति च । **भाष्ये** । **देशकाले**त्यादि । सेतुर्देशकृतः । उन्मानं कालकृतम् । वस्तु सम्बन्धकृतम् । स्वरूपं भेदकृतम् । **अतो** देशादिपरिच्छेदात् ॥ ३१ ॥

सामान्यात्तु ॥ ३२ ॥ **परत्वे**त्यादि । इत्येवं प्राप्तमित्युक्तम् । **भाष्ये** । **सामान्य**मिति । **तस्मा**दिति विस्तरः । सेत्वादिसामान्याच्चतुर्विधपरिच्छेदरहितेपीत्यर्थः, तदुपपादयन्ति स्म **तद्धर्मे**ति । तेषां सेत्वादीनां धर्माः सेतुत्वादयो वक्ष्यमाणाः तेषामतिदेशः कार्यतः प्रापणम् । कार्यं चतुर्विधपरिच्छेदरहितस्यान्यत्वप्रतिपत्तिव्यावर्तनम् । तादृशप्रापणार्थमुच्यन्ते, नतु परिच्छेदेन दोषं प्रदर्श्य धर्म्यन्तरार्थमुच्यन्ते । **प्रकृते** । **पूर्वाधी**ति । 'प्रकाशाश्रयवद्वे'त्यधिकरणे दोषो धर्मकृतद्वैतं तस्य निरासस्तस्य श्रुत्या स्वरूपलक्षणश्रुत्या ज्ञानस्य स्वयंप्रकाशत्वात् । 'स्वयंप्रकाशाय नमस्करोमी'ति गजेन्द्रस्तुतौ । प्रकाशाश्रयशब्दादेवकारः । **दोष**मिति । देशकालवस्तुस्वरूपपरिच्छेदरूपं न कल्पयन्ति, किन्तु धर्मभेदं कल्पयन्तीत्यर्थः । **प्रयोजने**ति । संसारसागरोत्तरणादिकं प्रयोजनं तद्गर्भे मध्ये यस्य स तथोक्तः । सेत्वादिपदैः सेत्वादिप्रतीतेः संसारसागरतरणादिप्रयोजनमपदार्थः स्यादित्येवमुक्तम् । **पूर्व**मिति । पूर्वपक्षसूत्रे । **अन्यै**रिति । शङ्कराचार्यप्रभृतिभिः । तथाच भाष्यं 'उन्मानव्यपदेशश्च भवति । तदेतद्ब्रह्म चतुष्पादष्टाशफं षोडशकल'मिति । यद्यपि चतुष्पाच्च ब्रह्मेति भाष्यश्रुत्योदाहृता, तथापि स्पष्टं नेत्येवमुक्तम् । षोडशी कला षोडशकला सा अस्यास्तीति षोडशकलं ब्रह्म । षोडशी चन्द्रकला ध्रुवा तुरीयामृतरूपेत्यमृतत्वाय । एवं हेतुद्वयमुक्त्वा सम्बन्धव्यपदेशहेतोः सामान्यमाहुः **भाष्ये** **अदुर्लभत्वाये**ति । नहि सम्बद्धो दुर्लभो भवति । भेदव्यपदेशहेतोः सामान्यमाहुः **दिव्यत्वाये**ति । आदित्यपुरुषेऽक्षिस्थितदिव्यधर्मत्वाय । **प्रकृते** । **एवमन्यत्रापी**ति । अग्निहोत्रशब्दस्तद्धर्मातिदेशार्थं नतु तद्गतं दोषं द्वित्वापादकं देशादिपरिच्छेदरूपं वापि कल्पयतीत्येवं अन्यत्र कुण्डपायिनामयनेपि । **अतिदेशके**ति । यथा पूर्वतन्त्रे प्रकृतिवद्विकृतिः कर्तव्येतिशिष्टवाक्ये प्रकृतिवत्पदं तथेहाभावेपि । **सामान्ये**ति । परब्रह्मधर्म्यन्तरयोः साम्यावगतिः । तद्गुणानां सेत्वादिगुणानां संसारसागरोत्तरणोपायत्वादीनाम् । एवकारो द्वित्वापादकगुणियोगव्यवच्छेदकः । **तद्गुणाना**मिति । अग्निहोत्रगुणानां

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अमृतत्वाय षोडशकलत्वम् । अदुर्लभत्वाय सम्बन्धः । दिव्यत्वाय धर्मातिदेशः । कुण्डपायिनामयने मासाग्निहोत्रवद्गुणार्थमेव वचनम्, न दोषार्थमिति न ततोऽन्यशङ्कोत्पादनीया । तस्मान्न पूर्वोक्ता दोषाः ॥ ३२ ॥

बुद्ध्यर्थः पादवत् ॥ ३३ ॥

अन्यसमानधर्मवत्त्वं कुत्रोपयुज्यत इत्यत आह । **बुद्ध्यर्थः** । तथा व्यपदेशो बुद्ध्यर्थः । बुद्धिरेव प्रयोजनं यस्य । तथोपासनार्थमयुक्तमित्याशङ्क्य दृष्टान्तमाह । यथा भूतादीनां पादत्वज्ञानमुपासनार्थम्, तथा तत्तद्गुणवत्त्वेन ज्ञानार्थं स्वधर्मप्रशंसार्थमेवमुच्यते ॥ ३३ ॥

स्थानविशेषात् प्रकाशादिवत् ॥ ३४ ॥

ननु स एवायमित्यतिदेशेपि तथा बुद्धिः सम्पद्यतैवेति व्यर्थो धर्मातिदेश इत्याशङ्क्य, तथोक्तेपि समानधर्मत्वज्ञानाभावे हेतुमाह । **स्थानविशेषादिति** । धर्म्यैक्येपि स्थानविशेषप्राप्त्या न समानधर्मवत्त्वं दृश्यते अन्यत्रेत्यत्रापि न तथा-

---

भाष्यप्रकाशः ।

नामेव ग्रहणमित्याकाङ्क्षायामाहुः **कुण्डपायीत्यादि** । तथाच पूर्वतन्त्रे यथा अग्निहोत्रनाम्ना तद्गुणानामतिदेशः, तथात्रापीत्यर्थः । **ततोऽन्यशङ्केति** । नाममात्रात् तद्दोषशङ्का ॥ ३२ ॥

बुद्ध्यर्थः पादवत् ॥ ३३ ॥ सूत्रमवतारयन्ति **अन्येत्यादि** । **अयुक्तमिति** । उत्तमस्य हीनसामान्यकथनमयुक्तम् । **स्वधर्मप्रशंसार्थमिति** । सेत्वादीनां तारकत्वादेर्धर्मस्य प्रशंसार्थम् । उपासनाधर्मस्य फलतः प्रशंसार्थं वा ॥ ३३ ॥

स्थानविशेषात् प्रकाशादिवत् ॥३४॥ सूत्रमवतारयन्ति **नन्वित्यादि** । **तथोक्तेपीति** । स एवायमित्युक्तेपि । व्याकुर्वन्ति **धर्म्यैक्येपीत्यादि** । **अन्यत्रेति** । **स्फटिकादौ** । वक्ष्यमाण-

रश्मिः ।

मासादीनाम् । **तथात्रापीति** । 'पुरुषान्न परं किञ्चित्सा काष्ठा सा परा गति'रितिसंशयोत्तरकोटि-बीजश्रुतेः 'एकमेवाद्वितीय'मितिश्रुतेश्चातिदेशिकायाः सत्त्वेनात्राप्यतिदेश इत्यर्थः । तेन भाष्ये । **गुणार्थं** मासादिगुणार्थम् । एवकारव्यावर्त्यमाहुः **न दोषार्थमिति** । द्वैतदेशादिपरिच्छेददोषार्थम् । **नामेति** । सेत्वादिनामाग्निहोत्रनाम च । **तद्दोषेति** । द्वैतदोषः देशादिपरिच्छेददोषाश्च तेषां शङ्का । अपिच ततः सत्यज्ञानानन्तानन्दतोऽन्यस्य धर्म्यन्तरस्य शङ्केत्यपि भाष्यार्थः । **भाष्ये** । **तस्मादित्यादि** । सामान्यात् न पूर्वोक्ताः सेत्वादिव्यपदेशजन्याः द्वैतं परात्परत्वं धर्म्यन्तरत्वं तद्रूपा दोषा न ॥ ३२ ॥

बुद्ध्यर्थः पादवत् ॥ ३३ ॥ **अन्येत्यादीति** । सेत्वादिसमाना धर्माः संसारसागरतरणोपायत्वाद-यस्तद्वत्त्वम् । **हीनेति** । सेत्वादिसामान्यकथनम् । जडत्वाद्धीनत्वम् । **उपासनेति** । उपासनाया धर्मस्य संसारसागरतरणोपायत्वादेराश्रयतो हीनत्वेपि **फलत**श्चित्तशुद्धिद्वारा ज्ञानभक्तिरूपफलतः ॥ ३३ ॥

स्थानविशेषात् प्रकाशादिवत् ॥ ३४ ॥ **नन्वित्यादीति** । **इत्यतिदेश** इति । धर्मसन्ततेः कार्यतः प्राप्तावतिदेश इत्यर्थः । **तथा बुद्धिरिति** । संसारसागरोत्तरणोपायत्वादिप्रकारिका बुद्धिः । एवकारोऽयोगव्यवच्छेदकः । **समानेति** । सेत्वादिसमानधर्मत्वज्ञानाभावे । **धर्म्यैक्ये-त्यादीति** । 'स एवाय'मिति धर्म्यैक्ये । **स्फटिकादाविति** । आदिनादर्शद्वयं परस्परं बिम्बप्रतिबिम्ब-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

त्वमायास्यतीत्यतिदेशो धर्माणामपि कृत इत्यर्थः । अस्मिन्नर्थे दृष्टान्तमाह प्रकाशादिवदिति । 'यदादित्यगतं तेज' इति वाक्यादादित्यचन्द्राग्निगततेजसामैक्येपि न समानप्रकाशत्वं यथा, तथात्रापीति ज्ञानसम्भवादित्यर्थः । आदिपदादेकस्यैव कालस्य यथोपाधिविशेषसम्बन्धादुत्तरायणत्वादुत्तमधर्मवत्त्वं तद्विपरीतधर्मत्वं तथेत्यपि संगृह्यते ॥ ३४ ॥

भाष्यप्रकाशः ।

दृष्टान्ते च । शेषं स्फुटम् । इत आरभ्य प्रभूणामिति प्रतिभाति ॥ ३४ ॥

रश्मिः ।

भावापन्नम् । **शेषमिति** । **न समानेति** । परस्परमन्यसमानप्रकाशत्वम् । **अत्रापीति** । दार्ष्टान्तिकेपि । **आदिपदादिति** । ननु समासघटक आदिशब्दे कुतः पदत्वमिति चेत् । न । ईश्वरवाक्ये न नियमः । यः 'न लुमताङ्गस्ये'त्यनेन पदत्वाभावो बाहुलकात् । **एकस्यैवेति** । एवकारो द्वित्वसंख्यायोगव्यवच्छेदकः । **उपाधीति** । मकरसंक्रमणस्य कर्कसंक्रमणस्य च सम्बन्धात् । **उत्तमेति** । ब्रह्मप्रापकत्वधर्मवत्त्वम् । 'तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जनाः' इति गीतायाः । **तथेतीति** । धर्मातिदेशः, न तु धर्मैक्यमिति । एवं शेषं स्फुटम् । **इत आरभ्येति** ।

प्रभ्वाज्ञात्रयभाविनीं गतिमिहोद्भाव्याशु तत्त्वानुगः सार्धाध्याययुगं चकार रहितं[1] स्वाचार्यवर्यः स्वयम् ।
शेषं सूचितमित्यतोऽन्यदपि निर्मातुं प्रवृत्तस्ततस्तन्न्यूनप्रतिपूरको विजयते श्रीविठ्ठलो दीक्षितः ॥१॥
श्रौतं स्मार्तं प्रमेयं यद्भिन्नमित्येव संस्थितम् । तदेकीकरणे शक्तो यः श्रीविठ्ठलदीक्षितः ॥ २ ॥
तद्भाष्यं प्रथितुं स्वज्ञो वावदीति जनः कथम् । तथापि वच्मि तत्तत्त्वं तच्चरणैकनिविष्टधीः ॥ ३ ॥

तथापि पार्थक्येन यथावद्वक्ष्यते । **अत्रेदं ज्ञेयम्** । श्रीमदाचार्याः स्वानुमतमार्गप्रचारार्थं भगवतावतारिताः । प्रथमस्कन्धसुबोधिन्यारम्भे 'अर्थं तस्य विवेचितुं नहि विभुर्वैश्वानराद्वाक्पतेरन्यस्तत्र विधाय मानुषतनुं मां व्यासवच्छ्रीपतिः । दत्त्वाज्ञां च कृपावलोकनपटुर्यस्मादतोऽहं मुदा गूढार्थं प्रकटीकरोमि बहुधा व्यासस्य विष्णोः प्रियम्' इति स्वानुभावघटितप्रतिज्ञावाक्यात् । 'आचार्यचैत्यवपुषा स्वगतिं व्यनक्ती'त्येकादशस्कन्धवाक्याच्च । नचाचार्येषु मूढबुद्ध्या मानुष्यं शङ्कनीयम् । 'यस्यावतारा ज्ञायन्ते शरीरेष्वशरीरिणः । तैस्तैरतुल्यातिशयैर्वीर्यैर्देहिष्वसङ्गतै'रिति दशमस्कन्धवाक्यादनुपमभाष्यं स्वमतसुबोधिन्यन्तसमये वक्तव्येत्येतावत्कृतमिति सर्वोत्कृष्टत्वावधारणात् । इत्थंच स्वमार्गोपयोगि यत्किञ्चित्तत्सर्वमेव वक्तव्यम् । कालश्च स्वल्पः । स्वलीलाया निर्विषयत्वपरिजिहीर्षया स्वतदीयसामीप्यार्थं भगवतोपेक्षितत्वेन वारत्रयमाज्ञापनात् । इदं चान्तःकरणप्रबोध आचार्यैरुक्तम् । 'आज्ञा पूर्वं तु या जाता गङ्गासागरसङ्गमे । यापि पश्चान्मधुवने न कृतं तद्द्वयं मया । देहदेशपरित्यागस्तृतीयो लोकगोचर'इति । 'नाहमात्मानमाशासे मद्भक्तैः साधुभिर्विना । श्रियं चात्यन्तिकीं ब्रह्मन्येषां गतिरहं परे'ति नवमस्कन्धवाक्याच्च । अतस्तत्र यः कठिनांशस्तद्विवेचनपरा जाताः । इत्थं चानवगाह्याभिप्रायाणां सूत्राणां भाष्यमुक्त्वा सुगमानां स्थापितवन्तः । तदेतत्पूरयितुं श्रीविठ्ठलदीक्षिताः 'स्थानविशेषात्प्रकाशादिव'दिति सूत्रादारभ्य भाष्यमारभन्त इत्याहुः **इत आरभ्येत्यादि** । **श्रीप्रभूणां** गोस्वामिनाम् । **प्रतिभातीति** । समासौ **श्रीवल्लभदीक्षितविरचित** इति शब्दात् । भगवदाज्ञायाश्चान्तःकरणरूढत्वात्प्रतिभां ग्रन्थकरण उत्तरोत्तरस्फूर्तिरूपां करोतीत्यर्थः ॥ ३४ ॥

---

१. सूत्राष्टकरहितम् ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

उपपत्तेश्च ॥ ३५ ॥

किञ्च। सत्यज्ञानाद्युक्तधर्मविशिष्टब्रह्मणोऽन्य उत्तमोऽस्तीति वदता तत्रेत उत्कृष्टधर्मवत्त्वं वाच्यम्। तच्चाशक्यम्। प्रमाणाभावात्। साम्येपि तथा विशेषाभावोऽद्वैतश्रुतिविरोधश्च। तस्मादितः परस्यानुपपन्नत्वादुक्तरूपमेव परमकाष्ठापन्नं वस्त्वित्युपपद्यत इत्यर्थः ॥ ३५ ॥

तथान्यप्रतिषेधात् ॥ ३६ ॥

यथा सेत्वादयः श्रुत्योक्ताः, तथैव 'न तत्समश्चाभ्यधिकश्च दृश्यत' इति श्रुत्यैव ततोऽधिकस्य प्रतिषेधात् त्वयाप्यस्मदुक्त एव मार्गोऽनुसर्तव्य इत्यर्थः। अवतारकाले पूर्वं स्वशक्त्याविर्भावमकृत्वा पश्चात् तदाविर्भावे कृते लोकानां पूर्वावस्थातो भगवत्येवाधिक्यमिव प्रतीतं भवतीत्यभिप्रायेणान्यपदोपादानम्॥३६॥

अनेन सर्वगतत्वमायामशब्दादिभ्यः ॥ ३७ ॥

प्रकरणमुपसंहरन् फलितमर्थमाह। अनेन सेत्वादिव्यपदेशानां मुख्यार्थकत्वनिराकरणेन व्यापकत्वं ब्रह्मणः सिद्धमित्यर्थ इति केचित्। तन्न। 'जन्माद्यस्य यत' इत्या-

---

भाष्यप्रकाशः।

उपपत्तेश्च ॥ ३५ ॥ अन्यो नेत उत्कृष्ट इत्यत्रोपपत्त्यन्तरं सूत्राभ्यामाहेत्याहुः किञ्चेत्यादि। विशेषाभाव इति, अन्यस्योत्कर्षाभावः ॥ ३५ ॥

तथान्यप्रतिषेधात् ॥ ३६ ॥ अस्मदुक्तमार्ग इति। एतस्यैव परत्वमितिप्रकारः। पूर्वसूत्रेणास्य गतार्थत्वमाशङ्क्य तन्निवृत्त्यर्थमाहुः अवतारेत्यादि। आधिक्यमिव प्रतीतं भवतीति। तत्रान्यहेतुकत्वशङ्का स्यादिति तन्निवृत्त्यभिप्रायेण तथेत्यर्थः ॥ ३६ ॥

रश्मिः।

उपपत्तेश्च ॥ ३५ ॥ भाष्ये। तथेति। उपपादनीयत्वेन। 'अक्षरात्परतः पर' इत्यत्र परतोऽक्षरादित्यन्वयसम्भवात् 'सा काष्ठा सा परा गति'रिति श्रुतेश्च। प्रकृते। अन्यथेति। ब्रह्मान्यप्रकारेण। भाष्ये। अनुपपन्नत्वादिति। सूत्रार्थः। चकारार्थमाहुः उक्तरूपमिति। 'परमत' इतिसूत्रे संशयद्वितीयकोट्युक्तं रूपं यस्येति तथोक्तम्। संशयबीजश्रुत्योरेकवाक्यतयैवकारः ॥ ३५ ॥

तथान्यप्रतिषेधात् ॥ ३६ ॥ भाष्ये। तथैवेति। श्रुतित्वेन, नतु स्मृतित्वेन। बाध्यबाधकभावायोभौ शब्दौ। इति श्रुत्यैवेति। उक्तश्रुतित्वेन प्रकारेण श्रुतिस्तया, नतु स्मृत्या। प्रकृते। अस्मदुक्तमार्ग इति। अस्मदुक्त एव मार्ग इति पाठः अस्मत्पुस्तकानाम्। शङ्खः पाण्डुर एवेतिवत् विशेषणसंगतैवकारः। आज्ञात्र। अत आहुः एतस्यैवेति। विशेषणस्यास्मदुक्त इत्यस्य, नतु विशेष्यस्य। परत्वं इति हेतोः व्यावर्तकोऽस्मदुक्तः प्रकार इत्यर्थः। अस्येति। सूत्रस्य स्पष्टश्रुत्योपपन्नत्वाद्गतार्थत्वम्। अवतारेत्यादीति। स्वशक्त्येति। अवतारिनिरपेक्षावतारशक्त्या। आविर्भावं तावतीं मायां दूरीकृत्य प्राकट्यम्। तदाविर्भाव इति। कोटिकन्दर्पलावण्यादिरूपस्वशक्त्याविर्भावे भगवत्येवावतारिणि, नत्वन्यस्मिन्नधिकरणे। तत्रान्येति। तत्र उक्तभगवद्रूपाधिकरणे 'परमत' इति सूत्रोक्तान्यहेतुकत्वशङ्का स्यात्। तन्निवृत्तीति। परब्रह्मणः परमिति शङ्कानिवृत्त्यभिप्रायेण, तथा भगवत्यन्यहेतुकोऽवतार इति प्रतीतेरन्यपदोपादानमित्यर्थः ॥ ३६ ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

दिना सर्वदेशगतकार्यकर्तृत्वमुक्तमिति तेनैव व्यापकत्वस्य सिद्धत्वात्। नचाविरोधसाधनप्रकरणत्वात् पूर्वसिद्धं सर्वगतत्वमनेनोक्तग्रन्थेन कृत्वा, सेत्वादिवाक्यैः सममविरुद्धमित्यर्थ इति वाच्यम्। अग्रिमपदवैयर्थ्यापत्तेरिति चेत्। अत्रैवं ज्ञेयम्। नोक्तकर्तृत्वेन व्यापकत्वमेकान्ततो ब्रह्मणि रोद्धुं शक्नोति। योगसिद्धदूरश्रवणादिवत् परिच्छिन्नेनाप्यनेकदेशगतकार्यकरणसामर्थ्यविशेषस्य वक्तुं शक्यत्वात्। अन्यथा पूर्वसिद्धव्यापकत्वविरोधेन सेत्वादिव्यपदेशैः परिच्छिन्नत्वेन ब्रह्मणोऽन्यस्य परत्वं न शङ्केत। विरोधपरिहाराय तु 'सामान्यात् त्वविरोध' इति वदेत्।

तस्मादेवं सूत्रार्थो ज्ञेयः। अनेन ब्रह्मणोऽन्यस्य परत्वनिरासेनायामशब्दादिभ्यो व्यापकत्ववाचकश्रुतिवाक्यादिभ्यः साक्षात् सर्वगतत्वप्रतिपादकेभ्य एव सर्वगतत्वं सिध्यति, न तु गौतमीयानामिव कर्तृत्वाद्यनुपपत्त्येत्यर्थः। ते च शब्दाः 'आकाशवत् सर्वगतश्च नित्यः' 'ज्यायान् दिवो ज्यायान् आकाशात्' 'वृक्ष इव स्तब्धो दिवि तिष्ठत्येकस्तेनेदं पूर्णं पुरुषेण सर्व'मित्यादयः। आदिपदात् 'सर्वतः पाणिपादान्तं सर्वतोक्षिशिरोमुखम्। सर्वतः श्रुतिमल्लोके सर्वमावृत्य

भाष्यप्रकाशः।

अनेन सर्वगतत्वमायामशब्दादिभ्यः ॥ ३७ ॥ सूत्रप्रयोजनमाहुः **प्रकरणमि**त्यादि। **प्रकरणमिति**। अविरोधप्रकरणम्। उक्तोपष्टम्भायैकदेशिव्याख्यानं दूषयितुमुपक्षिपन्ति **अनेने**त्यादि। **केचिदिति**। शाङ्कराः। दूषयन्ति **तन्ने**त्यादि। अर्थान्तरमुद्भाव्य दूषयन्ति **नचे**त्यादि। कथमग्रिमपदवैयर्थ्यमित्यत उपपादयन्ति **अत्रैवमि**त्यादि। **शक्नोतीति**। सूत्रकारः शक्नोति। कुतो न शक्नोतीत्याकाङ्क्षायामशक्तौ गमकमाहुः **अन्यथे**त्यादि। यदुक्तमविरोधसाधनेत्यादिना, तत्राप्युत्तरमाहुः **विरोधे**त्यादि।

एवं मतान्तरमपाकृत्य सूत्रं व्याकुर्वन्ति **तस्मादि**त्यादि। **आयामशब्दादिभ्य इति**। आयामो दैर्घ्यं व्याप्तिरिति यावत्। शब्द्यतेऽनेनेति शब्दः। आयामस्य शब्दो यत्र ते आयामशब्दाः। ते आदयो येषां तद्गुणसंविज्ञानः। तेभ्यः। **व्यापकत्ववाचकश्रुतिवाक्यादिभ्य**

रश्मिः।

अनेन सर्वगतत्वमायामशब्दादिभ्यः ॥ ३७ ॥ **शाङ्करा इति**। 'आयामशब्दादिभ्य' इत्यस्यार्थः समान इति नोक्तः। **तत्रेत्यादीति**। **तेनैवेति**। एवकारोऽस्य सूत्रस्य योगव्यवच्छेदकः। **पूर्वेति**। अत्रैव पूर्वसिद्धम्। **अविरुद्धमिति**। सर्वगतत्वं सूत्रोक्तं अनेन सेत्वादिवाक्यैः सममविरुद्धम्। **अत्रैवमित्यादीति**। **दूरेति**। आदिना चाक्षुषग्रहणे। **अन्यथेत्यादीति**। परिच्छिन्नेप्युक्तसामर्थ्याय व्यापकत्वाङ्गीकारे। **परत्वमिति**। व्यापकत्वप्रयुक्तं परत्वम्। 'परमत' इतिसूत्रेण सूत्रकारो न शङ्केतेत्यर्थः। **विरोधेत्यादीति**। **सामान्यात्त्विति**। सेत्वादिघटितसूत्रोत्तरसूत्रे तदविरोधाय सामान्यात्त्वित्यत्र सूत्रे सामान्यात्त्वविरोध इति सूत्रं वदेदित्यर्थः। **आयामस्येति**। आयामप्रतिपादकः शब्दो यत्र 'आकाशवत्सर्वगत' इत्यादिवाक्येषु ते श्रुतिवाक्यादयः। **येषामिति**। नित्यज्यायस्स्तब्धानाम्। **तद्गुणेति**। तेषां आयामशब्दादिपदवर्तिशब्दानां सम्यक् भवतिना क्रियापदेनान्वयित्वेन ज्ञानं येन समासेन स तद्गुणसंविज्ञानो बहुव्रीहिः। **भाष्ये**। **एवेति**। असाक्षात्सर्वगतत्वप्रतिपादकरूपान्यव्यवच्छेदकः। **कर्तृत्वादीति**। आदिना अपरोक्षज्ञानचिकीर्षाकृतिमत्त्वम्। भाष्यत्वात्स्वपदानि वर्णयन्ति स्म **आदिपदादिति**। 'व्यापकत्ववाचकश्रुतिवाक्यादिभ्य' इत्यत्रादि-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

तिष्ठती'त्यादिस्मृतयः संगृह्यन्ते। अनेन ब्रह्मणि श्रुतिरेव मुख्यं प्रमाणम्, अनुमानं तु विलम्बोपस्थितिकत्वेन साध्यसिद्धिपराहतमपीच्छाविशेषेण जननीयं चेदभ्युचयमात्रं पर्यवसास्यतीति भावः॥ ३७॥

इति तृतीयाध्याये द्वितीयपादे दशमं परमतः सेतून्मानेत्यधिकरणम्॥ १०॥

फलमत उपपत्तेः॥ ३८॥ (३-२-११.)

एवं सर्वोत्तमत्वनिरूपणेनोत्तमाधिकारिणां भजनीयत्वप्रयोजकं रूपमुक्त्वा तदितराधिकारिणां तदाह। ते हि फलप्रेप्सव एव भजिष्यन्ति। तच्च फलदातृत्व एव सम्भवतीति तदाह। अत ईश्वरादेव फलं भवति यत्किञ्चिदैहिकं पारलौकिकं वा। कुतः। उपपत्तेः। 'सर्वस्य वशी सर्वस्येशान' इति श्रुतिर्वस्तुमात्रेशितृत्वमसङ्कुचितमाह। न ह्यन्यस्य वस्त्वन्यो दातुं समर्थः। अतो भगवानेव तथेत्यर्थः।

केचित्त्वत्रैव कर्मणस्तत्कार्यापूर्वस्य च फलदातृत्वमाशङ्क्य, तत्रानुपपत्तिमत्रोपपत्तित्वेन व्याकुर्वन्ति।

भाष्यप्रकाशः।

इति। व्यापकत्ववाचकयुक्तानि यानि श्रुतिवाक्यादीनि तेभ्य इत्यर्थः। फलितार्थबोधकत्वं स्फुटीकुर्वन्ति अनेन ब्रह्मणीत्यादि। अभ्युच्चयमात्रमिति। अनुमानस्य समुच्चयमात्रम्॥ ३७॥ इति दशमं परमतः सेतून्मानेत्यधिकरणम्॥ १०॥

फलमत उपपत्तेः॥ ३८॥ अन्ते एतदधिकरणप्रणयनेन अस्मिन् पादे अविरोधादिनिरूपणप्रयोजनं सूचयन्ननुप्रसङ्गेनाधिकरणमारभत इत्याशयेनाहुः एवमित्यादि। तदाहेति, भजनीयत्वमाह। नन्वत्र फलदातृत्वमेवोच्यत इति कथमेवमधिकारिविभागज्ञानमित्यत आहुः ते

रश्मिः।

पदात्। सौत्रादिशब्दार्थ उक्तः। प्रकृते। अनेन ब्रह्मणीत्यादीति। श्रुतिरेवेति। एवकारेण स्मृतिव्यवच्छेदः क्रियते। अनुमानं स्मृतिः। अपिसंराधनसूत्रभाष्येऽनुमानं स्मृतिरित्युक्तम्। विलम्बेति। स्वमूलश्रुतिकल्पनद्वारा। साध्येति। श्रुतिसाध्यसिद्धिपराहतमपि श्रुत्या बाधात्। इच्छाविशेषो बाधकालीनेच्छा तेन। जननीयं स्मार्तज्ञानम्। अनुमानस्येति। स्मृतेः॥ ३७॥ इति दशमं परमतः सेतून्मानेत्यधिकरणम्॥ १०॥

फलमत उपपत्तेः॥ ३८॥ अविरोधादीति। विरुद्धानां धर्माणामविरोधं वस्तुस्वभावात्। आदि धर्म्यन्तरविरोधः। सूचयन्निति। धर्माद्यविरोधो वाच्यः। प्रयोजनं उत्तमेतराधिकारिणोर्[1]अधिकारः। स तात्पर्यार्थः सूचितार्थः। अधिकरणसङ्गतिमाहुः अनुप्रसङ्गेनेति। अविरोधावनुस्मृतस्योत्तमेतरप्रवृत्तिरूपस्यार्थस्योपेक्षानर्हत्वात्प्रसङ्गलक्षणादनुप्रसङ्गसङ्गतिः। एवमित्यादीति। सर्वोत्तमत्वं वेदोक्तत्वमात्रेण निःसन्दिग्धत्वं दार्ढ्यं चार्थे तादृशार्थत्वरूपं ब्रह्म सर्वविरुद्धधर्माश्रयं धर्म्यन्तररहितं च। तस्य उक्तसर्वोत्तमत्वनिरूपणेन। उत्तमेति। वेदमात्रेण निःसन्दिग्धानां मीमांसानिरपेक्षाणां भजनीयत्वं प्रयोजनं यस्य रूपस्य तत्। तदितरेति। 'सन्देहवारकं शास्त्रं बुद्धिदोषात्तदुद्भवः। विरुद्धशास्त्रसम्भेदादङ्गैश्चाशक्यनिश्चयः। तस्मात्सूत्रानुसारेण कर्तव्यः सर्वनिर्णयः। अन्यथा भ्रश्यते स्वार्थान्मध्यमश्च तथादिम'इत्युक्तकारिकाभ्यामुक्तादिममध्यमानाम्। भजनीयत्वमाहेति। भजनी-

---

१. अत्र प्रवृत्तिः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तत्त्वग्रे जैमिनिमतोपन्यासस्वमतोपन्यासाभ्यां व्यास एव व्यक्तीकरिष्यतीत्यधुनैवाप्राप्तनिराकरणमग्रिमसूत्रद्वयवैयर्थ्यं स्यादिति चिन्त्यम् ॥ ३८ ॥

श्रुतत्वाच्च ॥ ३९ ॥

पूर्वसूत्रेण श्रुतमीशितृत्वं फलदाने उपपत्तित्वेन निरूपितम्। इह तु साक्षाच्छ्रुतिमेव फलदातृत्ववाचिकां प्रमाणयति। सा च 'स वा एष महानज आत्माऽन्नादो वसुदान' इत्यादिरूपा। चकारात् 'सुखं दुःखं भवो भाव' इत्युपक्रम्य, 'भवन्ति भावा भूतानां मत्त एव पृथग्विधा' इत्यादिरूपा स्मृतिः संगृह्यते ॥३९॥

धर्मं जैमिनिरत एव ॥ ४० ॥

अत्र कर्मवादी प्रत्यवतिष्ठते। ननु कर्मण एव फलमिति पक्षेप्युपपत्तिश्रवणे तुल्ये। तथाहि। ईश्वरवादिनापि कर्मनिरपेक्षेण तेन फलमिति

भाष्यप्रकाशः।

हीत्यादि। व्याकुर्वन्ति अत इत्यादि। एतेन प्रकृते ऐहिकामुष्मिकं फलं कर्मसचिवेभ्यस्तत्तद्देवेभ्यो वा, भगवतो वेति संशयः। तत्र तत्र तेषां तेषामुद्देश्यत्वेन श्रावणं 'सर्वस्य वशी सर्वस्येशान' इत्यादिश्रुतिश्च सन्देहबीजम्। तेभ्य एवेति युक्तम्, प्रतिनियतत्वादिति पूर्वपक्षश्च बोधितः। एकदेशिमतमनूद्य दूषयन्ति केचित्त्वित्यादि। तत्त्वित्यादि च ॥ ३८ ॥

श्रुतत्वाच ॥ ३९ ॥ भाष्यमत्र निगदव्याख्यातम्।

माध्वास्तु 'विज्ञानमानन्दं ब्रह्म', 'रातिर्दातुः परायण'मित्युदाहरन्ति ॥ ३९ ॥

धर्मं जैमिनिरत एव ॥४०॥ सूत्रं व्याकुर्वन्ति अत्रेत्यादि। तुल्ये इति। तथाच अत एव,

रश्मिः।

यत्वप्रयोजनमित्युक्ते रूपस्य विरुद्धधर्माश्रयस्य हीनमध्यमाधिकारिणां मीमांसया प्रयोजनं भजनीयत्वमाहेत्यर्थः। अत्रेति। सूत्रे। ते हीत्यादीति। एवेति। 'सिद्धार्थं सिद्धसम्बन्धं श्रोतुं श्रोता प्रवर्तते। शास्त्रादौ तेन वक्तव्यः सम्बन्धः सप्रयोजन' इति एवकारः। उत्तमाधिकारिणस्त्वफलप्रेप्सवः। 'अनिमित्ता भागवती भक्तिः सिद्धेर्गरीयसी'ति वाक्यात्। फलदातृत्व एवेति। देवादीनां जीवानां भगवत ईश्वरस्य वा फलदातृत्वे भजनस्यानुग्रहकारणत्वेन भक्तिहेतुनिर्णयग्रन्थे उक्तत्वात्। अत इत्यादीति। ईश्वरादेवेति। नतु जीवदेवेभ्यः। भगवानेवेति। अन्यदीयं नास्ति स्वीयमिति भगवान्। पूर्ववदेवकारो व्याकर्तव्यः। तत्र तत्रेति। कर्मणि। तेषामिति। जीवदेवानाम्। 'सर्वस्य वशी'ति श्रुतिर्बृहदारण्यके। तेभ्य एवेति। जीवदेवेभ्यः, नत्वीश्वरात्। प्रतीति। प्रतिकर्मनियतत्वाज्जीवदेवानाम्। तेन 'धर्मं जैमिनि'रिति सूत्रेण पूर्वपक्षो यः सोऽनीश्वरजैमिनिमतेनेत्युक्तम्। केचित्त्वित्यादीति। शाङ्कराः ॥ ३८ ॥

श्रुतत्वाच ॥ ३९ ॥ निगदेति। इह त्विति। सूत्रे तु। श्रुतिमेवेति। 'अस्या देवतायाः सायुज्यं सलोकतामाप्नोती'ति श्रुतिमेव, नतु स्मृतिम्। चकारेणेयं भाष्ये वक्ष्यते। प्रमाणयति व्यासः। मत्त इति फलदातुः। एवं निगदव्याख्यातम् ॥ ३९ ॥

धर्मं जैमिनिरत एव ॥ ४० ॥ सूत्रार्थमाहुः तथा चेति। अत एवेति सौत्रशब्दौ व्याकुर्वन्ति स उपपत्तिश्रवणाभ्यामुक्तसूत्रोक्तहेतुभ्याम्। विध्यर्थेति। विध्यर्थ आज्ञा तस्य ज्ञानं

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

न वक्तुं शक्यम् । विधिवैयर्थ्यप्रवृत्त्यनुपपत्तिप्रसङ्गाभ्याम् । तत्सापेक्षत्वे तदेवास्तु, कृतं तत्सापेक्षेण तेन । नचाचेतनं चेतनाधिष्ठितमेव कार्यक्षममिति केवलेन तेन न फलं सम्भवतीति वाच्यम् । कर्मस्वरूपं स्वर्गादिकं च न लोकसिद्धम्, किन्तु श्रुतिसिद्धम् । तत्र च स्वर्गादिफलसाधकत्वेनैवोत्पत्तिवाक्येष्वर्थवादेषु च 'अग्निष्टोमेन स्वर्गकामो यजेत' 'अग्निहोत्रं जुहोति प्रजाकाम' इत्यादि । 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' 'परमेष्ठिनो वा एष यज्ञोऽग्र आसीत्, तेन स परमां काष्ठामगच्छ'दित्यादिषु कर्म श्रूयते । स च तत्साध्यत्वेनैव । एवं सति लोकेऽन्यथा दर्शनेपि धर्मिग्राहकप्रमाणेन तथैव सिद्धत्वान्नात्र काचन शङ्का । ईश्वरवादिनो नित्यज्ञानादिमत्त्व इव । आमुष्मिकफलत्वेन तत् प्रतिबन्धकापगमे भवतीत्यावयोस्तुल्यम् । तस्याशुतरविनाशित्वेपि श्रुतिसिद्धकारणतानिर्वाहाय तद्व्यापारोऽपूर्वं कल्प्यते । अविषमादीश्वरात् विषमफलोत्पत्त्यनुत्पत्तिर्वैषम्यनैर्घृण्ये च स्याताम् । अतः कर्मण एव फलमिति जैमिनिर्मनुते ॥ ४० ॥

भाष्यप्रकाशः ।

उपपत्तिश्रवणाभ्यामेव हेतुभ्यां धर्मं फलकारणं जैमिनिराचार्यो मन्यत इति सूत्रयोजना । तदेतत्तौल्यं व्युत्पादयन्ति तथा हीत्यादि । प्रवृत्तीति । विध्यर्थज्ञानोत्तरप्रवृत्तेरनुपपत्तिप्रसङ्गो दूषणान्तरमित्यर्थः । इत्यादीति, कामनावतः कर्माधिकारश्रावणात् स्वर्गकामादिपदैः कर्मफलं श्रूयत इत्यर्थः । स चेति । फलरूपः स्वर्गादिः । अन्यथा दर्शनेपीति । राजादिभ्यः फलप्राप्तिदर्शनेऽपि । अत्रेति । वेदबोधिते कर्मणि तत्फले च । नित्यज्ञानादिमत्त्व इवेति । धर्मिग्राहकेत्यादिकमत्रापि सम्बध्यते । ननु यदि कर्मणैव फलम्, तदा तदव्यवहितोत्तरं कुतो न जायत इत्यत आह आमुष्मिकेत्यादि । तदिति । स्वर्गादिरूपं फलम् । दूषणान्तरमाशङ्क्य परिहरति तस्याश्वित्यादि । तर्हि तौल्यान्नैकतरस्य फलहेतुत्वनिश्चयः, उभयोः समुच्चयो वेत्याकाङ्क्षायां स्वमतोपष्टम्भायाह अविषमादित्यादि ॥ ४० ॥

रश्मिः ।

तदुत्तरं प्रवृत्तिः तस्या अनुपपत्तिस्तस्याः प्रसङ्गः । भाष्ये । तदिति । कर्म । तेनेति । ईश्वरेण । एवेति । दर्शनादेवकारः । तेनेति । कर्मणा । एवेति । ननु तन्निरपेक्षेण कर्म श्रूयत इत्यग्रेऽन्वयः । उत्पत्तीति । प्रथमज्ञप्तिरुत्पत्तिः । साध्यसाधनत्वेन प्रथमज्ञप्तिः । तद्बोधकवाक्येषु । अर्थवादेष्विति । जैमिनिमतत्वादर्थवादपदम् । 'अन्यथा हीतिवाक्ये चतुरक्षरे द्वे पुण्यस्य पापस्य निदानभूते । उच्चारणादेव नृणां मुनीन्द्रा नारायणश्चेत्यर्थवादः' इत्यस्य विरोधः स्यात् । फलसम्बन्धाभावादर्थवादत्वमित्याशयेनाहुः अग्निहोत्रमिति । प्रकृते । इत्यादीति । कर्मफलमिति । तेनोत्पत्तिवाक्यत्वमर्थवादत्वं चेति भावः । एष यज्ञ इति । अग्निष्टोम इत्यर्थः । 'परमेष्ठिनो वा एष यज्ञोऽग्र आसीद्यदग्निष्टोम' इतिश्रुतेः । राजेति । राजादिभ्यश्चेतनेभ्यः फलं ग्रामधनादि । भाष्ये । तथैवेति । चेतननिरपेक्षसाधनत्वस्यैव । 'कर्मैके तत्र दर्शना'दिति जैमिनिसूत्रादेवकारः । प्रतिबन्धकेति । शरीराद्यपगमे । परीति । जैमिनिः परिहरति । तस्याश्वित्यादीति । श्रुतिसिद्धेति । व्यापारवदसाधारणं कारणमित्यर्थः । तस्य भावः कारणता । आहेति । जैमिनिराह । अविषमादीत्यादि । अवीति । सप्तमस्कन्धे 'समः प्रियः सुहृ'दिति वाक्यात् । कर्मण एवेति । जडात्, नतु चेतनादीश्वरात् ॥ ४० ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पूर्वं तु बादरायणो हेतुव्यपदेशात् ॥ ४१ ॥

तुशब्दः पूर्वपक्षव्युदासार्थः। बादरायणस्त्वाचार्य इतः पूर्वोक्तमीश्वरमेव फलदत्वेन मनुते। कुतः। हेतुव्यपदेशात्। हेतुत्वेन श्रुतौ व्यपदेशादित्यर्थः। 'एष उ एव साधु कर्म कारयति तं यमेभ्यो लोकेभ्य उन्निनीषते, एष उ एवासाधु कर्म-कारयति यमधो निनीषत' इति श्रुतौ न केवलं कर्मकारयितृत्वमुच्यते, अपि तु फलदित्सया तया तथात्वम्। अतः फलदत्वमीश्वरस्यैव व्यपदिष्टं भवतीति नानुपपत्तिः काचित्। नन्वीश्वरस्य स्वतः फलदाने समर्थस्य फलदित्सायां सत्यां कर्मकारणे को हेतुः, कार्यवैचित्र्यं च कथमित्यादिचोद्यं 'कृतप्रयत्नापेक्षस्तु विहितप्रतिषिद्धावैयर्थ्यादिभ्य' इत्यत्र निरस्तम्। विद्वन्मण्डने श्रीविट्ठलेन च। अतः सकामैरपि स एव भजनीयः, नान्य इति सिद्धम् ॥ ४१ ॥

इति तृतीयाध्याये द्वितीयपादे एकादशं फलमत इत्यधिकरणम् ॥ ११ ॥

इति श्रीवेदव्यासमतवर्तिश्रीवल्लभाचार्यविरचिते श्रीमद्ब्रह्मसूत्राणुभाष्ये तृतीयाध्यायस्य द्वितीयः पादः ॥ ३ ॥ २ ॥

भाष्यप्रकाशः।

पूर्वं तु बादरायणो हेतुव्यपदेशात् ॥४१॥ दूषणमाशङ्क्य तत्परिहारः प्रागेवोक्त इति स्मारयन्ति नन्वित्यादि ॥ ४१ ॥ इत्येकादशं फलमत इत्यधिकरणम् ॥ ११ ॥

इति श्रीमद्वल्लभाचार्यचरणनखचन्द्रनिरस्तहृदयध्वान्तस्य पुरुषोत्तमस्य कृतौ भाष्यप्रकाशे तृतीयाध्यायस्य द्वितीयः पादः ॥ ३ ॥ २ ॥

रश्मिः।

पूर्वं तु बादरायणो हेतुव्यपदेशात् ॥ ४१ ॥ भाष्ये। पूर्वपक्षेति। प्रकाशोक्तरीत्या व्याख्यानम्। अनीश्वरजैमिनिमते पूर्वपक्षेत्यर्थः। ईश्वरमेवेति। नतु कर्म। उन्निनीषत इति। अन्यत्रोन्निनीषतीति परस्मैपदी। ईश्वरस्यैवेति। नतु कर्मणः। काचिदिति। प्रथमशास्त्रत्वेपि व्यासस्य गुरुत्वात्पूर्वपक्षीकरणेपि न काचिदनुपपत्तिः। प्रागेवेति। कृतप्रयत्नापेक्षसूत्रे। विद्वन्मण्डने चेति योगित्वम्। 'अनागतमतीतं चे'ति वाक्यात्। भाष्ये। अतः सकामैरिति। आदिममध्यमाधिकारिभिरपि। अपिनोत्तमाधिकारी। स विरुद्धधर्माश्रयः। मीमांसितत्वादेवकारः ॥ ४१ ॥ इत्येकादशं फलमत इत्यधिकरणम् ॥ ११ ॥

इति श्रीविट्ठलेश्वरैश्वर्यनिरस्तसमस्तान्तरायेण श्रीगोविन्दरायजित्पौत्रेण संपूर्णवेत्रा विट्ठलरायजिद्भ्रात्रीयगोकुलोत्सवात्मजगोपेश्वरजिता कृते भाष्यप्रकाशस्य तृतीयाध्यायस्य रश्मौ तृतीयाध्यायस्य द्वितीयः पादः ॥ ३ ॥ २ ॥

इति श्रीमत्कृष्णद्वैपायनप्रणीतब्रह्मसूत्रेषु तृतीये उपनिषदां बोधकताप्रकारनिरूपके साधनाध्याये विषयावधृतिर्नाम द्वितीयः पादः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मुद्रितपुस्तकानि ।

१	सेवाफलम् । द्वादशविवरणसमेतम् ।	रु. १- ०-०
२	निरोधलक्षणम् । षड्विवरणसमेतम् । गुर्जरानुवादसमेतं च ।	रु. १- ०-०
३	संन्यासनिर्णयः । अष्टविवरणसमेतः । गुर्जरानुवादसमेतश्च ।	रु. १- ०-०
४	जलभेदः । चतुर्विवरणसमेतः । पञ्चपद्यानि । विवरणद्वयसमेतानि । सेवाफलम् । विवरणत्रयम् ।	रु. १- ०-०
५	भक्तिवर्धिनी । चतुर्दशटीकासमेता ।	रु. २- ०-०
६	सिद्धान्तमुक्तावली । अष्टविवृतिसमेता । गुर्जरानुवादसमेता च ।	रु. १- ०-०
७	सिद्धान्तरहस्यम् । एकादशविवरणसमेतम् । गुर्जरानुवादसमेतं च ।	रु. १- ०-०
८	पुष्टिप्रवाहमर्यादा चतुर्विवरणसमेता ।	रु. १- ०-०
९	नवरत्नम्-पञ्चविवृतिसमेतम् । गुर्जरभाषानुवादसमेतं च ।	रु. १- ०-०
१०	श्रीसुबोधिनी । दशम-पूर्वार्ध-तामस-फलप्रकरणम् ।	रु. ३- ०-०
११	श्रीसुबोधिनी । दशम-उत्तरार्ध-राजस-साधनप्रकरणम् ।	रु. २- ०-०
१२	श्रीसुबोधिनी दशमोत्तरार्धराजसफलप्रकरणम् ।	रु. २- ०-०
१३	श्रीसुबोधिनी-दशमोत्तरार्धसात्त्विकप्रमेयप्रकरणम् ।	रु. २- ०-०
१४	श्रीमती टिप्पणी । श्रीमद्विट्ठलेश्वरप्रणीता ।	रु. २- ०-०
१५	रासपञ्चाध्यायीप्रकाशः । श्रीपीताम्बरप्रणीतः ।	रु. १- ०-०
१६	दशमतामसफलप्रकरणयोजना । श्रीलालूभट्टकृता ।	रु. ०- ८-०
१७	भागवतार्थनिबन्धः । प्रकाशावरणभंगसमेतः । आद्यस्कन्धद्वयम्	रु. १- ०-०
१८	भावप्रकाशिका । ब्रह्मसूत्रवृत्तिः प्रथमाध्यायः । श्रीकृष्णचन्द्रकृता ।	रु. १- ०-०
१९	भावप्रकाशिका । द्वितीयाध्यायः । ,,	रु. ०- ८-०
२०	वेदान्ताधिकरणमाला । श्रीमत्पुरुषोत्तमप्रणीता ।	रु. १- ०-०
२१	पत्रावलम्बनम् । श्रीपुरुषोत्तमकृतविवृतिसमेतम् ।	रु. ०- ४-०
२२	श्रीपुरुषोत्तमनामसहस्रम् । नामचन्द्रिकायुतम् ।	रु. ०-१०-०
२३	त्रिविधनामावली । टीकासमेता ।	रु. १- ४-०
२४	तैत्तिरीयोपनिषद्भाष्यम् । श्रीजयगोपालभट्टकृतम् । गुर्जरानुवादयुतम् ।	रु. १- ०-०
२५	श्रीमधुराष्टकम् । षड्विवरणसमेतम् ।	अमूल्यम् ।
२६	प्रेमामृतम् । श्रीविट्ठलेश्वरकृतविवृतिसमेतम् । परिवृढाष्टकम् । श्रीगोपेश्वरकृतटीकासमेतम् ।	रु. ०- ८-०
२७	शृङ्गाररसमण्डनम् । श्रीविट्ठलेश्वरप्रकटितम् । गुर्जरानुवादसमेतम् ।	रु. २- ८-०
२८	रसाब्धिमहाकाव्यम् । श्रीदेवकीनन्दनकृतम् ।	रु. १- ०-०
२९	मनोदूतम्-हृदयदूतं च । गुर्जरानुवादसमेतम् ।	रु. ०- ८-०
३०	श्रुतिरहस्यम्-सप्रकाशम्-गुर्जरानुवादसमेतम् ।	रु. १- ०-०
३१	श्रीमदणुभाष्य-प्रकाश-रश्मिः । तृतीयाध्यायस्य प्रथमः पादः ।	रु. १- ०-०
३२	,, ,, ,, ,, द्वितीयः ,,	,,
33	Discuss how far S'aṅkaracharya truly represents the view of the author of the Brahma-Sûtras.	Rs. 1- 0-0

१. पंडित गट्टूलालजीनी पाठशाला, केथिड्रलस्ट्रीट भूलेश्वर, मुंबई.

Printed by Ramchandra Yesu Shedge, at the 'Nirnaya-sagar' Press, 26-28, Kolbhat Lane, Bombay.

Published by Mulchandra Tulsidas Telivala B. A., LL. B., Vakil, High Court, Khakkar Buildings, C. P. Tank Road, Girgaon, Bombay.